ISSN No.:2278-0815

# भास्करोदयः

संदर्भित ज्योतिष-शोधपत्रिका

Referred Research Journal of Jyotish

## नवदशोऽङ्कः

सत्रम् 2021–22




सम्पादकः

**प्रो. मदनमोहनपाठकः**

आचार्योऽध्यक्षश्च (Professor & Head) ज्यौतिषविभागः

केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ-परिसरः, विशालखण्डः-४, गोमतीनगरम्

लखनऊ - २२६०१० (उ०प्र०)


नवदेहलीस्थितस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रकाशितः

Scanned with OKEN Scanner

## भास्करोदयपत्रिकायाः प्रथमं लोकार्पणम् :-



लोकार्पणं कुर्वन्तः
केन्द्रीयसर्वकारस्य मानव-
संसाधनविकासमन्त्रालयेन
सञ्चालितस्य नवदेहलीस्थितस्य
राष्ट्रियसंस्कृतसंस्थानस्य
निदेशकाः
प्रो.वेम्पटिकुटुम्बशास्त्रिमहोदयाः

दिनाङ्कः- १८जनवरी २००१
स्थानम्- श्री.स.शि.के.सं.विद्यापीठम्, पुरी

---

## भास्करोदयपत्रिकायाः अष्टम-अङ्कस्य लोकार्पणम् :-



लोकार्पणं कुर्वन्तः
नवदेहलीस्थितस्य
राष्ट्रियसंस्कृतसंस्थानस्य
शास्त्रसंवर्धकाः कुलपतयः
श्रीमन्तः प्रो.राधावल्लभत्रिपाठीमहोदयाः

पार्श्वे सन्ति गरलीपरिसरस्य
तत्कालीनप्र.प्राचार्याः
प्रो.के.बी.सुब्बरायुडुमहोदयाः

राष्ट्रपतिसम्मानिताः
आचार्याः रामचन्द्रपाण्डेयमहोदयाः

दिनाङ्कः- २६ फरवरी २०११
स्थानम्- रा.सं.संस्थानम्, गरली-परिसरः

Scanned with OKEN Scanner

# भास्करोदयः

**Referred Research Journal of Jyotish**

एकोनविंशोऽङ्कः - सत्रम्- २०२१ - २२



**संरक्षकः-**

**प्रो. श्रीनिवासवरखेड़ी**

कुलपतिः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

**सम्पादकः**

**प्रो.मदनमोहनपाठकः**

आचार्योऽध्यक्षश्च (**Pofessor & Head**) ज्यौतिषविभागः

केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ - परिसरः, लखनऊ - २२६०१० (उ०प्र०)

## परामर्शदात्री-समितिः

**डॉ. हरिहरझाः,** (राष्ट्रपतिसम्मानितः) पूर्वप्राचार्यः, श्रीसदाशिवपरिसरः, पुरी
**प्रो. रामचन्द्रपाण्डेयः**(राष्ट्रपतिसम्मानितः) भू.पू.सङ्कायप्रमुखश्च, बी.एच.यू.
**प्रो. अर्कनाथचौधरी,** भू.पू.कुलपतिः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरात
**प्रो. रामचन्द्रझाः-** भू.पू.कुलपतिः, कामेश्वरसिंहसंस्कृतविश्वविद्यालयः, दरभङ्गा
**प्रो. शिवाकान्तझाः,**भू.पू. कुलपतिः, नालन्दामुक्तविश्वविद्यालयः पटना,
**प्रो. सर्वनारायणझाः,** निदेशकः,केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ-परिसरः,
**प्रो. सुरेन्द्रझाः,** भू.पू. प्राचार्यः,राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः,
**प्रो. राधाकान्तठाकुरः,** कुलपतिः i/c, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**सम्पादनसहायकाः-**

**डॉ. शैलेशकुमारतिवारी, डॉ. गिरिराजः, डॉ. विकासः, डॉ. बालकिशोरतिवारी, श्रीवेदप्रकाशपाठकः, श्रीआनन्दप्रकाशपाठकः**



**प्रकाशकः-**

**सम्पादक-भास्करोदयः,** ज्योतिर्विज्ञान-अनुसन्धान-केन्द्रम्

**वेदानन्द-आश्रमः (www.vedanandashram.in)** खरगापुर, नजदीक-महेशकम्पलेक्स,
गोमतीनगरविस्तारः, लखनऊ -२२६०१० (उ.प्र.)

**(एकोनविंशोऽङ्कः २०२१-२२ पृष्ठसंख्या- 1)**

## लेखपर्यवेक्षक-मण्डलम्

**प्रो.सर्वनारायणझाः**
**निदेशकः**
केन्द्रीयसंस्कृतविश्वविद्यालयः
लखनऊपरिसरः, लखनऊ-२२६०१०

**प्रो.देवीप्रसादत्रिपाठी**
**कुलपतिः**
उत्तराखण्डसं.विश्वविद्यालयः
हरिद्वारः- २४९४०२

**श्रीतेजस्करपाण्डेयः**
**ज्योतिषाचार्यः, PCS**
उत्तरप्रदेशशासनम्
लखनऊ-२२६०१०



**प्रकाशक -**
**सम्पादकः, भास्करोदयः**
**ज्योतर्विज्ञान-अनुसन्धान-केन्द्रम्**
**वेदानन्द-आश्रम, खरगापुर, नजदीक- महेश काम्प्लेक्स**
**गोमतीनगरम् (विस्तार), लखनऊ-२२६०१० (उ.प्र.)**

**ISSN No:-2278-0815**

**संस्करणम् –**
**प्रथमसंस्करणम् – २०००-०१ (संस्कृतवर्षे)**
**ऊनविंशतिसंस्करणम् - २०२१ - २२**

**मुद्रकः**
**गणपति प्रिन्टर**
**२९-कन्हैयाकुँज विहार, बाराबिरवा, आलमबाग**
**लखनऊ - २२६०१० (उत्तर प्रदेशः)**



**(C) सम्पादकः**



**प्रो.मदनमोहनपाठकः**
मोबा. ७००७७९७८१३, ९४५५४३७०६६
**e-mail:-** pathak_guruji@rediffmail.com
**website:-** www.vedanandashram.in

# सम्पादकीयम्

महाप्रभोर्भगवतो जगन्नाथस्यानुकम्पया भास्करोदयस्यास्य एकोनविंशतितममङ्कं भवतां शास्त्रानुरागिणान्तत्रापि विशेषेण ज्योतिषशास्त्र-जिज्ञासूनां ज्योतिष-विभागीयानुसन्दधित्सूनाञ्च कर-कमलयोः प्रदाय प्रसन्नतामनुभवामि। पत्रिकाया अस्याः प्रयोजनं ज्योतिष-विभागीयच्छात्राणां लेखन-कलायाः विकासेन सह तेषु परम्परागतज्योतिषशास्त्रस्य प्रचारः प्रसारश्च वर्तते । अनेन छात्रा उपकृतास्तु भवन्त्येव सहैव प्रसरति ज्योतिषशास्त्रस्य ज्योतिः गृहे-गृहे, जने-जने ।

अस्तु, इयं पत्रिकापि लेखकानां भाववाहिका विशेषेण देवभाषया ज्योतर्विज्ञानस्य ज्योतिःप्रसारिका वर्तते। पत्रिकायाः अस्याः गुणात्मकं स्वरूपमभिवर्धयितुं ते सर्वेऽपि वन्दनीया विद्वांसः प्रसङ्गेऽस्मिन् संस्मरणीयास्सन्ति येषां सर्वविधं सहयोगं सम्प्राप्य भास्करोदयोऽयं संस्कृतमाध्यमेन परम्परागतज्योतिष-जिज्ञासूनां सकलं मनोऽभिलषितं पूरयन्नस्ति। अस्मिन् सारस्वतयज्ञकर्मणि बहूनां महानुभावानां सर्वविधसहयोगो भवति अपेक्षितः। तेषु सर्वप्रथमं संस्मर्यन्ते केन्द्रीयसंस्कृत-विश्वविद्यालयस्य कुलपतयः शास्त्रमूर्त्तयः **प्रो.श्रीनिवासवरखेडीमहोदयाः** येषां चिरकालादेव सततप्रोत्साहनेन, आशीःप्रदानेन च एतादृशः सारस्वतो यज्ञः सम्पन्नतामेति। अनन्तरं स्मर्यन्ते केन्द्रीय-संस्कृतविश्वविद्यालयस्य कुलसचिवाः प्रो. रणजितकुमारवर्मनमहोदयाः, लखनऊपरिसरस्य निदेशकाः प्रो.सर्वनारायणझामहोदयाः, विभागीयाः सर्वेऽपि आचार्याः, सत्प्रेरकाः सुधयः, सहायक-सम्पादनसमितेः सदस्याः, परिसरस्य सर्वेऽपि प्रोत्साहकाः सहकर्मिणः येषां सर्वदा सोत्साहं सहयोगो मया प्राप्यते, तेषां समेषां कृते अहं साभारं कृतज्ञतां प्रकटयामि। एवमेव अत्र वन्दनीयाः लेखकाः, आयुष्मन्तश्छात्राश्च, विशेषेण धन्यवादार्हास्सन्ति । अतः सर्वेभ्यो धन्यवादराशीन् वितीर्य भगवते जगन्नाथाय, जगदम्बायै च प्रणामाञ्जलीन् विनिवेद्य विरमामि विस्तरादिति शम्।

विद्वच्चरणचञ्चरीको

मदन मोहन पाठक:

शिवरात्रिः, संवत् २०७८ (मदनमोहनपाठकः)

०१ मार्च २०२२ मङ्गलवासरः

## भास्करोदयस्यानुक्रमणिका


| क्र.सं. विषयः | नाम | पृष्ठसंख्या |
|---|---|---|
| शुभसम्मतयः | | 05 - 08 |
| १. विवाहमेलापके अष्टौ कूटानि | प्रो. मदनमोहनपाठकः | 9 - 19 |
| २. जातकपारिजातोक्तायुर्दायविचारः | डा. ज्योतिप्रसाददाशः | 20 - 27 |
| ३. ग्रहणविमर्शः | डा. विजयलक्ष्मीमहापात्रः | 28 - 32 |
| ४. ग्रहकक्षा-विमर्शः | डा. उमेशकुमारपाण्डेय | 33 - 37 |
| ५. गृहप्रवेशविचारः | श्रीआनन्दप्रकाशपाठकः | 38 - 41 |
| ६. माङ्गलिकयोगविमर्शः | डा. वरुणकुमारझाः | 42 - 46 |
| ७. संहिताग्रन्थेषु मञ्जीरनामको ग्रन्थः अन्यतमः | श्रीअंकितकुमारमिश्रः | 47 - 53 |
| ८. वासरविमर्शः | डॉ. विकासः | 54 - 58 |
| ९. वास्तुपुरुषविमर्शः | श्रीविनायकशर्मा | 59 - 62 |
| १०. विवाहलग्नस्थग्रहकृतशुभाशुभयोगविवेचनम् | श्रीवेदप्रकाशपाण्डेयः | 63 - 68 |
| ११. सन्ततिविचारः तत्प्राप्त्युपायाश्च | डॉ.अरुणकुमारः | 69 - 76 |
| १२. शैक्षणिकसंस्काराणां मानवजीवने प्रभावः | डॉ. रमेशशर्मा | 77 - 81 |
| १३. दृग्ग्रहसाधनोपयुक्तकालमानानां समीक्षणम् | डा. अश्विनीपाण्डेयः | 82 - 87 |
| १४. व्रतपर्वोत्सवमीमांसा | श्रीतेजस्करपाण्डेयः | 88 - 90 |
| 15. लखनऊपरिसरीय-ज्योतिष-विभागस्य (2021-22 सत्रस्य) गतिविधयः- | प्रो.मदनमोहनपाठकः | 91 - 98 |
| 16. संस्कृतगीतिका | प्रो.रामकुमारशर्मा | 99 - 99 |
| 17. संस्कृतसंरक्षणसम्वर्धनसम्बन्धि-विभिन्नकार्यक्रमेषु सम्पादकस्यावदानम् | प्रो.मदनमोहनपाठकः | 100 |



**प्रो. रामचन्द्रझाः**
कुलपतिः
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
कामेश्वरनगरम्, दरभङ्गा- ८४६००८
दूरभाषः- ०९४३००६३६४८
e-mail:-varunkjha@gmail.com


# शुभाशंसनम्

२०००-०१ तः प्रकाशमानां भास्करोदयनाम्नीमिमां ज्योतिषशोधपत्रिकां दृष्ट्वा नितरां प्रसीदति मे मनः । अत्र विदुषां गवेषकानां छात्राणाञ्च शास्त्रीया लेखा जिज्ञासूनां कृते समुपकाराय विलसन्ति ।

ज्ञानार्जने पत्रिकायाः महत्त्वपूर्णं स्थानं विद्यते सत्स्वपि बहुविधेषु ज्ञानसाधनोपकरणेषु। भारतीयविद्यासु ज्योतिषशास्त्रस्य महत्त्वपूर्ण स्थानं विद्यते। सर्वविध-लौकिक-पारलौकिककार्य-सम्पादनाय मानवजीवनगत-शुभाशुभफल-ज्ञानाय च वेदस्य चक्षुरूपात्मकं शास्त्रमिदं परमोपयोगि विद्यते।

एवम्भूता ज्योतिषशास्त्रीयविषयमादायान्वर्थनाम्नी पत्रिकेयं भास्करवद् भासमाना जगतां कल्याणाय जायतां जानकीजानिकृपयेति शम् ।

- इत्याशास्ते
विदुषामनुचरो



स्थानम्- दरभङ्गा
दिनाङ्कः- ५/८/२०१३
विक्रमाब्दः२०७०
श्रावणकृष्ण-मासशिवरात्रिः
सोमवासरः

**प्रो.विश्वमूर्त्तिशास्त्री**
**प्राचार्यः**
राष्ट्रियसंस्कृतसंस्थानम्, गरली-परिसरः
गरली, काँगडा (हि.प्र.)
Mob:-94191-38606
E-mail:- profvmshastri@gmail.com




# शुभाशंसनम्

## भास्करोदयः

संस्कृतस्य प्रचाराय ज्योतिषस्य विशेषतः।
यत्नः सर्वात्मना साध्यस्तदर्थं भास्करोदयः।।
महिमा भास्करस्यात्र सर्वैर्जेगीयते बुधैः।
समेषां मङ्गलं कुर्वन् भासतां भास्करोदयः।।
ज्योतिर्विदां शुभाशीर्भिर्देवानामनुकम्पया।
सर्वदा देवभाषायां राजतां भास्करोदयः।।
महत्त्वं ज्योतिषस्यात्र प्रस्तोतुं जगतीतले।
जातो हिमाचलाकाशे गरल्यां भास्करोदयः।।
हिताय सर्वलोकानां छात्राणाञ्च विशेषतः।
अस्मिन् परिसरे भायात् सर्वदा भास्करोदयः।।
यस्य प्रवर्त्तको विज्ञो मान्यो मदनमोहनः।
असौ सर्वमनःपद्मं मोदयेद् भास्करोदयः।।

- इत्याशास्ते
विदुषामनुचरो



श्रावणशुक्लपूर्णिमा,
संस्कृतदिवसः
विक्रमाब्दः२०६२
दि. 19/8/2005
शुक्रवासरः

**प्रो.अर्कनाथचौधरी**
**प्राचार्यः**
राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः
विशालखण्ड-४, गोमतीनगरम्
लखनऊ - २२६०१० (उ.प्र.)
फोन (०५२२)२३०४०६३, २३९३७४८ (का.)
फोन (०५२२) २३०२९९३ (फैक्स)
e-mail- rskslucknow@yahoo.com



# शुभाशंसनम्

## भास्वानुदेष्यति

षट्त्सु वेदाङ्गेषु ज्योतिषं शास्त्रं परब्रह्मणो निच्छ्वसितस्य वेदशरीरस्य चक्षुरिति पाणिनिः स्वशिक्षाग्रन्थे उल्लिलेख । तदेव वयमपि मन्यामहे । नेत्रं विना अन्धो भवति जनः । लोकयात्रारूपे विषमे मार्गे धावन् कश्चिदपि अन्धः पतत्यवश्यम् । किन्तु नेत्राङ्गरूपिज्योतिषशास्त्रज्ञो विषमेऽपि लोकयात्रामार्गे न पतति । यतोहि-

प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ "इत्यस्माकमृषीणामुद्घोषः"। प्रकाशपुञ्जयोः साक्षिभूतयोः समवस्थाने क्वान्धता? कस्यान्धता? न कस्यापि। पुनश्च इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति ज्ञानसिद्धान्तानुसारेणापि प्रकाशरूपेन्द्रियस्य अर्थस्य च सन्निकर्षेण यल्लब्धं ज्ञानमनन्तं प्रामाणिकं तदेव ज्योतिषं प्रकटयतीति महत्त्वातिशयमस्त्येव लोकजीवनेऽस्य शास्त्रस्य।

एतादृशस्य शास्त्रस्य विषये अनुदिनमनुसन्धानमाचरन्तो दृश्यन्ते विज्ञाः। राष्ट्रिय-संस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य (भारतशासन-मानव-संसाधन-विकास-मन्त्रालयाधीनस्य) लखनऊ-परिसरस्थः ज्योतिषशास्त्रमर्मज्ञो व्यवहारकुशलो ज्योतिषविभागाध्यक्षः प्रो.मदनमोहनपाठक "भास्करोदयः" इति नाम्ना ज्योतिषशोधपत्रिकां लोकाय समर्पयन् भृशमुपकारं जनयति पाठकानां सुधियां छात्राणाञ्चेति परिसरपक्षतोऽस्मत्पक्षतश्च साधुवादार्हः। मन्ये स्युरत्र बहवो लेखाः विदुषां शोधार्थिनाञ्च। एतैः लेखैः उदितो भास्वान् सर्वदैवोदितः स्थास्यतीति विश्वासः। तथापि लोकव्यवहारोपयोगिनो लेखाः अस्मिन्नङ्के भाविन्यङ्के चावश्यं योज्याः विदुषा सम्पादकेन प्रो.पाठकमहोदयेनेत्यनुरोधः। शतं जीव्यान्मदनमोहनपाठक इति मदीयं शुभाशंसनम्।

दिनाङ्कः- १५/१०/२०१३
संवत् २०७०पापाङ्कुशैकादशी
भौमवासरः

प्रो.अर्कनाथचौधरी

**प्रो.सर्वनारायणझाः**
**कुलपतिः**
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
दरभङ्गा-८४६००८ (बिहार)
मोबा. - ८४४७९७५२१३
email:- snjha62@gmail.com



।। ॐ नमश्चण्डिकायै ।।

## शुभाशंसनम्

दैवं फलति सर्वत्र न विद्या न च पौरुषम्। समुद्रमथनाल्लेभे हरिर्लक्ष्मीं हरो विषम्।।

अथ च - प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्रमपि।।

किञ्च-

गुणोऽपि दोषतां याति वक्रीभूते विधातरि।
सानुकूले पुनस्तस्मिन् दोषोऽपि च गुणायते।

अपि च - भाग्यक्रमेण हि धनानि भवन्ति यान्ति ।

इत्थं यस्य दैवस्य एतावन्माहात्म्यं गायन्ति मनीषिणस्तस्य ज्ञानं येन शास्त्रेण भवति तच्छास्त्रं नाम ज्योतिषमिति वयं जानीमः। तज्ज्ञातुं त्रिस्कन्धज्योतिषशास्त्रस्याध्ययनमध्यापन-मन्वेषणमनिवार्यम्।

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊ-परिसरस्य ज्योतिषविभागाध्यक्ष आचार्यः मदनमोहनपाठक अध्ययनाध्यापनलेखानुसन्धानेऽतितरामनुरक्तः सन् अनुसन्धित्सूनां छात्राणां हिताय भास्करोदयनाम्नीं शोधपत्रिकामपि प्रकाशयतीति नितरां मोदते मे मनः। पत्रिकेयं सम्पादकश्च सुतरां तुष्यादिति मे शुभाशंसा ।

**प्रो.सर्वनारायणझाः**

संवत् २०७४ महाशिवरात्रिः
दिनाङ्कः- १४/०२/२०१८
बुधवासरः

# विवाहमेलापके अष्टौ कूटानि

**प्रो. मदनमोहनपाठकः**
ज्योतिषविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः,
लखनऊ-परिसरः,

**सानन्दं सदनं सुताश्च सुधयः कान्ता न दुर्भाषिणी**
**सन्मित्रं सधनं स्वयोषिति रतिश्चाज्ञापराः सेवकाः।**
**आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे**
**साधोः सङ्गमुपासते हि सततं धन्यो गृहस्थाश्रमः।।**[1]

अनेन सुभाषितवचनेन गृहस्थाश्रमस्य महिमा सर्वातिशयेन राराजते। गृहस्थाश्रमः चतुर्षु ब्रह्मचर्याश्रम-गृहस्थाश्रम-वानप्रस्थाश्रम-संन्यसाश्रमेषु अन्यतमो वर्तते। यतः अयं सर्वेषामाश्रमाणां मूलमस्ति। उक्तमप्यस्ति-

**यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः।**
**तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः।।** [2]
**अथातः सम्प्रवक्ष्यामि गृहस्थाश्रममुत्तमम्।**
**य आधारोऽन्याश्रमाणां भूतानां प्राणिनान्तथा॥**
**ऋणत्रयच्छेदकारि धर्मकामार्थसिद्धिदम्।**
**एतत्सर्वं स्थितं स्त्रीषु शीलवृत्तान्वितासु च॥** [3]

गृहस्थाश्रमस्य वैशिष्ट्यं एतदर्थमेव अस्ति यत् अस्मिन् आश्रमे प्रविश्य मानवः देव-पितृ-मनुष्यर्णैर्मुक्तो भवति। परम् एतत् सर्वं तदानीमेव सफलं भवति यदा भार्या शीलवृत्तान्विता भवेत्। शीलवृत्तान्विता भार्या अपि मनोरमा भवेत् तदर्थं वर-वध्वोः परस्परं मेलापकः परमावश्यको भवति। गृहस्थाश्रमस्य जीवनं तदानीमेव सफलं भवति यदा दम्पत्योः मध्ये परस्परं प्रीतिः भवेत्। गृहे आर्थिकी समृद्धिः भवेत्, सन्ततयः आज्ञाधीनाः स्युः। एतदर्थं प्राक्तनीयैः ऋषिभिः मेलापकविचारस्य बहवः प्रभेदाः प्रदर्शिताः। येषु माङ्गलिकविचारः, गणनागुणैक्यविचारे अष्टकूटप्रभृतयो विषयाः महनीयाः वर्तन्ते। के अष्टौ कूटाः? इत्यस्मिन् विषये उक्तं श्रीमद्रामाचार्यदैवज्ञेन-

**वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम्।**
**गणमैत्रं भकूटञ्च नाडी चैते गुणाधिकाः।।** [4]

1. सुभाषितरत्नभाण्डागारम्, सामान्यप्रकरणम्, गृहस्थाश्रमप्रशंसा श्लो॰ - 4
2. मनुस्मृतौ- ३ / ७७
3. मुहूर्तचिन्तामणौ, विवाहप्रकरणे, श्लो॰ १, पीयूषधारायाम्।
4. मुहूर्तचिन्तामणौ, विवाहप्रकरणे, श्लो॰ २१

अर्थात् वर्ण-वैश्य-तारा-योनि-ग्रहमैत्री-गणमैत्री-भकूट-नाडी चेति अष्टौ कूटानि विवाह-मेलापक-प्रसङ्गे ज्योतिषजगति सुप्रसिद्धानि सन्ति। वर-वध्वोः नैसर्गिको मेलापकः तयोः स्वभावाधीन एव भवति। स्वभावस्य निर्धारणं चन्द्राधीनम् एव वर्तते। यतश्चन्द्रः मनसः कारको ग्रहः वर्तते। चन्द्रः उडुपतिः (नक्षत्राधिपतिः) अपि कथ्यते। अतः वर-वध्वोः मेलापकप्रसङ्गे द्वयोः (वर-बध्वोः परस्परं) नक्षत्रविचारः राशिविचारश्च परमावश्यको भवति।

राशिविचारप्रसङ्गे विषयद्वयं समक्षे आगच्छति। तत्र राशिविचारे जन्मराशिः अथवा नामराशिः कस्य ग्रहणं कर्तव्यम्? समाधानार्थमुच्यते यत् वैवाहिकसर्वमाङ्गलिककृत्येषु, यात्रायां, ग्रहगोचरेषु च जन्मराशेः एव ग्रहणं कर्तव्यम्। एवञ्च नामराशौ बलान्विते अन्यानि सर्वाणि कर्माणि करणीयानि। उक्तं वर्तते -

**विवाहे सर्वमाङ्गल्ये यात्रायां ग्रहगोचरे । जन्मराशेः प्रधानत्वं नामराशिं न चिन्तयेत् ।।**
**कुर्यात् षोडशकर्माणि जन्मराशौ बलान्विते। सर्वाण्यन्यानि कर्माणि नामराशौ बलान्विते।।**[5]

**अपि च-**

**देशग्रामगृहे युद्धे सेवायां व्यवहारके । नामराशेः प्रधानत्वं जन्मराशिं न चिन्तयेत् ।।**
**विवाहे सर्वमाङ्गल्ये यात्रायां ग्रहगोचरे । जन्मराशेः प्रधानत्वं नामराशिं न चिन्तयेत् ।।**[6]

अस्मिन् प्रसङ्गे इदमपि अवधेयं यत् वर-वध्वोः यदा जन्मराशिज्ञानं न स्यात्तदा तत्र नामराशि-प्रमाणेनैव तयोः मेलापकः कर्तव्यः । परं जन्मराशेः मेलापकः जन्मराशिना, नामराशेः विचारः नामराशिना एव कर्त्तव्यः । तद्यथा -

**जन्मभं जन्मधिष्ण्येन नामधिष्ण्येन नामभम्।**
**व्यत्ययेन यदा योज्यं दम्पत्योर्निधनप्रदम् ।।**[7]

अष्टकूटविचारे प्रथमस्तावत् आगच्छति वर्णविचारः। अत्र राश्यनुसारं वर्णसंज्ञा निर्धारिता विद्यते। यथा- मीन-कर्क-वृश्चिकराशीनां ब्राह्मणसंज्ञा, मेष-सिंह-धनू-राशीनां क्षत्रियसंज्ञा, वृष-कन्या-मकर-राशीनां वैश्यसंज्ञा तथा मिथुन-तुला-कुम्भराशीनां शूद्रसंज्ञा निर्धारिता विद्यते।

**(१) तत्रादौ वर्णविचारः-**

**द्विजा झषालिकर्कटास्ततो नृपा विशोऽङ्घ्रिजाः।**
**वरस्य वर्णतोऽधिका वधूर्न शस्यते बुधैः ।।**[८]

अत्र वरस्य ब्राह्मणवर्णः भवेत् तदा तस्य कृते ब्राह्मण-क्षत्रिय-वैश्य-शूद्र-राशिवती कन्या शुभदा भवति। परं शूद्रवर्णस्य वरस्य कृते ब्राह्मण-क्षत्रिय-वैश्यवर्णस्य कन्या शुभदायिका न भवति। अतः उक्तं **वरस्य वर्णतोऽधिका वधूर्न शस्यते बुधैः।**

5. श्रीजगन्नाथपञ्चाङ्गम्, वर्षम्-२३ पृ.सं. १०६
6. श्रीजगन्नाथपञ्चाङ्गम् वर्षम्-२३ पृ.सं. १७
7. श्रीजगन्नाथपञ्चाङ्गम् वर्षम्-२३ पृ.सं. १०६
8. मुहूर्तचिन्तामणिः, विवाहप्रकरणम्, श्लो.सं २२

**(२)वश्यविचारः-**

यथा वर्णविचारप्रसङ्गे राशीनां वर्णसंज्ञा निर्धारिता वर्तते, तथैव राशीनां वश्याः निर्धारिताः सन्ति। मेलापकविचारप्रसङ्गे पञ्चप्रकारकाः जीवाः द्वादशराशिषु विभक्ताः। द्विपद्(नरः)-चतुष्पद्-जलचर-कीट-वनचराश्चेति पञ्चप्रकारकाः जीवाः कथिताः। तद्यथा[9]-

मेषः वृषः धनुषः उत्तरार्द्धः मकरस्य पूर्वार्द्धश्च चतुष्पदाः, मकरस्य उत्तरार्द्धः कुम्भः मीनश्चेति जलचराः, मिथुनः कन्या तुला धनुषः पूर्वार्द्धश्चेति नरराशयः, कर्कः वृश्चिकश्चेति कीटराशी, सिंहराशिः वनचरराशिः इति कथिताः विद्यन्ते।

अपि च- **हित्वा मृगेन्द्रं नरराशिवश्याः सर्वे तथैषां जलजाश्च भक्ष्याः।**

**सर्वेऽपि सिंहस्य वशे विनालिं ज्ञेयं नराणां व्यवहारतोऽन्यत्।।**[10]

अत्र स्पष्टार्थं वर्णचक्रं प्रस्तूयते-

| **ब्राह्मणः** | **क्षत्रियः** | **वैश्यः** | **शूद्रः** |
|---|---|---|---|
| कर्कः | सिंहः | कन्या | तुला |
| वृश्चिकः | धनुः | मकरः | कुम्भः |
| मीनः | मेषः | वृषः | मिथुनः |

**१ वर्णगुणाः ।। वरस्य ।।**

| वर्णः | विप्रः | क्षत्रि. | वैश्यः | शूद्रः | |
|---|---|---|---|---|---|
| विप्रः | १ | ० | ० | ० | **कन्यायाः** |
| क्षत्रि. | १ | १ | ० | ० | |
| वैश्यः | १ | १ | १ | ० | |
| शूद्रः | १ | १ | १ | १ | |

अत्र स्पष्टार्थं वश्य-चक्रं प्रस्तूयते-

| द्विपद्(नरः) | चतुष्पद् | जलचरः | कीटः | वनचरः |
|---|---|---|---|---|
| मिथुनः, कन्या, तुला, धनूराशेः पूर्वार्धः, कुम्भः | मेषः, वृषः, धनूराशेः उत्तरार्धः मकरराशेः पूर्वार्धः | मकरराशेः उत्तरार्धः. मीनः | कर्कः, वृश्चिकः | सिंहः |

**२. वश्यगुणाः ।। वरस्य ।।**

| वश्यः | चतु. | नर | जल. | वन | कीट | |
|---|---|---|---|---|---|---|
| चतु. | २ | १ | १ | ० | १ | कन्यायाः |
| नर | १ | २ | ।। | ० | १ | |
| जल. | १ | ।। | २ | १ | १ | |
| वन | ० | ० | १ | २ | ० | |
| कीट | १ | १ | १ | ० | २ | |

**(३)ताराविचारः**

ताराविचारप्रसङ्गे वरकन्ययोः सर्वादौ जन्मनक्षत्रम् अन्वेषणीयम्। तदनु वरनक्षत्रात् कन्यानक्षत्रं यावत् विगणय्य याः संख्या आगच्छति ताः नवभिः विभाज्यते। एवमेव कन्यानक्षत्रात् वरनक्षत्रं यावत् संख्यां विगणय्य नवभिः विभक्ते क्रमात् ३(विपत्)-५(प्रत्यरिः)-७(वधः) शेषे समागते वरकन्ययोः तारामेलापकः शुभदायको न भवति। अस्यां परिस्थितौ शून्यो गुणः प्राप्यते। अस्य आनुकूल्ये तिस्रः (३) संख्या प्राप्यते। ताराविचारस्य कृते अयं श्लोकः महनीयः वर्तते। तद्यथा-

**कन्यर्क्षात् वरभं यावत् कन्याभं वरभादपि।**

**गणयेन्नवहृच्छेषे त्रीष्वद्रिभमसत्स्मृतम्।।**[11]

तत्र यदि वर-वध्वोः मध्ये एकस्य तारा शुभा अपरस्य अशुभा भवेत् तदा सार्द्धैको (१।।) गुणः प्राप्यते। द्वयोः परस्परं तारा शुभा भवति चेत् तारायाः गुणत्रयं (३) भवति। उभयोः अशुभत्वे तारागुणः

शून्यः(०) अवगन्तव्यः। तद्यथा-

**एकतश्चेच्छुभा तारा परतश्चाशुभा तदा।**
**सार्द्धश्चैको गुणो ग्राह्यस्ताराशुद्ध्या मिथस्त्रयः।।**
**उभयोर्न शुभा तारा तदा शून्यं समादिशेत्।**[12]

प्रसङ्गादत्र ताराणां नामानि उपस्थाप्यन्ते-

**जन्म सम्पद् विपद् क्षेम प्रत्यरि साधकस्तथा।**
**वधो मैत्रातिमैत्रेयं तारा नाम सदृक्फलाः।।**[13]

अत्र त्रि-पञ्च-सप्त-ताराणामशुभत्वे कारणं सुस्पष्टमेव यत् एतासां नामानुसारमेव फलं भवति। यतः तृतीया तारा विपत्-संज्ञिका, पञ्चमी तारा प्रत्यरि-संज्ञिका, सप्तमी तारा वध-संज्ञिका प्रोक्ता विद्यते। तत्र तृतीया तारा विपत् संज्ञिका द्वयोः वरवध्वोः दाम्पत्यजीवने विपत्तिं सूचयति, पञ्चमी तारा या प्रत्यरि-संज्ञिका वर्तते, इयं द्वयोः वर-वध्वोः दाम्पत्यजीवने कलहं/शत्रुत्वं द्योतयति। सप्तमी वध-संज्ञिका तारा अपि द्वयोः दाम्पत्यजीवने महदनिष्टं सूचयति। प्रसङ्गादत्र तारागुणबोधकचक्रं लिख्यते-

३. **तारागुणाः ।। वरस्य ।।**

| तारा | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | |
|---|---|---|---|---|---|---|---|---|---|---|
| १ | ३ | ३ | १।। | ३ | १।। | ३ | १।। | ३ | ३ | |
| २ | ३ | ३ | १।। | ३ | १।। | ३ | १।। | ३ | ३ | |
| ३ | १।। | १।। | ० | १।। | ० | १।। | ० | १।। | १।। | |
| ४ | ३ | ३ | १।। | ३ | १।। | ३ | १।। | ३ | ३ | |
| ५ | १।। | १।। | ० | १।। | ० | १।। | ० | १।। | १।। | **कन्यायाः** |
| ६ | ३ | ३ | १।। | ३ | १।। | ३ | १।। | ३ | ३ | |
| ७ | १।। | १।। | ० | १।। | ० | १।। | ० | १।। | १।। | |
| ८ | ३ | ३ | १।। | ३ | १।। | ३ | १।। | ३ | ३ | |
| ९ | ३ | ३ | १।। | ३ | १।। | ३ | १।। | ३ | ३ | |

## (४)योनिकूटविचारः-

गणनामेलापकप्रसङ्गे योनिकूटः वर-वध्वोः प्रणयसम्बन्धं द्योतयति। अस्य योनिकूटविचारस्य आनुकूल्ये चतस्रः (४) संख्या प्राप्यते। अष्टाविंशतिः नक्षत्राणि चतुर्दशयोनिषु विभक्तानि सन्ति। प्रकृतेऽस्मिन् प्रसङ्गे चतुर्दश योनयः स्वीकृताः विद्यन्ते। तेषां नामानि यथा-

१. अश्वः, २. गजः, ३. मेषः, ४. सर्पः, ५. श्वानः, ६. मार्जारः, ७. मूषकः, ८. गौः, ९. महिषः,१०. व्याघ्रः, ११. मृगः, १२. वानरः, १३. नकुलः, १४. सिंहः इति। तत्र कस्य नक्षत्रस्य का

12. बृहज्ज्योतिषसारः, विवाहप्रकरणम्, श्लो.सं. २३-२४

13. भारतीयकुण्डलीमीमांसा- पृ.सं. ५४

योनिः ? इत्यस्य ज्ञानं कथं स्यादेतदर्थं निम्नलिखितचक्रम् अतीव महनीयं वर्तते। तद्यथा-

| योनिकूटचक्रम् (४) | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| अश्वः | महिषः | सिंहः | गजः | मेषः | कपिः | नकुलः | सर्पः | मृगः | श्वानः | मार्जारः | मूषकः | व्याघ्रः | गौः |
| अश्वि. शत. | हस्त, स्वा. | धनि., पू.भा. | भर., रेव. | पुष्य, कृति. | श्रव., पू.षा. | उ.षा. अभि. | मृग., रोहि. | ज्ये., अनु. | मूल, आर्द्रा | पुन., श्ले. | मघा, पू.फा. | विशा., चित्रा | उ.फा, उ.भा. |

अत्र यथा लोकव्यवहारे च अश्व-महिषयोः, सिंह-गजयोः, कपि-मेषयोः, नकुल-सर्पयोः, मृग-श्वानयोः, मार्जार-मूषकयोः, गो-व्याघ्रयोः मैत्री न भवति तथैव योनिकूटमेलापके सम्बन्धः अवगन्तव्यः। योनिकूटमेलापके गुणसंख्यामवगमनार्थं निम्नलिखितचक्रस्य प्रयोगं कर्तुं शक्यते। तद्यथा-

**योनिकूटं शार्दूलविक्रीडिताभ्यामाह-**

**अश्विन्यम्बुपयोर्हयो निगदितः**
**स्वात्यर्कयोः कासरः**
**सिंहो वस्वजपाद्भयोः समुदितो**
**याम्यान्त्ययोः कुञ्जरः।**
**मेषो देवपुरोहितानलभयोः**
**कर्णाम्बुनोर्वानरः**
**स्याद् वैश्वाभिजितोस्तथैव**
**नकुलश्चान्द्राब्जयोन्योरहिः॥**
**ज्येष्ठामैत्रभयोः कुरङ्ग उदितो**
**मूलार्द्रयोः श्वा तथा**
**मार्जारोऽदितिसार्पयोरथ मघा-**
**योन्योस्तथैवोन्दुरुः।**
**व्याघ्रो द्वीशभचित्रयोरपि च गौरार्यम्णबुध्न्यर्क्षयो-**
**र्योनिः पादगयोः परस्परमहावैरं भयोन्योस्त्यजेत् ॥**[14]

४ योनिकूटगुणाः ।। वरस्य ।। (कन्यायाः ↓)

| → योनिः↓ | अश्वः | गजः | मेषः | सर्पः | श्वानः | मार्जारः | मूषकः | गौः | महिषः | व्याघ्रः | मृगः | वानरः | नकुलः | सिंहः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| अश्वः | ४ | २ | ३ | २ | २ | ३ | ३ | ३ | ० | १ | ३ | २ | २ | १ |
| गजः | २ | ४ | ३ | २ | २ | ३ | ३ | ३ | ३ | १ | ३ | २ | २ | ० |
| मेषः | ३ | ३ | ४ | २ | २ | ३ | ३ | ३ | ३ | १ | ३ | ० | २ | १ |
| सर्पः | २ | २ | २ | ४ | २ | १ | १ | २ | २ | २ | २ | १ | ० | २ |
| श्वानः | २ | २ | २ | २ | ४ | १ | २ | २ | २ | २ | ० | २ | २ | २ |
| मार्जारः | ३ | ३ | ३ | १ | १ | ४ | ० | ३ | ३ | २ | ३ | २ | २ | २ |
| मूषकः | ३ | ३ | ३ | १ | २ | ० | ४ | ३ | ३ | २ | ३ | २ | १ | १ |
| गौः | ३ | ३ | ३ | २ | २ | ३ | ३ | ४ | ३ | ० | ३ | २ | २ | १ |
| महिषः | ० | ३ | ३ | २ | २ | ३ | ३ | ३ | ४ | १ | ३ | २ | २ | १ |
| व्याघ्रः | १ | १ | १ | २ | २ | २ | २ | ० | १ | ४ | १ | २ | २ | २ |
| मृगः | ३ | ३ | ३ | २ | ० | ३ | २ | ३ | ३ | १ | ४ | २ | २ | ३ |
| वानरः | २ | २ | ० | १ | २ | २ | २ | २ | २ | २ | २ | ४ | २ | २ |
| नकुलः | २ | २ | २ | ० | २ | २ | १ | २ | २ | २ | २ | २ | ४ | २ |
| सिंहः | १ | ० | १ | २ | २ | २ | २ | १ | १ | २ | १ | २ | २ | ४ |

अत्र गणनागुणैक्यप्रसङ्गे द्वयोः वर-कन्ययोः उपर्युक्ता योनिः परस्परं महाशत्रुत्वसम्बन्धयुक्तो भवेत्तदा शून्यं गुणं भवति। द्वयोः वर-कन्ययोः योनिमध्ये शत्रुत्वसम्बन्धः भवेत्तदा गुणमेकं भवति। यदि द्वयोः योनिमध्ये सम-सम्बन्धः भवेत्तदा अङ्कद्वयं भवति। एवमेव द्वयोः योनिमध्ये मैत्रीसम्बन्धः भवेत्तदा गुणत्रयं तथा द्वयोर्योनिमध्ये अतिमैत्री सम्बन्धः भवति तदा तस्य गुणं संख्याचतुष्टयं भवति। तद्यथा-

**महावैरे च वैरे च समे चैव यथाक्रमम्।**

**मैत्रे चैवातिमैत्रे च खैकद्वित्रिचतुर्गुणाः।।**[15]

**(५) ग्रहमैत्रीविचारः-**

सुखमयदाम्पत्यजीवननिर्वहणार्थं वर-कन्ययोः मानसिकी-एकरूपता परमावश्यकी। मानसिकी-एकरूपतामवगमनार्थं जन्मपत्रस्थस्य चन्द्रस्य परिशीलनं क्रियते। यतः चन्द्रः मनसः कारको भवति। अतः वर-वध्वोः मेलापकविचारप्रसङ्गे द्वयोः राशीशयोः विचारद्वारा ग्रहमैत्रीविचारः क्रियते। द्वयोः वर-वध्वोः राशिनाथयोः परस्परं यदि मैत्री भवति तदा द्वयोः दाम्पत्यजीवनं मधुरं भवति। यदि द्वयोः राश्याधिपतयोः परस्परं शत्रुता भवति तदा तयोः वैवाहिकं जीवनं कष्टकरं कलहमयं भवति। अस्य ग्रहमैत्रीविचारस्य आनुकूल्ये गुणानां पञ्च (५) संख्या प्राप्यते। ग्रहमैत्रीविषये प्रायः समेषु जातकग्रन्थेषु समानमेव मतमुपलभ्यते। तद्यथा नैसर्गिकीग्रहमैत्रीविचारः-

**मित्राणि द्युमणेः कुजेज्यशशिनः शुक्रार्कजौ वैरिणौ**
**सौम्याश्चास्य समो विधोर्बुधरवी मित्रे न चास्य द्विषन्।**
**शेषाश्चास्य समाः कुजस्य सुहृदश्चन्द्रेज्यसूर्या बुधः**
**शत्रुः शुक्रशनी समौ च शशभृत्सुनोः सिताहस्करौ।।**
**मित्रे चास्य रिपुः शशी गुरुशनिक्ष्माजाः समा गीष्पतेः**
**मित्राण्यर्ककुजेन्दवो बुधसितौ शत्रू समः सूर्यजः।**
**मित्रे सौम्यशनी कवेः शशिरवी शत्रू कुजेज्यौ समौ**
**मित्रे शुक्रबुधौ शनेः शशिरविक्ष्माजा द्विषोऽन्यः समः।।**[16]

अर्थात् **सूर्यस्य** नैसर्गिकरूपेण कुजेज्यशशिनः मित्राणि भवन्ति। शुक्र-शनैश्चरौ वैरिणौ भवतः। बुधः समः प्रोक्तः। एवमेव **चन्द्रस्य** बुध-रवी मित्रे स्तः, तथा अस्य द्विषन् (शत्रुः) कोऽपि नास्ति। अवशिष्टाः मङ्गल-गुरु-शुक्र-शनैश्चराः अस्य चन्द्रस्य समाः भवन्ति।

**कुजस्य** सुहृदः चन्द्रेज्यसूर्या भवन्ति। बुधः अस्य शत्रुस्तथा शुक्रशनी समौ भवतः।

**शशभृत्सुनोः** (बुधस्य) सिताहस्करौ (शुक्र-सूर्यौ) मित्रे, रिपुः शशी, गुरुशनिक्ष्माजाः(गुरु-शनि-भौमाः) समाः भवन्ति।

**गीष्पतेः** (बृहस्पतेः) अर्ककुजेन्दवः मित्राणि, बुधसितौ शत्रू, सूर्यजः (शनिः) समः वर्तते।

**कवेः** (शुक्रस्य) सौम्य(बुध)शनी मित्रे, शशिरवी शत्रू, कुजेज्यौ समौ वर्तेते।

**शनेः** मित्रे शुक्रबुधौ, शशिरविक्ष्माजा द्विषः (शत्रवः) अन्यः (गुरुः) समः कथितो वर्तते। अस्मिन् श्लोके ग्रहमैत्रीप्रकरणे राहु-केत्वोः चर्चा नास्ति। परं ग्रन्थान्तरात् चक्रमाध्यमेन राहु-केत्वोः ग्रह मैत्री संकलय्य अत्रोपस्थाप्यते। तद्यथा -

---

15. बृहज्ज्योतिषसारः विवाहप्रकरणम् श्लो.सं. २७

16. मुहूर्तचिन्तामणिः, विवाहप्रकरणम्, श्लो.२७-२८

| ५ ग्रहमैत्रीगुणाः ।। वरस्य ।। | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| ग्रह | सूर्यः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः | |
| सूर्यः | ५ | ५ | ५ | ४ | ५ | ० | ० | कन्यायाः |
| चन्द्रः | ५ | ५ | ४ | १ | ४ | ॥ | ॥ | |
| मङ्गलः | ५ | ४ | ५ | ॥ | ५ | ३ | ॥ | |
| बुधः | ४ | १ | ॥ | ५ | ॥ | ५ | ४ | |
| गुरुः | ५ | ४ | ५ | ॥ | ५ | ॥ | ३ | |
| शुक्रः | ० | ॥ | ३ | ५ | ॥ | ५ | ५ | |
| शनिः | ० | ॥ | ॥ | ४ | ३ | ५ | ५ | |

| ग्रहमैत्रीविचारः | | | | |
|---|---|---|---|---|
| | ग्रहाः | मित्रग्रहाः | समग्रहाः | शत्रुग्रहाः |
| कन्यायाः | सूर्यः | चं. मं. बृ. | बु. | शु. श. रा. |
| | चन्द्रः | सू. बु. | मं.बृ.शु.श. | - - - |
| | भौमः | सू. चं. बृ. | शु. श. | बु. |
| | बुधः | सू. शु. | मं. बृ. श. | चं. |
| | गुरुः | सू. चं. मं. | श. | बु. शु. |
| | शुक्रः | बु. श.रा. | मं. बृ. | सू. चं. के. |
| | शनिः | बु. शु.रा. | - बृ. - | सू. चं. मं. के. |
| | राहुः | बु. शु. श. | - बृ. - | सू. चं. मं. के. |
| | केतुः | सू. चं. मं. | बु. बृ. | शु. श. रा. |

वर-वध्वोः गणनागुणैक्यप्रसङ्गे गुणसंख्यायाः विवेचना क्रियते। यदि वर-बध्वोः परस्परं राशिमैत्री भवति तदा पञ्च (५) संख्या आयाति। द्वयोः सम-मित्रता आयति अर्थात् एकः अपरस्य समः, अपरः एकस्य मित्रं भवति तदा चतस्रः (४) संख्या आयाति। मित्र-वैरे गुणश्चैकः (१) गुणः आयाति। द्वयोः साम्ये त्रयो (३) गुणाः भवन्ति। सम-वैरे गुणार्द्धकं (१/५) अर्थात् अर्द्धसंख्या आगच्छति। परस्परं शत्रुत्वे शून्यसंख्या भवति। एकाधिपतित्वे पञ्च (५) संख्या भवति। तद्यथा-

**ग्रहमैत्रं सप्तविधं गुणाः पञ्च प्रकीर्तिताः।**
**तत्रैकाधिपतित्वे च मित्रत्वे गुणपञ्चकम्।।**
**चत्वारः सममित्रत्वे द्वयोः साम्ये त्रयो गुणाः।**
**मित्रवैरे गुणश्चैकः सम-वैरे गुणार्द्धकम् ।।**
**परस्परं खेट-वैरे गुणशून्यं विनिर्दिशेत् ।**
**असद्भे सममित्रादौ व्येका ग्राह्या यथोदिताः।।**[17]

अत्रोदाहरणम् - यथा वरस्य जन्मराशिः सिंहस्तथा कन्यायाः जन्मराशिः कुम्भस्तदा द्वयोः राश्यधिपयोर्मध्ये सूर्यस्य शनिः शत्रुस्तथा शनैश्चरस्य सूर्योऽपि शत्रुः वर्तते। अस्यां परिस्थितौ परस्परं खेट-वैरे गुणशून्यं विनिर्दिशेत् इति सिद्धान्तवचनेन शून्यो गुणः भविष्यति। अनेन प्रकारेण अन्यत्रापि

17. बृहज्ज्योतिषसारः विवाहप्रकरणं श्लो.सं.- ३२-३४

विचारः कर्तव्यः।

**(६) गणविचारः**

वर-वध्वोः जन्मनक्षत्रानुसारं देव-मानव-राक्षसगणानां निर्धारणं कृतमस्ति। अत्र नव-नव-नक्षत्राणां देव-मानव-राक्षसगणा निर्धारिताः विद्यन्ते। तत्र अश्विनी-मृगशिरा-पुनर्वसु-पुष्य-हस्त-स्वाती-अनुराधा-श्रवण-रेवती-नक्षत्राणां देवगणः, भरणी-रोहिणी-आर्द्रा-पूर्वाफाल्गुनी-उत्तराफाल्गुनी पूर्वाषाढा -उत्तराषाढा-पूर्वाभाद्रपदा-उत्तराभाद्रपदा-इति नव नक्षत्राणि मानवसंज्ञकानि तथा कृतिका-आश्लेषा-मघा-चित्रा-विशाखा-ज्येष्ठा-मूल-धनिष्ठा-शतभिषा-इति नव नक्षत्राणि राक्षस-संज्ञकानि ख्यातानि सन्ति। अस्य गणविचारस्य आनुकूल्ये गुणानां षट् संख्या प्राप्यते।

| गणः | देवः | मनुष्यः | राक्षसः |
|---|---|---|---|
| नक्षत्राणि | अश्विनी मृगशिरा पुनर्वसुः पुष्यः हस्तः स्वाती अनुराधा श्रवण रेवती | भरणी रोहिणी आर्द्रा पूर्वाफाल्गुनी उत्तराफाल्गुनी पूर्वाषाढा उत्तराषाढा पूर्वाभाद्रपदा उत्तराभाद्रपदा | कृतिका आश्लेषा मघा चित्रा विशाखा ज्येष्ठा मूलः धनिष्ठा शतभिषा |

तत्र वर-वध्वोः निज-निजगणे उत्तमा प्रीतिः जायते। देव-मनुजयोः मध्यमा प्रीतिः, असुर-मनुजयोः दाम्पत्यजीवने मृत्युतुल्यं कष्टं भवति। एवमेव देव-राक्षयोः महद्वैरं भवति। गणविचारः **(वसन्ततिलका-मालिनीभ्यामाह)-**

**रक्षोनरामरगणाः क्रमतो मघाहिवस्विन्द्रमूलवरुणानलतक्षराधाः।**
**पूर्वोत्तरात्रयविधातृयमेशभानि मैत्रादितीन्दुहरिपौष्णमरुल्लघूनि।।**
**निजनिजमध्ये प्रीतिरत्युत्तमा स्यादमरमनुजयोः सा मध्यमा सम्प्रदिष्टा।**
**असुरमनुजयोश्चेन्मृत्युरेव प्रदिष्टो दनुजविबुधयोः स्याद्वैरमेकान्ततोऽत्र॥**[18]

गणमेलापकप्रसङ्गे यदि गुणसंख्यां विचारयामस्तदा देव-देवयोर्मध्ये षड् (६) संख्या, देव-मनुजयोः पञ्च (५) संख्या, देव-राक्षसयोः एका (१) संख्या मतान्तरेण शून्य (०) संख्या गुणाङ्कत्वेन स्वीक्रियते।

| ६ गणगुणाः वरस्य | | | |
|---|---|---|---|
| गणः | देवः | मानवः | राक्षसः |
| देवः | ६ | ५ | ० |
| मानवः | ५ | ६ | ० |
| राक्षसः | ० | ० | ६ |

कन्यायाः

(७) **भकूटविचारः-** गणनागुणैक्यप्रसङ्गे सप्तमः कूटः भकूटः अर्थात् राशिकूटो भवति। अस्य

18. मुहूर्तचिन्तामणिः, विवाहप्रकरणम्, श्लो.२९-३०

आनुकूल्ये सप्त (७) संख्या प्राप्यते। अत्र वर-वध्वोः एकस्मात् राशितः अपर-राशिसंख्यां यावत् गण्यते। तत्संख्यानुसारं द्वयोः वर-वध्वोः दाम्पत्यजीवनस्य शुभाशुभफलं विचार्यते। भकूटस्य षट् प्रकाराः भवन्ति। १. प्रथम-सप्तमसम्बन्धः, २. द्विर्द्वादशसम्बन्धः, ३. तृतीयैकादशसम्बन्धः, ४. चतुर्थ-दशमसम्बन्धः, ५. पञ्चम-नवमसम्बन्धः, ६. षडष्टकसम्बन्धश्च। उपर्युक्ताः सर्वेपि सम्बन्धाः दोषावहा एव भवन्ति। तद्यथा-

**व्ययेन वित्तं न तपस्यपत्यं नायुर्दिशत्येव वधूवराणाम् ।**
**द्विर्द्वादशः पञ्च नवाष्टषष्ठो जन्मर्क्षयोः सख्यविधिर्न दृष्टः।।**[19]

तत्रापि एषु पञ्चम-नवमसम्बन्धः, षडष्टकसम्बन्धः, द्विर्द्वादशसम्बन्धश्च त्रयोऽप्येते सर्वाधिकाः दोषावहाः भवन्ति। तद्यथा-

**मृत्युः षडष्टके ज्ञेयोऽपत्यहानिर्नवात्मजे।**
**द्विर्द्वादशे निर्धनत्वं द्वयोरन्यत्र सौख्यकृत्।।**[20]

प्रसङ्गादत्र भकूटगुणबोधकचक्रं लिख्यते। तद्यथा-

**७ राशिकूटगुणाः ।। वरस्य ।।**

| राशयः | मे. | वृ. | मि. | क. | सि. | क. | तु. | वृ. | ध. | म. | कु. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| मेषः | ७ | ० | ७ | ७ | ० | ० | ७ | ० | ० | ७ | ७ | ० |
| वृषः | ० | ७ | ० | ७ | ७ | ० | ० | ७ | ० | ० | ७ | ७ |
| मिथुनः | ७ | ० | ७ | ० | ७ | ७ | ० | ० | ७ | ० | ० | ७ |
| कर्कः | ७ | ७ | ० | ७ | ० | ७ | ७ | ० | ० | ७ | ० | ० |
| सिंहः | ० | ० | ७ | ० | ७ | ० | ७ | ७ | ० | ० | ७ | ० |
| कन्याः | ० | ० | ७ | ७ | ० | ७ | ० | ७ | ७ | ० | ० | ७ |
| तुला | ७ | ० | ० | ७ | ७ | ० | ७ | ० | ७ | ७ | ० | ० |
| वृश्चिकः | ० | ७ | ० | ० | ७ | ७ | ० | ७ | ० | ७ | ७ | ० |
| धनुः | ० | ० | ७ | ० | ० | ७ | ७ | ० | ७ | ० | ७ | ७ |
| मकरः | ७ | ० | ० | ७ | ० | ० | ७ | ७ | ० | ७ | ० | ७ |
| कुम्भः | ७ | ७ | ० | ० | ७ | ० | ० | ७ | ७ | ० | ७ | ० |
| मीनः | ० | ७ | ७ | ० | ० | ७ | ० | ० | ७ | ७ | ० | ७ |

**कन्यायाः**

**भकूटदोषपरिहारः-** यदि वर-वध्वोः एकराश्याधिपतित्वं जायते तदा भकूटदोषस्य परिहारो भवति। तथा नाडीदोषो न भवेत्, राशीशमैत्री भवेत्, तदापि भकूटदोषपरिहारो जायते।

19. विवाहवृन्दावनम्, मेलापकाध्यायः श्लो.सं. १
20. मुहूर्तचिन्तामणिः, विवाहप्रकरणम्, श्लो.३१

**(८) नाडीविचारः** ( स्रग्धरयाऽऽह-)

**ज्येष्ठार्यम्णेशनीराधिपभयुगयुगं दास्रभं चैकनाडी,**
**पुष्येन्दुत्वाष्ट्रमित्रान्तकवसुजलभं योनिबुध्न्ये च मध्या।**
**वाय्वग्निव्यालविश्वोडुयुगयुगमथो पौष्णभं चापरा स्याद्,**
**दम्पत्योरेकनाड्यां परिणयनमसन्मध्यनाड्यां हि मृत्युः॥**[21]

मेलापकविचारप्रसङ्गे नाडीविचारः महत्त्वपूर्णः विद्यते। सप्तविंशतिनक्षत्राणि त्रिषु प्रभागेषु विभक्तानि सन्ति। यतः आदि-मध्य-अन्त्येति तिस्रः नाड्यः प्रसिद्धाः सन्ति। तत्र द्वयोः वर-कन्ययोः एका समाना नाडी सफलदाम्पत्यजीवनस्य कृते उपयुक्ता न भवति। नाडीपरिज्ञानं जन्मनक्षत्रानुसारेण क्रियते। तत्र आदिनाड्यां ज्येष्ठा-अर्यम्णं(उत्तरफाल्गुनी)-ईश(आर्द्रा)नीराधिप(शतभिषा) भयुग-युगं अर्थात् पूर्वकथितनक्षत्रात् द्वयं द्वयं नक्षत्रम् एवञ्च दास्रभम् अर्थात् अश्विनीनक्षत्रम् एकस्याम् आदिनाड्यां समायाति। अत्र आदि-मध्य-अन्त्यनाड्यान्तर्गतनक्षत्राणां सम्यक् अवबोधनर्थं चक्रं प्रदर्श्यते-

| नाड्यः | आदिनाडी | मध्यनाडी | अन्त्यनाडी |
|---|---|---|---|
| नक्षत्राणि | ज्येष्ठा-मूल<br>उत्तरफाल्गुनी-हस्त<br>आर्द्रा-पुनर्वसु<br>शतभिषा-पू.भा.प.<br>अश्विनी च | पुष्य- इन्दु(मृगशिरा)<br>त्वाष्ट्र (चित्रा)-मित्र(अनुराधा)<br>अन्तक(भरणी)-वसु (धनिष्ठा)<br>जलभं (पूर्वाषाढा)-योनि (पू.फा.)<br>बुध्न्ये (उ.भा.प.) | वायु (स्वाति)- विशाखा<br>अग्नि (कृतिका)-रोहिणी<br>व्याल (आश्लेषा)-मघा<br>विश्व (उत्तराषाढा)<br>श्रवणा- रेवती च |

**आदिनाडी वरं हन्ति मध्यनाडी च कन्यकाम्।**
**अन्त्यनाडी द्वयोर्मृत्युर्नाडीदोषं त्यजेद् बुधः।।** [22]

विषयेऽस्मिन् जगन्मोहने नारदः-

**एकनाडीविवाहश्च गुणैः सर्वैः समन्वितः। वर्जनीयः प्रयत्नेन दम्पत्योर्निधनं यतः।।** [23]

अत्र वर-बध्वोः जन्मनक्षत्रम् अथवा द्वयोः नामनक्षत्रं आदि-नाड्यां भवति तदा सः विवाहः वरस्य कृते अशुभावहो भवति। मध्य-नाड्यां भवति तदा सः विवाहः कन्यायाः कृते तथा अन्त्यनाड्यां भवति तदा द्वयोः कृते अशुभावहो भवति। द्वयोः दाम्पत्यजीवनं सुखमयं नैव भवतीत्यर्थः।

इदानीं परिहारवचनानि- तत्रादौ

(१) **वर्णदोषपरिहारः-**

वर्णाधिका कन्या स्वभर्तुः कृते शुभदा सुखदा च न भवति। यथा विप्रवर्णा कन्या क्षत्रिय-वैश्य-शूद्र-वर्णस्य वरस्य कृते शुभदा न भवति। परं वर-कन्ययोः राशीनाथः समानः भवेत्, द्वयोः राशीशमैत्री

21. मुहूर्तचिन्तामणिः, विवाहप्रकरणम्, श्लो.-३४
22. ज्योतिषसर्वसंग्रहः, शीघ्रबोधे श्लो. सं. ६८
23. मुहूर्तचिन्तामणिः विवाहप्रकरणम् श्लो. सं. ३४ इत्यस्य पीयूषधाराटीकायाम्

भवेत्, अथवा राशीशस्य नवांशेशमैत्री भवेत्तदा वर्णदोषस्य परिहारो जायते।[24]

(२) **वश्यदोषपरिहारः-**

वश्यदोषोऽपि राशीनाथसमानत्वे, राशीशमैत्रीत्वे, राशीशनवांशेशमैत्रीत्वे उपशमितो भवति।

(३) **तारादोषपरिहारः-**

वर-वध्वोः एकाधिपतित्वे अथवा राशीशमैत्रीत्वे तारादोषस्य परिहारो जायते।

(४) **योनिदोषपरिहारः-**

अश्व-गज-मेष-सर्पादयः याः योनयः सन्ति तद्दोषपरिहारार्थं एकाधिपत्यं राशीशमैत्री च अन्वेषणीया। अनेन योनिदोषपरिहारः जायते।

(५) **ग्रहमैत्रीदोषपरिहारः-**

राशीशमैत्री-अभावे द्वयोः लग्न-नवमांशेशयोः मैत्री, राशीश-नवमांशयोः मैत्री अन्वेषणीया। यद्यपि अस्य परिहारान्वेषणं नोचितम्। यतः अयं ग्रहमैत्री बहूनां दोषाणाम् उपशमनं करोति। यदि तयोः राशिनाथयोः मैत्री न भवति तदा परमावश्यके तयोः राशिनवांशाधिपयोः मैत्री नूनमेव अन्वेषणीया। यतः

**राशिनाथे विरुद्धेऽपि सबलावंशकाधिपौ।**
**तन्मैत्रेपि च कर्तव्यं दम्पत्योः शुभमिच्छता ।।**[25]

(६) **गणदोषपरिहारः (७) भकूटदोषपरिहारश्च -**

वर-वध्वोः राशीशमैत्री भवति चेत् गणदोषपरिहारो जायते। यथोक्तम्-

**राशीशयोः सुहृद्भावो मित्रत्वे वांशनाथयोः। गणादिदौष्ट्येप्युद्वाहः पुत्रपौत्रप्रवर्द्धनः।।** [26]

अर्थात् वर-वध्वोः राशीशयोः मित्रभावे, नवमांशयोः मित्रभावे गणदोषस्य परिहारो जायते। एवंभूतो विवाहः पुत्रपौत्रप्रदायको भवति। विषयेऽस्मिन् श्रीमद्रामाचार्यदैवज्ञोपि वदति-

**मैत्र्यां राशिस्वामिनोरंशनाथद्वन्द्वस्यापि स्याद्गणानां न दोषः।**
**खेटारित्वं नाशयेत् सद्भकूटं खेटप्रीतिश्चापि दुष्टं भकूटम्।।**

(८) **नाडीदोषपरिहारः-**

**राश्यैक्ये चेद्भिन्नमृक्षं द्वयोः स्यान्नक्षत्रैक्ये राशियुग्मं तथैव ।**
**नाडीदोषो नो गणानाञ्च दोषो नक्षत्रैक्ये पादभेदे शुभं स्यात् ।।**

अर्थात् वर-वध्वोः समानराशिः भवेत्परं नक्षत्रभेदो भवेत्, नक्षत्र-समाने सति राशिः पृथक् भवेत्, अथवा समाननक्षत्रे सति चरणयोः भेदो भवेत्तदा नाडी-गणदोषयोः उपशमनं जायते। अपि च -

**रोहिण्यार्द्रामृगेन्द्राणां पुष्यश्रवण-पौष्णभम् । अहिर्बुध्न्यर्क्षमेतेषां नाडीदोषो न विद्यते ।।**

इत्थं मेलापके दोषं परिहारञ्च सम्यक् अवलोक्य विवाहार्थमादेशः प्रदेयः।।। इति दिक् ।।

---

24. न वर्णवर्गो न गणो न योनिः द्विर्द्वादशे नैव षडष्टके वा ।
 ताराविरुद्धे नव पञ्चमे वा राशीशमैत्री शुभदो विवाहः।।

25. मुहूर्तचिन्तामणिग्रन्थस्य विवाहप्रकरणस्य श्लो.सं. २७-२८ इत्यस्य पीयूषधारा टीकायाम्

26. मुहूर्तचिन्तामणिग्रन्थस्य विवाहप्रकरणस्य श्लो.सं. ३० इत्यस्य पीयूषधारा टीकायाम्

# जातकपारिजातोक्तायुर्दायविचारः

**डॉ. ज्योतिप्रसाददाशः**
अध्यापकः, ज्योतिषविभागे
केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी

आयुर्जनिमतां मूलमिति वर्तते[1]। भवति मनुष्यस्सर्वतो बुद्धिमान् प्राणिविशेषः। आबाल्यात् सः कियद्दिनपर्यन्तं अरिष्टप्रभावेन प्रभावितो भवति। ततः परं सः विधात्रा निर्द्धारितायुष्यानुसारं स्वजीवनं यापयति। पञ्चस्वरानामके स्वरशास्त्रीयग्रन्थे प्रजापतिदासस्योक्तिरियम्-

**चतुर्विंशति वर्षाणि यावद् गच्छन्ति जन्मतः।**
**तावद्रिष्टं च निश्चित्य आर्युदायं न चिन्तयेत्[2]।।**

अभिप्रायोऽयं भवति यत् जन्मकालात् चतुर्विंशतिवर्षपर्यन्तं जातस्यायुषः निर्धारणं कर्तुं नैव शक्यते। अस्मिन् काले केवलमरिष्टमेव जातस्य शारीरिकस्वास्थस्य कृते विचार्यते। ततो जातस्यायुर्दायविचारः कर्तव्यः। इत्यत्र प्रजापतिदासस्य वचनम्-

**चतुर्विंशतिवर्षोर्ध्वमायुर्दायं विचिन्तयेत्**
**साधरणाः न जानन्ति कठिनं विषमं ध्रुवम्[3]।।**

अर्थात् चतुर्विंशतिवर्षेभ्यः पूर्वं जातस्यारिष्टविचारः भवेत्, तदूर्ध्वमायुर्दायविचारः कर्तव्यः। आयुर्दायश्रवणेन अस्माकं मनसि साधारणतः आयुषः विषयिणी भावना समुदेति। तदर्थमस्माकं प्राक्तनाचार्याः आयुसाधनविषये विविधान् शास्त्रोक्तविधीन् प्रतिपादयन्ति। तत्तु होराग्रन्थानामाधारेण ज्ञातुं शक्यते। तत्र प्रमुखतया सन्ति-

१) आयुषः प्रकाराः, २) आयुसाधनविधयः, ३) आयुषः स्पष्टीकरणविधयः, ४) मृत्युसमयनिरूपणम्, ५) विभिन्नरोगवशात् आयुनिर्णयः ६) विभिन्नघात-प्रतिघातवशात् मृत्युयोगाः, ७) मरणानन्तरं गतिज्ञानम्।

**निसर्गायुस्तथा पिण्डायुविचारः-**

नैसर्गिकरूपेण ग्रहाणाम् आयुषः वर्षसंख्याः सूर्यादिक्रमेण यथा- सूर्यस्य २० वर्षाणि। चन्द्रस्य १ वर्षम्। मङ्गलस्य २ वर्षम्। बुधस्य ९ वर्षाणि । गुरोः १८ वर्षाणि । शुक्रस्य २० वर्षाणि । शनैश्चरस्य ५० वर्षाणि सन्ति।[4]

---

1. जातकालङ्कारः आयुर्दायाध्यायः श्लो.सं. १
2. पञ्चस्वराः १/९
3. पञ्चस्वराः २/९
4. जातकपारिजातः आयुर्दायाध्यायः श्लो.सं. २

**इदानीं ग्रहाणां पिण्डायुर्वर्षमानं यथा-**

**नवेन्दवो बाणयमाः शरक्ष्मा दिवाकराः पञ्चभुवः कुपक्षा ।**

**नखाश्च भास्वत्प्रमुखग्रहाणां पिण्डायुषोऽब्दा निजतुङ्गगानाम्[5] ।।**

अर्थात् सूर्यस्य पिण्डायुसंख्या नवेन्दवः (१९),चन्द्रस्य बाणयमाः (२५), भौमस्य शरक्ष्माः (१५), बुधस्य दिवाकराः (१२), गुरोः पञ्चभुवः (१५), शुक्रस्य कुपक्षाः (२१), शनैश्चरस्य नखाः (२०) वर्षाणि भवन्ति। अत्र लिखिताः पिण्डायुषः वर्षसंख्याः ग्रहाणाम् उच्चराशिगमने एव भवति।

**आयुषः स्पष्टीकरणम्[6]-**

सूत्रं यथा - ग्रहराश्यादितः स्वोच्चराशिं विशोध्यते चेत् तदा उच्चोनग्रहः भवति। तत्फलं यदि षड्राशितो न्यूनं स्यात्तदा द्वादशराशितः शोध्यम्। यदि उच्चोनग्रहस्य फलं षड्राश्यधिकं चेत् पूर्ववदेव तिष्ठति। ततः परम् आगतमानस्य कलात्मकं करणीयम्। ततोऽभीष्टग्रहस्य निसर्गायुर्मानेन, पिण्डायुर्मानेन वा संगुण्य २१६०० संख्याभिः भाज्यते। लब्धं फलं वर्ष-मास-दिन-दण्डादयः भवन्ति। एतस्य ज्ञानम् एकेनोदाहरणेन वयं कुर्मः। तद्यथा-

बुधस्पष्टराश्यादि -१/१४/२९/४९

बुधस्योच्चराश्यादि -५/१५/००/००

(बुधराश्यादितः स्वोच्चराश्यादिमानं शोध्यम् ।

(१/१४/२९/४९) - (५/१५/००/००) = ७/२९/२९/४९

इदमन्तरितं फलं षड्राश्यधिकमस्ति। यदि षड्राशितोऽल्पः स्यात्तदा द्वादशराशितः शोध्यते। आगतान्तरितफलस्य कलात्मकं कार्यम्। आगते फले बुधस्य पिण्डायुः(१२)संख्याभिः गुण्यते। फलं २१६०० संख्यया भाज्यते। फलं बुधस्यायुर्वर्षादि (७/११/२४/०१) भवति। इदं पिण्डायुःप्रमाणं भवति। अनेन प्रकारेण निसर्गायुरपि कर्तुं शक्यते। इत्यत्र विशेषवचनम्। तत्र उच्चराशौ ग्रहाणां ये पूर्णायुष उक्ताः सन्ति, नीचराशौ तदर्धं ह्रसति। अर्थात् नीचराशिगते ग्रहे आयुर्मानम् अर्धं भवति। यथा सूर्यस्योच्चं मेषस्य दशमांशः, तत्र विंशतिवर्षायुः प्राप्तम्। तथैव तुलायां नीचराशिगते सूर्ये तदर्धं नाम दशवर्षात्मकायुःप्रमाणं भवति। उच्च-नीचस्थानातिरिक्ते जातस्यायुषः निर्धारणमनुपातेन भवति। अनुपातः कथं करणीयः तद्यथा- यदि उच्चनीचान्तरेण भगणार्धकलातुल्यं पठितायुषोर्धम् अपचीयते तदा इष्टग्रहोच्चान्तरेण किमिति? लब्धं परमायुप्रमाणात् शोध्यं चेत्तदा इष्टग्रहस्य स्पष्टायुः। (भवतु नाम पिण्डायुः/निसर्गायुर्वा)। मङ्गलं विहाय शत्रुगृहगताः ग्रहाः स्वपरमायुषः त्रिभागं नाशयन्ति। परन्तु शत्रुक्षेत्रगतः भौमः पूर्णायुः प्राप्नोति। शुक्रशनीं वर्जयित्वा अन्ये ग्रहाः अस्तंगताः सन्तः स्वस्य अर्धायुः नाशयन्ति। अर्थात् शुक्र-शनैश्चरौ अस्तंगतौ पूर्णायुप्रदौ भवतः[7]। आयुषः हरणे पापग्रहाणां विशेषता-

१) पापग्रहाः द्वादशभावगताः सन्तः पूर्णम् आयुः नाशयन्ति ।

5. जातकपारिजातः- ५/३

6. जातकपारिजातः- ५/४-६

7. सूर्योच्छिन्नद्युतिषु च दलं प्रोज्झ्य शुक्रार्कपुत्रौ । जातकपारिजातः- ५/६

२) पापग्रहाः एकादशभावगताः सन्तः अर्धम् आयुः नाशयन्ति ।

३) पापग्रहाः दशमभावगताः सन्तः एकतृतीयांशम् आयुः नाशयन्ति ।

४) पापग्रहाः नवमभावगताः सन्तः एकचतुर्थांशम् आयुः नाशयन्ति।

५) पापग्रहाः अष्टमभावगताः सन्तः एकपञ्चमांशम् आयुः नाशयन्ति ।

यस्यां स्थितौ शुभग्रहा अपि आयुषः ह्रासकारकाः भवन्ति, तल्लिख्यते-

१) शुभग्रहाः द्वादशभावगताः अर्द्धायुं नाशयन्ति ।

२) शुभग्रहाः एकादशभावगताः एकचतुर्थांशम् आयुः नाशयन्ति ।

३) शुभग्रहाः दशमभावगताः एकषष्ठांशम् आयुः नाशयन्ति।

४) शुभग्रहाः नवमभावगताः एकाष्टमांशम् आयुः नाशयन्ति।

५) शुभग्रहाः अष्टमभावगताः दशमांशम् आयुः नाशयन्ति ।

६) शुभग्रहाः सप्तमभावगताः द्वादशांशम् आयुः नाशयन्ति।

एकस्थानगताः द्वयधिकग्रहाः स्युस्तदा तेषु यो ग्रहः अधिकः बलवान् तस्यैव आयुर्भागं हि घटते। प्रसङ्गेऽस्मिन् सत्याचार्यस्य मतमिदम्- क्षीणचन्द्रमाः तथा पापयुक्तः बुधः क्रूरग्रहयुतसन्नपि जातकस्यार्धम् आयुः नाशयन्ति। लग्ने पापग्रहाणां स्थितिरपि आयुषः हारकः।

**विविधायुसाधनम्-**

आयुसाधनप्रकारेषु सर्वप्रथमं लग्नायुसाधनमालोचयामः। लग्नायुरित्यस्याभिप्रायोऽयं यत् लग्नस्य आयु-प्रमाणमिति। अर्थात् लग्नमिदं जातकाय कति वर्षात्मकमायुः प्रयच्छति इति। इत्यत्र साधनप्रकारः यथा -

**आयुस्तथैतेषु बलाढ्यलग्ने विहाय राशीन् कृतलिप्तिकेऽत्र ।**
**भक्ते द्विशत्या फलमब्दपूर्वं यत्स्याद्विलग्नायुषि तच्च योज्यम् ।।**
**लग्नराशि समाश्चाब्दास्तन्मासाद्यनुपाततः।**
**लग्नायुर्दायमिच्छन्ति होराशास्त्रविशारदाः[४]।।**

यदि लग्नं बलयुक्तं स्यात्तदा तस्य राशिमानं त्यक्त्वा अंशादिमानं कलात्मकं विधाय शतद्वयेन (२००)भाज्यते। लब्धं वर्षादि भवति। तदेव लग्नायुः इति। तन्वादिद्वादशभावेषु ग्रहस्थित्यनुसारम् आयुषः षड्विध ह्रासस्थितयः तद्यथा -

प्रथमः- लग्ने पापग्रहाणां स्थितिः, द्वितीयः- ग्रहस्य अस्तमनावस्थायाम्, तृतीयः- ग्रहस्य शत्रुराशौ- अवस्थितिः, चतुर्थः-ग्रहस्य नीचराशौ अवस्थितिः, पञ्चमः-ग्रहाणां योगः, षष्ठः -रिःफायमान-नवरन्ध्रकलत्रगानां (१२,११,१०,९,८,७) आयुषः हरणं भवति। षड्विधह्रासविधिं विज्ञाय सूर्यादिग्रहाणां स्पष्टायुर्मानं लग्नायुर्मानं संयोज्यते चेत् जातकस्य स्पष्टायुर्मानं समायाति।

**अंशायुसाधनम् -** अंशायुः इत्यस्य अयमेव अभिप्रायः यत् ग्रहाणां प्राप्तांशवशात् साधितायुः।

४. जातकपारिजातः- ५/१४-१५

अस्मिन् आयुषि राशेः प्रयोजनं न भवति। सूर्य-चन्द्र-लग्नेषु लग्नम् अधिकं बलवत् स्यात्तदा अंशायुषः, सूर्यः अधिकः बलवान् तदा पिण्डायुषः, चन्द्रः अधिकः बलवान् स्यात्तदा निसर्गायुषः ग्रहणं भवति। यदि एतेषु द्वयोर्मध्ये बलसाम्यं स्यात्तदा द्वयोः पृथक् पृथक् आयुषः साधनं कृत्वा आयुषः योगार्धं स्वीकर्तव्यम्। तत्र एवं निरूपयितुं शक्यते यत् -

लग्नं, रविश्च तुल्यबलं स्यात्तदा- (अंशायुः पिण्डायुः)

रवि-चन्द्रौ तुल्यबलिनौ स्यातां तदा- (पिण्डायुः निसर्गायुः)

लग्न-चन्द्रौ तुल्यबलिनौ स्यातां तदा-(अंशायुः निसर्गायुः)

यदि त्रयाणां बलसाम्यता स्यात् तदा त्रयाणाम् अंशायुः, पिण्डायुस्तथा निसर्गायुः मानं स्व-स्व-बलेन संगुण्य त्रयाणां गुणनफलानां योगं विधाय त्रयाणां बलयोगे विभज्य, लब्धमथवा त्रयाणामायुर्योगस्य तृतीयांशं स्वीकर्तव्यम्। परन्तु अंशायुसाधनस्य विधानं लग्नायुसाधनवत् भवति। तत्र विशेषरूपेण राशिसंख्यां त्यक्त्वा अंशादिभिः गणितं भवति।

**रश्मिजायुसाधनम्[9]-**

रश्मिजनितायुः भवति ग्रहस्य उच्चादिस्थानगतायुः। निजोच्चस्थानगतेषु सूर्यादिग्रहेषु दशादि-संख्यकाः रश्मयः सन्ति। एताः संख्याः नैसर्गिकरूपेण पठिताः सन्ति। तर्हि सूर्यादिग्रहाणां संख्याः यथा- सूर्यस्य-१०, चन्द्रस्य-९, भौमस्य-५, बुधस्य -५, गुरोः -७, शुक्रस्य-८, शनैश्चरस्य - ५, ।

ग्रहाः उच्चांशगताः सन्तः रश्मिवन्तः भवन्ति। नीचगताः ग्रहाः रश्मिरहिताः भवन्तिः। तत्र साधनप्रकारः-

ग्रहः स्वोच्चोनः क्रियते। अर्थात् (ग्रहराश्यादिः - उच्चराश्यादिः)। फलं यदि षड्राशितो न्यूनं स्यात्तदा १२ संख्यातः शोध्यते। फलस्य कलात्मकं मानम् अभीष्टग्रहस्य नैसर्गिकरश्मिमानेन संगुण्य भचक्रकलिकाभिः (२१,६००)भाज्यते। फलम् अभीष्टग्रहस्य रश्मिजायुः।

**इत्यत्र विशेषवचनम्** - ग्रहः स्वराशौ, स्वमित्रगृहे, अधिमित्रगृहे, वक्रगतौ वा भवेत्तदा रश्मिजायुः द्विगुणितं भवति। वक्रगतेरवसाने प्राप्तायुषः अष्टमांशहीनः भवति। शत्रुराशौ प्राप्तरश्मिजायुषः द्वादशांशमितः भवति । शुक्रं शनैश्चरञ्च त्यक्त्वा अस्तङ्गते ग्रहे प्राप्तरश्मिजायुषः अर्धं ह्रसति।

**चक्रायुविचारः-**

रव्यादिसप्तग्रहैस्तारकांशानां भुक्तावशेषाः ये, तान् त्यक्त्वा भोग्यांशैः साधितायुः चक्रायुरिति। सूर्यादिसप्तग्रहैः पृथक् पृथक् भुक्तस्य नक्षत्रस्य ये भागाः अवशिष्टाः तेभ्यः अनुपातेन आगतायुः संयोज्यते तदा जातकस्य चक्रायुः भवति। तत्र अनुपातः- **यदि नक्षत्रमानैः(भभोगैः) पठितायुः, तदा भोग्य-घटिकाभिः किमिति?** सर्वेषाम् आयुः पृथक् पृथक् भवति। तत्र नैसर्गिकरूपेण सूर्यादिग्रहाणां कालः, चक्रायुवर्षाणि यथा- सूर्यस्य- ५,चन्द्रस्य -२१, भौमस्य -७, बुधस्य -९, गुरोः-१०, शुक्रस्य- १६ , शनेः- ४ वर्षाणि भवन्ति।

---

९. जातकपारिजातः- ५/१२-१३

**दशायुविचारः[10]-**

सूर्यादिग्रहाणां दशानुसारम् आगतायुः दशायुरिति। सूर्यादयः ग्रहाः पृथक् पृथक् येषु नक्षत्रेषु भवेयुस्तेषां भोग्यघटीभ्यः अनुपातवशात् जायमानं वर्षाद्यं यत्तेषां दशाजनितमायुः (दशायुः) इति। पराशराद्याचार्याः दशायुषः अपरनाम नक्षत्रायुरिति व्यवह्रियन्ते। तत्र कृतिकादि-नवनक्षत्रणां प्रथमावृत्तिः। उत्तराफाल्गुनी-प्रभृति-नवनक्षत्राणां द्वितीयावृतिः। उत्तराषाढादि-नवर्क्षाणां तृतीयावृत्तिः। इत्यत्र सूर्यादिग्रहाः दशाधिपतयः भवन्ति। उदाहरणरूपेण चिन्तयामस्तदा-कृतिकायां जन्म स्यात्तदा सूर्यस्य दशा, रोहिण्यां चन्द्रस्य इत्यादि क्रमेण। तेषां सूर्यादिग्रहाणां दशावर्षप्रमाणानि यथा- सूर्यस्य -६, चन्द्रस्य-१०, मङ्गलस्य-७, राहोः-१८, बृहस्पतेः-१६, शनेः-१९, बुधस्य -१७, केतोः-७, शुक्रस्य-२०। उपरिलिखिताः अङ्कास्तेषां दशावर्षाणि वा दशायुः। परन्तु ग्रहः यदि नीचनक्षेत्रगतः स्यात्तदा तस्यार्धं ह्रसति। यथा- सूर्यस्य -३, चन्द्रस्य-५, मङ्गलस्य-३.५ , राहोः-९, बृहस्पतेः-८, शनेः-९.५, बुधस्य -८.५, केतोः-३.५, शुक्रस्य-१० वर्षायुः।

विविधायुः साधनात्परमेव आयुषः अधिकारिणः के? इत्यस्मिन् विषये उच्यते। ये धर्ममार्गगताः, द्विजदेवभक्ताः, पथ्यभोजनरताः, जितेन्द्रियाः, मानवधैर्ययुक्ताः, सत्कुलशीलनिरताः जनाः उपर्युक्तायुषः भोगिनः भवन्ति। उक्तं च -

**ये धर्ममार्गनिरताः द्विजदेवभक्ता ये पथ्यभोजनरताः विजितेन्द्रियाश्च।**
**ये मानवा दधति सत्कुलशीलसीमास्तेषामिदं कथितमायुरुदारधीभिः।।[11]**

तर्हि के जनाः उपर्युक्तायुः न प्राप्स्यन्ति इति जिज्ञासायां उच्यते- यः लोभी, पापी, चौरः, देवब्रह्मणनिन्दकः, शास्त्रद्रोही, मांसादिभक्षकः, इत्यादि विविधकुकर्मरतानां तेषाम् अकालमरणं भवति। एतादृशविचारस्य वैज्ञानिकं कारणं भवति- दुष्कर्मनिरतानां जनानां शरीरास्वस्थवशात् तत्प्रतिकूलं श्वासोच्छ्वासाः निःसरन्ति। तदनुसारेण तस्य कालोऽपि परिणमति। तेनैव कारणेन शताब्दमायुरपि केनचित् ३० वर्षैः, केनचित् ४० वर्षैः स्वप्राणानुसारेण प्राप्यत इति ।

ज्योतिषशास्त्रे समेषां जीवानां परमायुषः प्रमाणं विवेचितमस्ति। तेषु केषाञ्चन जीवानां परमायुषः प्रमाणम् अत्रोपस्थाप्यते। तद्यथा-

**गृध्रोलूकशुकध्वाङ्क्षसर्पाणां च सहस्रकम् । श्येनवानरभल्लूकमण्डूकानां शतत्रयम् ।।**
**पञ्चाशदुत्तरशतं राक्षसानां प्रकीर्तितम्। नराणां कुञ्जराणां च विंशोत्तरशतं विदुः ।।**
**द्वात्रिंशदायुरश्वानां पञ्चविंशत् खरोष्ट्रयोः। वृषमाहिषयोश्चैव चतुर्विंशतिवत्सराः ।।**
**विंशत्यायुर्मयूराणां छागादीनां च षोडशः। हंसस्य पञ्चनवकं द्वादशाब्दाः पिकाः शुकाः ।।**
**तद्वत्पारावतानां च कुक्कुटस्याष्टवत्सराः। बुद्बुदानामण्डजानां सप्तसंख्याः समाः स्मृताः।।[12]**

अर्थात् गृध्र-उल्लूक-काक-सर्पाणां सहस्रवत्सरायुः। श्येन-वानर-भल्लूक-मण्डूकानां

10. जातकपारिजातः- ५/२७
11. जातकपारिजातः- ५/३५
12. जातकपारिजातः- ४०-४४

शतत्रयम्। राक्षसानां पञ्चाशदुत्तर-एकशतम्। नराणां, कुञ्जराणाञ्च विंशोत्तरशतवर्षाणि। हयानां द्वात्रिंशत्। खरोष्ट्रयोः पञ्चविंशति वर्षाणि। मयूराणां परमायुः विंशति वर्षाणि। छागलादीनां षोडशवर्षाणि। हंसस्य चतुर्दश वर्षाणि। पिकानां, कपोतानां, शुकानां च द्वादश वर्षायुः। कुक्कुटानाम् अष्टवर्षायुः। बुद्बुदानां सप्तवर्षायुषः भवन्ति। इत्थं विविधप्राणिनां परमायुः।

अरिष्टदशाविचारे जीव-देह-मृत्यसंज्ञाः तथा निर्याणसमयज्ञानम् ।

अरिष्टदशा नाम अरिष्टप्रदग्रहाणां दशा। जातकः स्वजन्मकालानुरोधेन यस्य ग्रहस्य अरिष्टप्रभावेन प्रभावितो भवति, यदा तस्य दशाकालः समायाति तदा जातस्य जनस्य कृते महान् कष्टप्रदः भवति । त्रिकोणेषु यदि एकस्मिन् भावे दुर्बलग्रहः तिष्ठति, सः पापग्रहः शुभग्रहेण दृष्टः युक्तश्च न स्यात्तदा, तस्य पापग्रहस्य दशान्ते जातकस्य मरणं भवति। राशिसन्धिगतग्रहदशायां जातकः रोगी भवति। यः ग्रहः राशेः त्रिंशत्तमं भागमनुक्रान्तः भवति, तस्य ग्रहस्य दशाकाले जातस्य मृतिर्भवति। लग्नात्षष्ठाष्टमगताः पापग्रहाः स्वराशिगताः स्युस्तदा, स्वान्तर्दशायां ते नृणां मरणप्रदाः भवन्ति। यस्य ग्रहस्य दशायां जन्म भवतु नाम, तस्मात् ग्रहात् यदि भौमस्य दशा पञ्चमे स्यात्, गुरोः दशा षष्ठे, शनेश्चतुर्थे, राहोः पञ्चमे भवति चेत् जातकस्य कृते मृत्युप्रदा भवति। नीचङ्गतग्रहस्य तृतीयादशा, शत्रुगृहगतग्रहस्य पञ्चमदशा, सूर्येण साकं अस्तङ्गतग्रहस्य अष्टमी दशा मृत्युप्रदा भवति। इदानीं मारकग्रहाणां विविधावस्थानस्य चर्चां कुर्मः। तत्र मारकग्रहाः नाम छिद्रग्रहाः (लग्नात् अष्टमभावाधिपतिः)। अष्टमेशः अष्टमे स्यात्, अष्टमभावस्योपरि अष्टमेशस्य दृष्टिः स्यात्। खरेश्वरः अष्टमाधिपतिना युक्तः स्यात्। **खरेश्वरस्यार्थो भवति यत्- जन्मलग्ने यस्य द्रेष्काणः, तस्मात् द्वाविंशद्रेष्काणः खरसंज्ञकः। तस्याधिपतिः खराधिपतिः।** सः खराधिपतिः अधिशत्रुराशिगतः स्यात्तदा तस्य ग्रहस्य दशान्तर्दशायां जातस्य मृत्युः निश्चितरूपेण भवति।

**जीवदेहमृत्युसंज्ञाविचारः**[13]-

अस्य पदस्य अयमर्थो भवति यत्,जायमानस्य जातकस्य मरणसम्बन्धिताः विषयाः। तत्र विचारक्रमः - लग्नराश्यादिमानं पञ्चभिः(५)संगुण्य स्पष्टगुलिकराश्यादिमानेन संयोज्यते तदा प्राणिनां **जीवाख्यं** प्राणस्फुटं स्यादिति। ततः चन्द्रस्य स्फुटमानम्(राश्यादिकं) अष्टसंख्याभिः संगुण्य, मान्दिसहितं (गुलिक) कार्यम्। तदा यत्फलं लभ्यते तदेव **देहसंज्ञकम्**। ततः गुलिकस्य स्फुटरास्यादिमानं सप्तभिः(७) संगुण्य स्पष्टसूर्यस्य राश्यंशादिमानेन योज्यते तदा फलं **मृत्युसंज्ञकं** भवति। तत्रैव विचारो वर्तते यत् -

**तस्मात् जीवकलेवरैक्यविपुले जातश्चिरं जीवति ।**[14]

अर्थात् जीव-देह- मृत्युसंज्ञाः साधनस्य प्रयोजनं भवति, तत्र मृत्युतः जीवदेहयोः योगः यदि अधिकः (मृत्यु > (जीव + देह ) स्यात्तदा जातकः प्राणी वा दीर्घायुः भवति। यदि मृत्युतः जीवदेहयोः

13. जातकपारिजातः- ५/५७
14. जातकपारिजातः- ५/५७

योगः न्यूनः स्यात् तदा ( मृत्यः ( जीव + देह ) अल्पायुः भवति ।

**अरिष्टदशाविचारे जीवदेहमृत्यसंज्ञा तथा निर्याणसमयज्ञानम्-**

अरिष्टदशा नाम अरिष्टप्रदग्रहाणां दशा। जातकः स्वजन्मकालानुरोधेन यस्य ग्रहस्य अरिष्टप्रभावेन प्रभावितो भवति, यदा तस्य दशाकालं समायाति तदा जातस्य कृते महत्कष्टप्रदो भवति। त्रिकोणेषु यदि एकस्मिन् अपि भावे दुर्बलग्रहः तिष्ठति, सः पापग्रहः शुभग्रहेण दृष्टः युक्तश्च न स्यात्तदा, तस्य पापग्रहस्य दशान्ते जातकस्य मरणं भवति। राशिसन्धिगतग्रहाणां दशासु जातकः रोगी भवति। यः ग्रहः राशेः त्रिंशत्तमं भागं अनुक्रान्तः भवति, तस्य ग्रहस्य दशाकाले जातस्य मृतिः भवति। लग्नात्षष्ठाष्टमगतः पापग्रहराशिगतः पापग्रहः स्यात्तदा स्व अन्तर्दशायां सः नृणां मरणप्रदो भवति। यस्य ग्रहस्य दशायां जन्म भवतु नाम तस्मात् ग्रहात् भौमस्य दशा पञ्चमे स्यात्, गुरोः दशा षष्ठी, शनिश्चतुर्थी, राहोः पञ्चमी दशा जनस्य कृते मृत्युप्रदा भवति। नीचगतग्रहस्य तृतीया दशा, शत्रुगतग्रहस्य पञ्चमी दशा, सूर्येण साकमस्तंगतस्य ग्रहस्य अष्टमी दशा मृत्युप्रदा भवति। इदानीं मारकग्रहाणां विविधावस्थानां चर्चां कुर्मः। तत्र मारकग्रहाः नाम छिद्रग्रहाः( लग्नात् अष्टमभावाधिपतिः )। अष्टमेशः अष्टमे स्यात्,अष्टमभाव -स्योपरि अष्टमेशस्य दृष्टिः स्यात्। खरेशवरः अष्टमाधिपतिना युक्तः। खरेश्वरस्य अयमर्थो भवति यत् जन्मलग्ने यः द्रेष्काणः, तस्मात् द्वाविंशः द्रेष्काणः खरः। तस्याधिपतिः खराधिपतिः। सः खराधिपतिः अधिशत्रुराशिगतः स्यात्तदा तस्य ग्रहस्य दशान्तर्दशायां जातस्य मृत्युः निश्चितरूपेण भवति।

**निर्याणसमयविचारः-**

निर्याणशब्दस्यायमभिप्रायः यत् मनुष्यादिजीवानां मृत्युकालस्य समयनिरूपणम्। यतोहि जन्मकालस्य मृत्युकालस्य च समयः दैवाधीनः। परन्तु वयं मनुष्याः कथमेतादृशं विशिष्टचिन्तनं कर्त्तुं प्रभवामः? शास्त्रेषु प्रतिपादिताः विषयाः केवलम् मरणासन्नसमयमेव सूचयन्ति। यतोहि जातस्य स्पष्ट-समयनिरूपणमसम्भवम्। अधुना शास्त्रोऽक्तं वचनमेव अनुसरामः। तद्यथा -

**जीवमृत्युतनुयोगराशिगे गोचरेण रविजे धनक्षयः।**
**तत् त्रिकोणगृहगेऽथवा नृणां तन्नवांशकयुते मृतिं वदेत्।।**
**भावत्रिकोणगे मन्दे भावनाशं वदेद्बुधः।**
**भावाधिपतिकोणे वा गुरौ प्राप्ते मृतिर्भवेत्।।**
**लग्नार्कमान्दिस्फुटयोगराशेरधीश्वरे यद्भवनोपगस्तु।**
**तद्राशिसंस्थे पुरुहूतवन्द्ये तत्कोणगे वा मृतिमेति जातः।।**
**स्फुटे विलग्ननाथस्य विशोध्य यमकण्टकम् ।**
**तद्राशिनवभागस्थे जीवे मृत्युर्न संशयः ।।**
**मान्दिस्फुटे भानुसुतं विशोध्य राश्यंशकोणे रविजे मृतिः स्यात् ।**
**धूमादिपञ्चग्रहयोगराशिद्रेष्काणयातेऽर्कसुते च मृत्युः ।।** [15]

अर्थात् पूर्वसाधितानां जीव-मृत्यु-देहानां योगराशौ गोचरे यदा शननैश्चरः आगच्छति तदा

धननाशो भवति। अथवा उक्तयोगराशितः पञ्चमे नवमे वा भावे गते रविजे अथवा तस्मिन् योगे यस्य राशेः नवांशः भवेत् तद्राशियुते रविजे (चारवशात् आगते शनौ) नृणां मृतिं वदेत्। स्पष्टलग्नेशात् यमघण्टकस्य मानं विशोध्य फलं यल्लभ्यते तस्य यः नवांशराशिः तस्मिन् यदा गोचरीयगुरुः भ्रमति तदा मृत्युर्भवति जातकस्य।

पुनः स्पष्टलग्नं तथा गुलिकलग्नं च संयोगं कृत्वा यः राशिः समायति, तस्य यः नवांशः तस्य राशेः संख्यानुसारं मृत्योर्मासं ज्ञायते।[16]

यथा- नवांशे मेषराशिः स्यात्तदा-१मासः, वृषराशिः स्यात्तदा-२ मासाः। एवमेव सिंहराशौ-५ मासा इत्यादयः। लग्नात् द्वाविंशतिद्रेष्काणः मृत्योः कारणं भवति।[17] तस्य द्रेष्काणस्याधिपतिः निर्याणसमयं सूचयति। जन्मसमये यस्मिन् नवांशे गुलिकः स्यात् तस्मात् राशितः सप्तमराशौ यदा बलयुताः शुभग्रहाः स्युस्तदा निश्चितरूपेण सुखमृत्युर्भवति। अष्टमस्थानं प्रति यस्य बलवान् ग्रहस्य दृष्टिः स्यात्तदा तस्य ग्रहस्य यः धातुः तस्य कोपात् जातस्य मृत्युर्भवति। यथा सूर्यस्य दृष्टिः स्यात्तदा अग्निना, चन्द्रदृष्टेः जलेन, भौमदृष्टस्स्यात्तदाऽऽयुधेन, बुधदृष्टेः ज्वरपीडया, गुरुदृष्टेः कफेन, शुक्रदृष्टेः क्षुधया, शनैश्चरस्य दृष्टेः तृषावशात् मृत्युः भवति।

**इदानीं विविधरोगवशात् जातस्य मृत्युयोगान् विचारयामः-**

अष्टमस्थाने यदि निर्बलः सूर्यः, भौमः वा स्यात्, धनभावे पापग्रहाः स्युस्तदा जातस्य मरणं पित्तरोगेण भवति। सूर्यादिग्रहाः स्व-स्व धातुवशात् रोगानुत्पादयन्ति। अपि च तेषाम् उपग्रहवशादपि रोगोत्पत्तयः भवन्ति। अष्टमभावः पापग्रहयुक्तः स्यात् तदा कष्टेन मरणं भवति। शुभग्रहयुक्त अष्टमभावः स्यात्तदा सुखमृत्युर्भवति। तुलायां भौमः, वृषे सूर्यः, शनैश्चरस्य गृहे चन्द्रमाः स्यात्तदा जातस्य मृत्युः विष्ठायां भवति। क्षीणचन्द्रमा अष्टमभावगतः स्यात् तस्योपरि बलवान् शनैश्चरस्य दृष्टिः स्यात्तदा गुह्यस्थाने रोगः, नेत्ररोगः तथा शस्त्रसकाशात् मृत्युः भवति।

लग्नात् अष्टमे, त्रिकोणे वा सूर्य-चन्द्र-शनि-भौमाः स्युस्तदा जातस्य मरणं शूलेन, वज्रेण तथा भित्याघातेन भवति। अष्टमभावे निर्बलः सूर्यः, भौमः वा स्यात्, धनभावे पापग्रहाः स्युस्तदा पित्तरोगेण जातस्य मरणं भवति।

अष्टमभावगतः चन्दमाः अथवा बृहस्पतिः जलचरराशौ स्यात्तदा जातकः क्षयरोगेण पीडितः भवति।

अष्टमस्थाने शुक्रः स्यात् तस्योपरि पापग्रहाणां दृष्टिः स्यात्तदा वातरोगेण, क्षयरोगेण प्रमेह-रोगेण च मृत्युः भवति। पापग्रहैः दृष्टः बुधः सूर्येण साकं स्यात् तदा जातकः त्रिदोषेण प्रभावितो भवति। कदाचित् तद्वशात् तस्य मृत्युरपि भवति। इत्थम् आयुर्दायजन्या अनेके विचाराः सन्ति। तेषु कतिपयविचारा अत्र मया संकलिताः इति दिक्।

---

16. जातकपारिजातः- ५/६४

17. बृहज्जतकस्य नैर्याणिकाध्याये श्लो. सं. ११

# ग्रहणविमर्शः

**डा. विजयलक्ष्मीमहापात्रः**
सहायकाचार्या ज्योतिषविभागे
केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः

आदौ किन्नाम ग्रहणमिति जिज्ञासायां **गृह्यतेऽनेनेति ग्रहणम्**[1] इति व्युत्पत्या यदा ग्राहको ग्राह्यं वस्तु गृह्णाति तदा ग्रहणं स्वीक्रियते, तदा समापततीयं शङ्का यत् कः केन कदा कुत्र च गृह्णाति? ग्राहकेन ग्राह्यं वस्तु तदैव ग्रहीतुं शक्यते, यदा तयोर्योगस्य सम्भावना सम्भवति।

ग्राह्य-ग्राहकयोर्योगं विना न भवति ग्रहणस्य सम्भावना। ग्राह्यग्राहकयोर्योगोऽनयोरन्तराभावे सम्भवति। एतेनानयोरन्तराभावत्वं ग्रहणत्वम्।

ग्रहणं यद्यपि प्राचीनाचार्यैः द्विविधं कथितम्- चन्द्रग्रहणं सूर्यग्रहणञ्चेति, किन्तु तृतीयं भूग्रहणमपि भवति, यस्य च सूर्यग्रहण एवाऽन्तर्भावो भवति। व्यवहारे सामान्यतः सूर्यचन्द्रयोरेव ग्रहणं दृश्यते, किन्तु यदि कोऽपि जनः सूर्यग्रहणकाले चन्द्रलोके स्थितो भवेत्, तदानीं सः भूग्रहणं द्रष्टुमर्हति। तद्यथा सिद्धान्ततत्त्वविवेके-

**किञ्चेन्दुबिम्बस्य रविग्रहे या छाया पृथिव्यां पतितास्ति दृष्टा ।**
**तत्सम्मुखेन्दुस्थितदृग्वशाच्च बुधैः प्रकल्प्यं ग्रहणं पृथिव्याः ।।**
**व्यत्यासतः शीतलभानुवत् स्याच्चन्द्रप्रभैवावरणं हि तत्र ।।**[2]

सूर्यचन्द्रयोर्मध्ये एकसूत्रे यदा भूपिण्ड आगच्छति तदा चन्द्रग्रहणं तथा च सूर्यभुवोर्मध्ये एकसूत्रे यदा चन्द्रः आगच्छति तदा सूर्यग्रहणम्। सूर्य-चन्द्रयोर्मध्ये भूमेरागमनात् तमोमयी सूच्याकारा भूभा (भूच्छाया) सदैव सूर्यबिम्बात् विपरीतदिशि षड्भान्तरे पतति। यदा चन्द्रबिम्बमस्यां छायायामन्तरितो भवति तदा चन्द्रग्रहणं जायते। इयं स्थितिः सदैव पौर्णमास्यामेव सम्भवति।

**ग्रहणे छाद्यछादकनिर्णयः-**

तत्र "**छादयत्यर्कमिन्दुर्विधुं भूमिभा**।"[3] इति ग्रहलाघवोक्त्या चन्द्रग्रहणे चन्द्रः छाद्यः भूभाबिम्बश्च छादको भवति। सूर्यग्रहणे सूर्यबिम्बः छाद्यः चन्द्रबिम्बश्च छादकः भवति। पुराणादिषु सूर्य-चन्द्रयोर्ग्रहणे राहुनामकः दैत्यः छादकरूपेण वर्णितोऽस्ति। यथोक्तं -

**अन्धकारमयो राहुर्मेघखण्डं इव स्थितेः ।**
**आच्छादयति सोमार्कौ पर्वकाले ह्युपस्थिते ।।**"[4]

1. सूर्यसिद्धान्तः चन्द्रग्रहणाधिकारस्य प्रारम्भे पं. कपिलेश्वरशास्त्रीमहोदयः
2. सिद्धान्ततत्वविवेकः - सूर्यग्रहणाधिकारः-श्ला.सं. १/२ + ३
3. ग्रहलाघवम्, चन्द्रग्रहणाधिकारे श्लो. सं. ४
4. बृहत्संहितायाम्-

यस्य सैद्धान्तिकस्वरूपं न सिद्धयति, परन्तु ज्योतिषं खलु वेदाङ्गम्[5]। वेदाङ्गे वेदविरुद्धं किमपि स्वीकार्यं नास्ति।

अत एवात्र सामञ्जस्यं स्थापयित्वा भास्करेण युक्तिपूर्णं समाधानं प्रदत्तम् -

दिग्देशकालावरणादिभेदान्नच्छादको राहुरिति ब्रुवन्ति ।

**यन्मानिनः केवलगोलविद्यास्तत्संहितावेदपुराणवाह्यम्।**

**राहुः कुभामण्डलगः शशाङ्कं शशाङ्कगश्छादयतीनबिम्बम् ।**

**तमोमयः शम्भुवरप्रदानात् सर्वागमानामविरुद्धमेतत् ।।''**[6]

पुनश्च क्रान्तिवृत चन्द्रविमण्डलयोः सम्पातौ राहुकेतू संज्ञकौ ग्रहणकारकौ सैद्धान्तिकदृष्ट्यापि सिद्ध्यतः ।

**ग्रहणकालः –**

तत्र ग्राह्यग्राहकयोः परस्परं संयोगवशात् चन्द्रग्रहणं पूर्णिमायां सूर्यग्रहणम् अमायां च भवति। यथोक्तं -

**दृक्सूत्रसंस्थौ भवतः कुभेन्दू भूपृष्ठदेशेऽपि यतः सदातः ।**

**स्यात् पूर्णिमायां ग्रहणं सुधांशोर्नैवं रवेर्दर्शविरामकाले ।।**[7]

यतोहि चन्द्रग्रहणे भूमिं परितो भ्रमन्तौ सूर्यचन्द्रौ यदा षड्भान्तरितौ भवतस्तदा सूर्यचन्द्रयोर्मध्ये भूमिरागच्छति, येन सूर्यस्य प्रसरणशीलाः प्रकाशकिरणाः सूर्यादल्पपरिमाणेन भूपिण्डेनावरुद्धा आकाशे-ऽन्धकाररूपसूचीक्षेत्रमुत्पादयन्ति, अत्र राहुपदवाचकश्च। एषा तमोरूपा सूची सूर्यात् विरुद्धदिशि षड्भान्तरे दीर्घतया चन्द्रकक्षामतीत्य दूरं याति। तद्यथा -

**भानोर्बिम्बपृथुत्वादपृथुपृथिव्याः प्रभा हि सूच्यग्रा ।**

**दीर्घतया शशिकक्षामतीत्य दूरं बहिर्याता ।।**[8]

स्वगत्या स्वकक्षायां भ्रमन् चन्द्रः भूच्छायायां प्रविष्टः सन् स्वगतप्रकाशाभावात् अदृश्यो भवति। इदमेव चन्द्रग्रहणमिति। इयमुपर्युक्ता स्थितिस्तु पूर्णिमायामेव सम्भवति येन तदा चन्द्रग्रहणं सम्भाव्यते। अत्र चन्द्रः स्वयं भूभायां प्रविश्यादृश्यो भवति। अतश्चन्द्रग्रहणमेककालावच्छेदेन सार्वदर्शिको भवति। सूर्यग्रहणसन्दर्भे यदा सूर्यचन्द्रमसोः स्थितिः भूपृष्ठादेकस्मिन्नेव सूत्रे भवति तदा सूर्यादधस्थस्य चन्द्रपिण्डस्यावरोधवशात् सूर्यग्रहणं सञ्जायते। रविचन्द्रयोः एकसूत्रे स्थितिस्तु दर्शान्ते। तत्र कारणं यत् सूर्यग्रहणे छाद्यछादकयोः सूर्यचन्द्रयोः स्थितिः एकस्मिन् सूत्रे भवति येन सूर्यादधोगतस्य चन्द्रविम्बस्य सूर्याभिमुखोर्ध्वभागः प्रकाशितोऽपरपार्श्वश्चाप्रकाशितो भूत्वाऽदृश्यो भवति। (चन्द्रे स्वगतप्रकाशाभावात्) अस्मादेव कारणादमायां चन्द्रो न दृश्यते। दिवायामस्यां स्थितौ भूपृष्ठोपरि यत्र

5. वेदास्तावद्यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण। शास्त्राद्यस्मात् कालबोधो यतः स्यात् वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ।।

6. सिद्धान्तशिरोमणिः - गोलाध्यायः-ग्रहणवासना-श्लो.सं.-९-१०

7. सि.त.वि. पर्वसम्भवाधिकारः श्लो.सं. ६

8. ४) सिद्धान्तशिरोमणिः- गोलाध्याय - ग्रहणवासना - श्लो. सं. - ५

चन्द्रविम्बः सूर्यबिम्बस्यावरोधको भवति। तत्र ग्रहणं यत्रावरोधको न भवति। तत्र ग्रहणाभावः अत एव सूर्यग्रहणम् एककालावच्छेदेन सार्वदेशिको न भवति।

**ग्रहणसम्भवासम्भवत्वविचारः-**

पूर्वं पूर्णिमायां चन्द्रग्रहणस्य अमायाश्च सूर्यग्रहणस्य स्थितिः निरूपितास्ति। परन्तु अस्माभिः प्रत्यक्षतया दृश्यते यत् प्रत्येकपूर्णिमायाममावस्यायां वा ग्रहणं न सम्भाव्यते। तत्र कारणं चन्द्रग्रहणे सपातसूर्यस्य भुजांशकाः यदा चतुर्दशांशेभ्योऽल्पास्तदैव चन्द्रग्रहणसम्भवः सूर्यग्रहणे च सपातसूर्यस्य भुजांशकाः यदा सप्तांशेभ्योऽल्पास्तदैव सूर्यग्रहणसम्भवः। यथोक्तं भास्करेण -

**सपातसूर्यस्य भुजांशका यदा मनूनकाः स्याद् ग्रहणस्य सम्भवः ।**[9]

एवञ्च -

**पाताढ्यार्कभुजांशका यदि नगोनाः स्युस्तदार्कग्रहः ।।** [10]

यदा ग्राह्यग्राहकविम्बयोर्मानैक्यार्धतुल्यः चन्द्रशरो भवति, तदा तयोः स्पर्शदर्शनाद् ग्रहणस्य सम्भवम्, तदल्पे शरे ग्रहणस्य निश्चिततत्वम्, तदधिके च शरे ग्रहणस्य सम्भवं न भवति। तद्यथा - **सूर्यसिद्धान्ते-**

**तात्कलिकेन्दुविक्षेपं छाद्यच्छादकमानयोः ।**
**योगार्धात् प्रोज्झ्य यच्छेषं तावच्छन्नं तदुच्यते ।।**
**ग्राह्यमानाधिके तस्मिन् सकलं न्यूनमन्यथा ।**
**योगार्धादधिके न स्यात् विक्षेपे ग्राससम्भवः ।।** [11]

**ग्रहणे स्पर्शमोक्षयोर्दिग्व्यवस्था -**

छाद्यछादकयोः गतिवशादेव ग्रहणे स्पर्शमेक्षयोर्दिग्व्यवस्था निरूपिता भवति। तत्र चन्द्रग्रहणे छाद्यः चन्द्रः छादकापेक्षया शीघ्रगतिकः पूर्वाभिमुखं गच्छन् छादके ( भूभाबिम्बे ) प्रविशति येन चन्द्रविम्बस्य पूर्वपाल्याः प्रथमं ग्राहकविम्बे लग्नत्वात् पूर्वतः स्पर्शः एवञ्च ग्रहणं कृत्वा पश्चिमपाल्याः भूभाविम्बस्य पूर्वपाल्या सह संयोगेन पश्चिमतः मोक्षो भवति । यथाह भास्करः -

**पूर्वाभिमुखो गच्छन्कुच्छायान्तर्यतः शशी विशति ।**
**तेन प्राक् प्रग्रहणं पश्चान्मोक्षोऽस्य निःसरतः ।।** [12]

सूर्यग्रहणे तु ग्राह्यस्य सूर्यस्य गत्यापेक्षया ग्राहकचन्द्रस्य शीघ्रगतिः भवति येन स पश्चाद् भागादागत्य सूर्यस्य पश्चिमपाल्या सह स्पर्शं करोति। ग्रहणानन्तरं पूर्वभागाच्च बहिर्गच्छति अतोऽत्र सूर्यग्रहणे पश्चिमतः स्पर्शः पूर्वतश्च मोक्षो भवति। अत्र मेघेनाच्छन्नो रविः यथा क्वचिददृश्यः क्वचिद् दृश्यश्च भवति तथैव भिन्नकक्षात्वेन चन्द्रेणाऽऽच्छादितः सूर्यः स्थानभेदेन क्वचिद् दृश्यः क्वचिददृश्यश्च

9. सि.शि. पर्वसम्भवाधिकारः श्लो.सं.-३
10. सि.शि.पर्वसम्भवाधिकारः श्लो.सं.-४
11. सूर्यसिद्धान्तः चन्द्रग्रहणाधिकारः-श्लो.सं.१०-११
12. सि.शि.ग्रहणवासना-श्लो.सं.-४

भवति। यथोक्तं भास्करेण -

**पश्चाद्भागाज्जलदवदधः संस्थितोऽभ्येत्य चन्द्रो**
**भानोर्बिम्बं स्फुरदसितया छादयत्यात्ममूर्त्या।।**
**पश्चात् स्पर्शो हरिदिशि ततो मुक्तिरस्यात एव**
**क्वापिच्छन्नः क्वचिदपिहितो नैष कक्षान्तरत्वात्।।**[13]

**ग्रहणभेदाः स्थितयश्च -**

सूर्याचन्द्रमसोर्ग्रहणे मुख्यतया खण्डग्राससर्वग्रासखग्रासभेदेन च त्रयो भेदाः भवन्ति। तत्र छाद्यबिम्बमानादल्पे ग्रासमाने खण्डग्रहणम्, तत्र छाद्यबिम्बमानादल्पे ग्रासमाने खण्डग्रहणं ग्राह्यबिम्बतुल्य-ग्रासे सर्वग्रहणम्, छाद्यबिम्बमानादधिके च ग्रासे खग्रासग्रहणं भवति।

परन्तु ग्राह्यिबिम्बापेक्षया ग्राहकिबिम्बस्याल्पत्वात् सूर्यस्य सर्वग्रहणं क्वचिदेव सूर्यिबिम्बस्य परमाल्पत्वे चन्द्रिबिम्बस्य परमाधिक्ये च प्रभवति। अन्यथा सामान्यतया सम्पातस्थाने छाद्यछादकयोः सूर्यचन्द्रयोः केन्द्रैक्यवशात् रवेः वलयग्रहणमेव भवितुमर्हति।

एवमत्र खण्डग्रहणे स्पर्शः मध्यः मोक्षश्चेति तिस्रोऽवस्थाः सर्वग्रहणे खग्रासग्रहणे च स्पर्शः, सम्मीलनं मध्यम् उन्मीलनं मोक्षश्चेति पञ्चावस्थाः भवन्ति। तत्र पर्वान्तकाले मध्यग्रहणं मध्यग्रहणात् स्थित्यर्धकालात् पूर्वं स्पर्शः, मध्यग्रहणादेव स्थित्यर्धकालानन्तरं मोक्षस्तथा च विमर्दार्धतुल्यकालपूर्वं पश्चाच्च क्रमेण सम्मीलनोन्मीलने भवेतामिति। यथोक्तं सूर्यसिद्धान्ते -

**स्फुटतिथ्यावसाने तु मध्यग्रहणमादिशेत् ।**
**स्थित्यर्धनाडिकाहीने स्पर्शो मोक्षस्तु संयुते ।।**
**तद्वदेव विमर्दार्धनाडिकाहीन-संयुते ।**
**निमीलनोन्मोलनाख्ये भवेतां सकलग्रहे ।।**[14]

**ग्रहणयोर्दृश्यादृश्यत्वविचारः -**

**नादेश्योङ्गुलाल्पो रवीन्द्वोः** [15] इति ग्रहलाघवोक्त्या रविन्द्रोर्ग्रहणोऽङ्गुलाल्पो ग्रासो नादेश्य इति। सैद्धान्तिकदृष्ट्या मध्यममानेन द्वादशाङ्गुलचन्द्रबिम्बस्याङ्गुलमिति प्रत्यक्षतया दृश्यते। परन्तु सूर्यग्रहणे तीक्ष्णतावशात् कलात्रयमङ्गुलमितोऽपि ग्रासो नग्नचक्षुषा नावलोक्यते। सम्प्रति सूक्ष्मयन्त्राणां सहाय्येनाङ्गुलाल्पमपि ग्रहणं जनैरवलोकयितुं शक्यते। अतः सूक्ष्मतया विचार्यैव आदेशः करणीयः। अत्र भूभाचन्द्रयोः असितसितयोः वर्णद्वयसंयोगेन अर्धाल्पग्रस्तश्चन्द्रः धूम्रः अर्धग्रस्तः कृष्णः सर्वग्रस्तश्च पिङ्गलो भवति। परन्तु सूर्यः सदा अर्धाल्पादिग्रासेषु कृष्ण एव भवति । यथा गणेशः -

**धूम्रः कृष्णः पिङ्गलोऽल्पार्धसर्वग्रस्तश्चन्द्रोऽर्कस्तु कृष्णः सदैव ।।**[16]

13. सि.शि.ग्रहणवासना - श्लो.सं.-१
14. सूर्यसिद्धान्ते चन्द्रग्रहणाधिकारः श्लो.सं. १६-१७
15. ग्रहलाघवम्- सूर्यग्रहाणाधिकारः श्लो. सं. ६
16. ग्रहलाघवम्- सूर्यग्रहाणाधिकारः श्लो. सं. ६

ग्रहणस्य धार्मिकदृष्ट्या महत्फलम् इति वर्णितं लोकहिताय। अस्मिन् प्रसङ्गे कथयति भास्करः -

**बहुफलं जपदानहुतादिके स्मृतिपुराणविदः प्रवदन्ति हि ।**
**सदुपयोगि जने सचमत्कृति ग्रहणमिन्द्विनयोः कथयाम्यतः ।।** [17]

ग्रहणकाले करणीयकर्माणि -

ग्रहणकाले किं करणीयं इति प्रश्ने उच्यते यत्-

**स्नानं स्यादुपरागादौ मध्ये होमसुरार्चने। सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने ।।**
**अकुर्वाणस्तु नास्तिक्यात् पङ्के गौरिव सीदति।**
**स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने। सन्ध्यारात्र्योर्न कर्त्तव्यं श्राद्धं खलु विचक्षणैः ।।**

ग्रहणजातदोषशान्ति -

ग्रहणकाले यदि जातकस्य जन्म भवेत्तदा शान्तिः करणीया । तद्यथा बृ.पा.हो.शा.

**रवीन्द्वोः ग्रहणे जातो दारिद्र्यक्लेशरोगवान् ।**
**म्रियतेऽपि ततः शान्तिमाचरेद्धितकामुकः ।।** [18]

शान्तिविधानं तु बृहत्पाराशरे लिखितमस्ति यत् -

**समभूमौ शुचौ देशे गोमयेनोपलिप्य च ।**
**सूर्येन्द्वोस्तमसश्चापि प्रतिमां तत्र विन्यसेत् ।।**
**सूर्यग्रहे रविप्रीतिकरं रक्ताक्षतं तथा ।**
**रक्तचन्दनरक्तस्त्रग्-वस्त्राणि च समर्पयेत् ।।**
**चान्द्रग्रहे शशिप्रीतिकराणि सितगन्धयुक् ।**
**सितपुष्प-सितस्त्रग्वासांसि दद्याद् विचक्षणः ।।**
**कृष्णानि गन्धपुष्पस्त्रग् वस्त्राणि तमसेऽर्पयेत् ।**
**नक्षत्रेशाय च पुनः श्वेतं सर्वं निवेदयेत् ।।**[19]

**एवमेव -**

**कर्मणोऽन्ते यथाशक्ति दद्याद् विप्राय दक्षिणाम् ।**
**एवं ग्रहणजातानां शुभदा शान्तिरीरिता ।।** [20]

---

17. सिद्धन्तशिरोमणिः चन्द्रग्रहणाधिकारः श्लो.सं. १
18. बृ.पा.हो.शा.-ग्रहणजातदोषशान्त्यध्यायः-श्लो.सं.१
19. बृ.पा.हो.शा.-तत्रैव-.-श्लो.सं.४,५,६,७
20. बृ.पा.हो.शा.-तत्रैव-.-श्लो.सं.१२

# ग्रहकक्षा-विमर्शः

**डा. उमेशकुमारपाण्डेयः**
सहायकाचार्यः (सं.), ज्योतिषविभागे
केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ-परिसरः

ग्रहस्य ग्रहाणां वा कक्षा ग्रहकक्षा इति निरुक्तिः। अर्थात् ग्रहस्य परिभ्रमणमार्गः इत्यर्थः। भचक्रे स्थितः ग्रहः यं मार्गम् अवलम्ब्य मध्यमगत्या राशिचक्रस्य भोगं करोति सो मार्ग एव तस्य ग्रहस्य कक्षा इति उच्यते।

आचार्यभास्करः सिद्धान्तशिरोमणौ निर्दिशति-

**सृष्ट्वा भचक्रं कमलोद्भवेन ग्रहैः सहैतद् भगाणादिसंस्थैः**
**शश्वदभ्रमे विश्वसृजा नियुक्तं तदन्ततारे च तथा ध्रुवत्वे।**
**ततोऽपराशाभिमुखं भपञ्जरे सखेचरे शीघ्रतरे भ्रमत्यपि।**
**तदल्पगत्येन्द्रदिशं नभश्चराश्चरन्ति नीचोच्चतरात्मवर्त्मसु।।**[1]

भास्कराचार्योक्तेन अनेन श्लोकेन स्पष्टो भवति यत् सर्वे ग्रहाः ऊर्ध्वाधस्थाः स्व-स्वमार्गे पूर्वाभिमुख्या गत्या अश्विन्यादेः बिन्दोः रेवत्यन्तबिन्दुपर्यन्तं निरन्तरं परिभ्रमन्ति। ग्रहाणामेते परिभ्रमणमार्गा एव तत्तदग्रहस्य कक्षा भवन्ति।[2] एतेषां ग्रहाणां कक्षाः केन क्रमेण ऊर्ध्वाधस्थाः सन्ति इत्यस्मिन् विषये स्वरूपस्य मतभेदः दृश्यते।

1. प्राचीनाः ज्योतिर्विदः भूकेन्द्राभिप्रायिकं क्रमं मन्वते। तेषां मतानुसारं सर्वेषां ग्रहाणां मध्ये पृथ्वी केन्द्ररूपेण स्थिता वर्तते।
2. आधुनिकाः खगोलविदस्तु सूर्यकेन्द्राभिप्रायिकं क्रमं मन्यन्ते तदनुसारं सर्वेषां ग्रहाणां ग्रहकक्षाणां मध्ये सूर्यः केन्द्ररूपेणास्तीति। प्राचीनां ज्योतिर्विदुषामाचार्याणां मतानुसारं पृथिव्युपरिभागे क्रमशः चन्द्रः, बुधः, शुक्रः, सूर्यः, भौमः, गुरु, शनिः इत्यादीनां ग्रहाणां कक्षा सन्तीति।

यथा सूर्यसिद्धान्ते उल्लिखितं वर्तते-

**मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्दवः**
**परिभ्रमन्त्यधोऽधस्थाः सिद्धा विद्याधरा घनाः।।**[3]

ऊर्ध्वतः अधः क्रमेण शनिः गुरुः भौमः, सूर्यः, शुक्रः, चन्द्रः च एते परिभ्रमन्ति। ततः अधः सिद्धाः विद्याधराः ततश्च अधः घना अर्थात् मेघाः तिष्ठन्ति।

आचार्य ब्रह्मगुप्तोऽपि निर्दशति।[4]

---

1. सिद्धान्तशिरोमणिः मध्यमा. कालमानाध्याये श्लो. सं. १३-१४
2. सिद्धान्तशिरोमणिः गो. अ. श्लो.सं. ११
3. सूर्यसिद्धान्ते भूगोलाध्याये श्लो.सं. ३१
4. ब्रह्मस्फुटसिद्धान्ते श्लो.११

**शशिबुधसितार्क कुजाः गुरु शनि कक्षावेष्टितोभक्षान्तः।**

अत्रापि[5]-

**कक्षायां क्रमशो दिनेशतनयाज्ज्योतिर्भचक्राश्रिताः।**
**छायासूनुगुरुक्षमाजदिनकृच्छुक्रेन्दुपुत्रेन्दवः।।**

इत्येते तथा च आचार्यलल्लश्रीपतिवराहमिहिरादयः भूकेन्द्राभिप्रायिकग्रहकक्षाम् अधिकृत्य ग्रहगणनामकुर्वन्तः अर्वाचीना खगोलविदः सूर्यकेन्द्राभिप्रायिकं ग्रहकक्षाक्रमं मन्यते। तदनुसारं सूर्यस्योपरि क्रमशः बुधः, शुक्रः, भूः, चन्द्रः, भौमः, गुरुः, शनिः इत्येषां कक्षाः सन्ति।

एतेषां खगोलविदां मतानुसारं सूर्यस्य प्राकृतिकेन आकर्षणबलेन आकृष्टाः पृथ्वी सहिता सर्वे ग्रहाः परिभ्रमन्ति। तस्मात् सूर्यकेन्द्राभिप्रायिकः ग्रहकक्षाक्रम एव समीचीनः स्यात्, परन्तु आधुनिकेषु ज्योतिर्विद्वत्सु आर्यभट्टः सर्वादौ पृथिव्याः गतिशीलतायाः सिद्धान्तं प्रतिपादयन्नपि भूकेन्द्राभिप्रायिकं क्रममेव स्वीकरोत्। यथा[6]-

**मानमद्यः शनैश्चर-गुरु-कुज, अर्क-शुक्र-बुध-चन्द्रस्तेषां भूमिर्वेदिभूता।**

अत्र एतत् ज्ञातव्यं यत् कक्षाक्रमः भूकेन्द्रितः स्वीक्रियते अथवा सूर्यकेन्द्रितः ग्रहगणनायां अन्तरस्तु न भवति यद्यपि भूकेन्द्रिते कक्षक्रमे मते सति ग्रहगणना सरला भवति।

आधुनिककालस्य महान् ज्योतिर्विद् तथा च गणितज्ञः महामहोपाध्याय आचार्य-सुधाकरद्विवेदी द्वयोः मतम्-भूकेन्द्रिक-सूर्यकेन्द्रिकयोः कक्षाक्रमयोः मध्ये सामञ्जस्यं स्थापयन् धराभ्रमाख्ये ग्रन्थे अलिखत् यत्-

**सर्वे भ्रमन्ति रविकेन्द्रगतासु खेटाः कक्षासु तर्हि धरणीभ्रमणं किं स्यात्।**
**प्राचीनवर्य रविकेन्द्रस्य कक्षिकायां सर्वग्रहेषु नियमोऽत्र समोऽस्ति येन।।**[7]

ग्रहकक्षाणां परिधिनां योजनात्मकं मानं सममेव-

अधुना ग्रहाणां कक्षापरिधिनां मानं ज्ञास्यामः। अस्य ज्ञानार्थम् आदौ ग्रहाणां गतिविषयकं ज्ञानमावश्यकं भवति। अतः तदेवादौ पश्यामः यथा कश्चन ग्रहः स्वकक्षायां पूर्वाभिमुखं गच्छन् स्वकक्षां पूरयति तदैकः तस्य भगणो जायते। एवञ्चेत् यदि ग्रहकल्पभगणैः खकक्षामानं तदा एकेन तद्ग्रहभगणेन किम्[8]-

इत्येपातेन $\dfrac{\text{ख कक्षा} \times 1}{\text{कल्पसावनदिनानि}}$

अत्र हारभाज्ययोः स्थिरत्वात् (समानत्वात्) ग्रहाणां योजनात्मिका गतिः समाना एव भविष्यति।

अतः एव भास्कराचार्येणापि कथितम्-

5. जातकपारिजते ग्रहस्वरूपगुणभेदाध्याये श्लो. सं. २७-२८
6. आर्यभट्टीयम् कालक्रियापादः श्लो.सं. १५
7. धराभ्रमः श्लो. सं. २१
8. सिद्धान्तशिरोमाणिः कक्षाध्याये श्लो.सं. ३-४

**समागतिस्तु योजनैर्नभःसदां सदा भवेत्।**
**कलादिकल्पनावशान्मृदुद्रुता च सा स्मृता।।**[9]

योजनात्मिकाः गतिः कलामानेषु परिवर्तनं कर्तुं निम्नलिखितः प्रकारो वर्तते। तद्यथा-

**भुक्तियोजनजा संख्या सेन्दोर्भ्रमणसंगुणा।**
**स्वकक्षाप्ता तु सा तस्य तिथ्याप्ता गतिलिप्तिकाः।।**

ग्रहाणां भुक्तियोजनजा या गतिः अर्थात् योजनसम्बन्धिता या संख्या क्रियया प्राप्ता सेन्दोर्भ्रमणं संगुणा अर्थात् सा संख्या चन्द्रकक्षामानेन संगुण्य स्वकक्षाप्ता स्व-स्व ग्रहकक्षामानेन भाजयेत्। या लब्धिः सा तु पुनः तिथ्याप्ता अर्थात् पंचदशर्भिभजने भागफलं गतिर्लिप्तिका अर्थात् तस्य ग्रहस्य गतिकलाः भवति।

अस्याशयः यत् - गतियोजनसं. x चन्द्रकक्षा योजनानि

ग्रहस्वकक्षायोजनानि

= भागफलं = भागफलं ग्रहगतिकला स्यात्।

15

सर्वे ग्रहाः स्वकक्षासु 3600 अंशात्मकं द्वादशराश्यात्मकं चलन्ति। ग्रहकक्षायां 3600 अंशानां कला 21600 प्राप्यन्ते तदा ग्रहगतियोजनैः किम् ? तद्यथा-

21600 x गति योजन =

ग्रहकक्षायोजनानि

= ग्रहगतिकलायोजनं स्यात्।

खकक्षा अथवा आकाशीय कक्षाप्रमाणविषयेऽपि-

**कल्पोक्तचन्द्रभगणाः गुणिता शशिकक्षया।**
**आकाशकक्षा सा ज्ञेया करव्याप्तिस्तथा रवेः।।**[10]

वास्तविकरूपेण खकक्षामानं काठिन्येनापि ज्ञातुं सम्भवम्। यतो हि केनापि प्रकारेण यन्त्रेण वा वेधक्रियया आकाशकक्षायाः ज्ञानं न प्राप्तुं शक्नुमः। अत एवाचार्येण ग्रहाः कल्पे यावन्ति योजनानि चलन्ति तावन्ति योजनानि एव आकाशस्य परिधियोजनमानं कल्पितम्। ग्रहयोजनात्मिका गतिः कल्पसावनदिनं - खकक्षायोजनमानं, प्रत्येकग्रहः स्वकक्षायोजनानि भ्रमणेन एकं भगणं पूरयति। कल्पसावनदिने ग्रहस्य कल्पभगणाः अतो ग्रह कल्पभ्रगणाः x ग्रहकक्षा- स्वकक्षानां प्रभावं सूर्यांशपुरुषेण ग्रहस्थाने सर्वाधिकगतिकः चन्द्रग्रहं स्वीकृत्य खकक्षा चन्द्रकक्षा x चन्द्रकल्पभगणाः इत्युपद्यते।
अधुना योजनात्मिकाः ग्रहकक्षाः उच्यन्ते-

**खत्रयाब्धिद्विदहनाः कक्षा तु हिमदीधितेः।**

---

9. सिद्धान्तशिरोमणिः मध्यमाधिकारः प्रत्यब्दशुध्याध्यायः श्लो. सं. २६
10. सूर्यसिद्धान्तः भूगोलाध्याये श्लो.सं. ८१

**ज्ञशीघ्रस्याङ्कखद्वित्रिकृतशून्येन्दवस्तथा।।**
**शुक्रशीघ्रस्य सप्ताग्निरसाब्धिरसषड्-यमाः।**
**ततोऽर्कबुधशुक्राणां खखार्थैकसुरार्णवाः।।**
**कुजस्याप्यङ्कशून्याङ्कषड्वेदैकभुजङ्गमाः।**
**चन्द्रोच्चस्य कृताष्टाब्धिवसुद्वित्र्यष्टवह्नयः।।**
**कृतर्तुमुनिपञ्चाद्रिगुणेन्दुविषया गुरोः।**
**स्वर्भानोर्वेदतर्काष्टद्विशैलार्थखकुञ्जराः।।**
**पञ्चबाणाक्षिनागर्तुरसाद्र्यर्काः शनेस्ततः।**
**भानां खखखशून्याङ्कवसुरन्ध्रशराश्विनः।।**[11]

अर्थात् चन्द्रस्य योजनात्मकं कक्षा प्रमाणं- चतुःसहस्राधिकं द्वात्रिंशल्लक्षं (324000) भवति।

बुधशीघ्रोच्चस्य कक्षामानं दशलक्षं त्रिचत्वारिंशत्सहस्रं नवोत्तरद्विशतं (10,43209) भवति।

शुक्रशीघ्रस्य-षड्विंशतिलक्षं चतुःषष्टिसहस्रं सप्तत्रिंशदधिकं षट्शतं च भवति - (2664637)।

खेः शुक्रस्य बुधस्य च योजनात्मकं कक्षामानं समानं भवति। तत्तु- त्रिचत्वारिंशल्लक्षं एकात्रिंशत्सहस्रं पञ्चशतञ्च (43,31,500)।

भौमस्य योजनात्मकं कक्षामानम् एकाशीतिलक्षं षट्चत्वाशित्सहस्रं नवोत्तरनवशतम्- (8146909)।

चन्द्रोच्चस्य-त्रिकोटिः त्रयशीतिलक्षं अष्टाविंशतिसहस्रं चतुरशीतिरधिकमचतुश्शतम्- (3,83,28,484)।

गुरोः पञ्चकोटि त्रयोदशलक्षं पञ्चसप्ततिसहस्रं चतुषष्ट्यधिकं षट्शतम् (51375664)।

शनेः द्वादशकोटिः षट्सप्ततिलक्षं अष्टषष्टिसहस्रं पञ्चपञ्चाशदधिकं द्विशतं (127668255) योजनं कक्षामानं भवति।

ग्रहा नक्षत्राणि च भूमिश्चकाशे स्थापिताः। तेषु ग्रहाः नक्षत्राणि चानियतावस्थानानि तेषां भ्रमणशीलत्वात्। भूमिश्च स्थिराऽतस्तस्या नियतावस्थानमिति भूमावपि भूर्भुवः स्वरादीनां देवासुरमनुष्याणां च यथायोग्यमवस्थानं तदग्रतो व्यक्तं भवेत्।

**ब्रह्माण्डमतेद् सुषिरं तत्रेदं भुर्भूवादिकम्।**
**कटाहद्वितयस्यैव सम्पुटं गोलकाकृतिः।।**
**ब्रह्माण्डमध्ये परिधिर्व्योमकक्षाऽभिधीयते।**
**तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा।।**[12]

विषयेऽस्मिन् सिद्धान्तशिरोमणौ अपि लिखितमस्ति-

**ग्रहस्य चक्रैर्विहृता स्वकक्षा भवेत् स्वकक्षा निजकक्षिकायाम्।**

11. सूर्यसिद्धातः भूगोलाध्याये श्लो.सं. ८५-८९

12. सूर्यसिद्धान्तः भूगोलाध्यायः श्लो. सं. ८६

**ग्रहः स्वकक्षामितयोजनानि भ्रमत्यजस्त्रं परिवर्तमानः।।**[13]

सा खकक्षा यस्य भगणैर्दीयते तस्य-तस्य ग्रहस्य कक्षामितिर्लभ्यते। यतः कल्पे स्वकक्षायां ग्रहो भ्रमन्नजस्त्रं परिवर्तमानः खकक्षामितानि योजनानि पूरयति। अतो ग्रहभगणैर्भक्त्या खकक्षा यल्लभ्यते सा ग्रहकक्षा इति।

******

**गृहस्थाश्रम की विशेषताः-**

**सानन्दं सदनं सुताश्च सुधयः कान्ता न दुर्भाषिणी सन्मित्रं सुधनं स्वयोषितिरतिश्चाज्ञापराः सेवकाः।**
**आतिथ्यं शिवपूजनं प्रतिदिनं मृष्टान्नपानं गृहे साधोः सङ्गमुपासते हि सततं धन्यो गृहस्थाश्रमः।।**
**यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः। तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः ।।**
**किं जातैः बहुभिः पुत्रैः शोकसन्तापकारकैः। वरमेकः कुलालम्बी यत्र विश्रायते कुलम्।।**
**पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः ।**
**तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ।।**

13. सिद्धान्तशिरोमणिः मध्यमाधिकारे कक्षाध्याये श्लो.सं. ४

# गृहप्रवेशविचारः

**आनन्दप्रकाशपाठकः**
अतिथि-प्राध्यापकः, ज्यौतिषविभागः
केन्द्रीय-संस्कृत-विश्वविद्यालयः, लखनऊ-परिसरः

**गृहस्थस्य क्रियाः सर्वा न सिद्ध्यन्ति गृहं विना।**
**यतस्तस्माद् गृहारम्भप्रवेशसमयं ब्रुवे ।।** [1]
**परगेहे कृताः सर्वाः श्रौतस्मार्तक्रियादिकाः।**
**निष्फलाः स्युर्यतस्तासां भूमीशः फलमश्नुते।।** [2]

ज्योतिषशास्त्रफलं पुराणगणकैरादेश इत्युच्यते[3] इति भास्कराचार्यवचनेन ज्योतिषशास्त्रं फलादेशशास्त्रमित्युच्यते।वेदाङ्गेषु[4] महनीयस्यास्य ज्योतिषशास्त्रस्य अनेके प्रभागाः आचार्यैः स्वीक्रियन्ते[5]। तेषु प्रभागेषु सिद्धान्त-संहिता-होरेति त्रयः प्रभागाः मुख्याः सन्ति।[6] एषु त्रिषु प्रभागेषु संहितास्कन्धान्तर्गतं वास्तुशास्त्रं महन्महनीयमित्यत्र नास्ति काचित् विप्रतिपत्तिः। ब्रह्मचर्याश्रम-गृहस्थाश्रम-वानप्रस्थाश्रम-संन्यासाश्रमाश्चेति आश्रमचतुष्टयेषु गृहस्थाश्रमो महनीयः[7]। गृहस्थाश्रमेणैव सर्वे आश्रमाः पोषिताः पल्लविताश्च भवन्ति। गृहस्थाश्रमः तदानीमेव सफलो भवति यदा तस्मिन् गेहे गृहणी तिष्ठति। गृहणी विना गृहस्थाश्रमास्य कल्पना एव भवितुं नार्हति। सत्यमेव प्रोक्तं - **न गृहं गृहमित्याहुः गृहणी गृहमुच्यते**[8] इति। परं पत्न्या सह तत्र गेहे वासः केन विधिना सफलो भवेत्तदर्थं प्रवृत्तं वास्तुशास्त्रमस्मान् सर्वविधं शिक्षयति। वास्तुशास्त्रे गृहनिर्माणादारभ्य गृहप्रवेश-गृहप्रतिष्ठा-गृहशान्तिपर्यन्तं सर्वे विषयाः यथास्थलं वर्णिताः भवन्ति।

तत्रादौ गृहनिर्माणात्पूर्वं भूमिपरीक्षणं कर्तव्यम्। तदनु पाषाण-तोयान्तकं भूमिशोधनमेवञ्च शिलास्थापनात्पूर्वं वास्त्वर्चनं कर्तव्यम्। तत्पश्चात् वेशमसुरालयादीनां रचना शुभमुहूर्ते कर्तव्या। तद्यथा-

**आदौ भूमिपरीक्षणं शुभदिने पश्चाच्च वास्त्वर्चनं**
**भूमेः शोधनकं ततोऽपि विधिवत् पाषाणतोयान्तकम् ।।**

---

1. मुहूर्तचिन्तामणिग्रन्थस्य वास्तुप्रकरणस्य पीयूषधाराटीकायाम् आदावेव।
2. बृहद्वास्तुमाला- श्लो.सं. ७
3. **सिद्धान्तशिरोमणिः गोलाध्याये गोलप्रशंसाध्यायः श्लो.सं. ६**
4. वेदास्तावद्यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण। शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ।।
   **सि. शि. मध्यमाधिकारे कालमानाध्याये श्लो.सं. ९**
5. ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं, तत्कात्स्न्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता।।
   स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानास्त्वसौ, होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः।। **बृ.सं. १/९**
6. **बृ.सं. १/९**
7. यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः। तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः।। **मनुस्मृतौ- ३ / ७७**
8. न गृहं गृहमित्याहुः गृहणी गृहमुच्यते। गृहं तु गृहणीहीनमरण्यसदृशं मतम्।। महाभारते, पञ्चतन्त्रेऽपि

**पश्चाद्वेश्मसुरालयादिरचनार्थं पादसंस्थापनं**
**कार्यं लग्नशशांकशाकुनबलैः श्रेष्ठे दिने धीमता ।।**[9]

प्रकृतेऽस्मिन् प्रबन्धे गृहप्रवेशविषये चर्चा भविष्यति। प्रवेशः चतुर्विधः। विवाहानन्तरं पत्न्या सह श्वसुरालये (पतिगेहे) प्रथमः प्रवेशः वधूप्रवेशसंज्ञकः। अयं प्रवेशः प्रथमः प्रवेशः उच्यते। नूतननिर्मिते गेहे विधिपूर्वकं यः प्रवेशो भवति सः द्वितीयः प्रवेशः उच्यते। वास्तुशास्त्रे अस्य प्रवेशविशेषस्य अपूर्वसंज्ञा निर्द्धारिता विद्यते। यात्रावसाने स्वगेहं प्रति याः प्रवेशः भवति तस्य स्वपूर्वसंज्ञा। अयं प्रवेशस्तृतीयः, अग्नि-वायु-मेघ-विद्युदादिभिराहते पुनः संस्कारिते गेहे प्रवेशः चतुर्थः प्रवेशः। एषु चतुर्षु प्रवेशेषु वधूप्रवेशं विहाय त्रिविधानां प्रवेशानां चर्चा वास्तुशास्त्रस्य गृहप्रवेशप्रसङ्गे प्राप्यते। तद्यथा-

**अपूर्वसंज्ञः प्रथमः प्रवेशो यात्रावसाने च स्वपूर्वसंज्ञः।**
**द्वन्द्वाभयश्चाग्निभयादिजातस्त्वेवं प्रवेशस्त्रिविधः प्रदिष्टः।।**[10]

एषु त्रिविधेषु अपूर्व-सपूर्व-द्वन्द्वाभय-प्रवेशेषु अपूर्व-सपूर्व-प्रवेशयोः सुमुहूर्तस्य अपेक्षा भवति।[11] तत्र अपूर्व-सपूर्व-प्रवेशयोः कृते अयन-मास-तिथि-दिवस-लग्नादीनां विस्तरेण चर्चा वास्तुग्रन्थेषु प्राप्यते। गृहप्रवेशमुहूर्तनिर्द्धारणप्रसङ्गे श्रीरामदैवज्ञः-

**सौम्यायने ज्येष्ठतपोन्त्यमाधवे यात्रानिवृतौ नृपतेर्नवे गृहे।**
**स्याद्वेशनं द्वाःस्थमृदुध्रुवोडुभिर्जन्मर्क्षलग्नोपचयोदये स्थिते।।**[12]

गृहप्रवेशप्रकरणस्य अयं श्लोकः महन्महनीयो वर्तते। एकस्मिन् एव श्लोके सर्वेऽपि विषयाः सूत्रे मणिगणा इव राराजन्ते। तत्र गृहप्रवेशः सौम्यायने श्रेयस्करो भवतीति अयनस्य सर्वादौ चिन्तनं कृतम्। सौम्यायनं नाम यदा सूर्यः भूमध्यरेखातः सौम्यदिशि प्रवृतो भवति। अथवा सूर्यः मकरादिषु षट्सु राशिषु संचरति तावत् सौम्यायनं भवति। इत्थं मकरमासादारभ्य मिथुनमासं यावद् गृहप्रवेशः उत्तरायणे प्रशस्तः। सौम्यायनेऽपि तत्र केचन् मासाः अर्थात् ज्येष्ठ-तप(माघ)-अन्त्य(फल्गुन)-माधव(वैशाख)-मासाः गृहीताः। तत्र सौम्यायने सर्वे षड्मासाः नैव गृहीताः अपितु तेषु चत्वारः मासा एव गृहीताः भवन्ति। विषयेऽस्मिन् नारदवचनम्[13]-

**माघफाल्गुनवैशाख ज्येष्ठमासेषु शोभनः।**
**प्रवेशो मध्यमो ज्ञेयः सौम्य(मार्गशीर्षः)कार्तिकमासयोः।।**

**एवमेव महर्षिवशिष्ठोपि वदति-**

**अथ प्रवेशो नवसद्मनश्च सौम्यायने जीवसिते बलाढ्ये।**
**सिते च पक्षे शुभवासरे च वास्त्वर्चनं भूतबलिञ्च कृत्वा।।**[14]

---

9. वास्तुरत्नावली-
10. वास्तुरत्नावली, गृहप्रवेशाध्यायः, ले.जीवनाथदैवज्ञः, सम्पा. श्रीअच्युतानन्दझाः, सन् -१९८१, चौखम्बा अमरभारती प्रकाशनम्, वाराणसी१
11. वास्तुरत्नावली, गृहप्रवेशाध्यायः, ले.जीवनाथदैवज्ञः, सम्पा. श्रीअच्युतानन्दझाः, सन् -१९८१, चौखम्बा अमरभारतीप्रकाशनम्
12. मुहूर्तचिन्तामणिः गृहप्रवेशप्रकरणम्- १३/१
13. नारदसंहिता-वास्तुलक्षणाध्यायः- ३१/२४
14. वशिष्ठसंहिता-३८/ १

तदनु गृहद्वारस्य दिशानुसारं नक्षत्रचिन्तनं कर्तव्यम्। अर्थात् कृतिकानक्षत्रं पूर्वदिशायाः द्वारनक्षत्रमुच्यते। एवमेव रोहिणीतः समारभ्य पूर्वाफल्गुनीनक्षत्रं यावत् प्रदक्षिण-क्रमेण अग्नि-दक्षिण-नैर्ऋत्य-पश्चिम-वायव्य-उत्तर-ईशान-दिशां द्वारनक्षत्राणि उच्यन्ते। इत्थं पुनः उत्तराफल्गुनीतः अग्रे मूलनक्षत्रपर्यन्तं पूर्वादिदिशां प्रदक्षिणक्रमेण द्वारनक्षत्राणि भवन्ति। पुनः पूर्वाषाढां विहाय उत्तराषाढातः अग्रे अश्विनी-नक्षत्रपर्यन्तं पूर्वादिदिशां प्रदक्षिणक्रमेण द्वारनक्षत्राणि भवन्ति। इत्थं द्वारनक्षत्रेषु तद्दिग्द्वारमण्डपेषु प्रवेशः शुभदायको भवति। तदनु निम्नलिखितानां नक्षत्राणां चयनमपि करणीयम्। तद्यथा-

गृहप्रवेशः मृदुसंज्ञक (**मृगान्त्यचित्रामित्रर्क्षं मृदुमैत्रं भृगुस्तथा** नक्षत्रेषु ध्रुवसंज्ञकनक्षत्रेषु च गृहप्रवेशः शुभदायको भवति। परम् अत्र प्रतिपादितं नक्षत्रं पापविद्धं न भवेत्। त्रिविधप्रवेशेषु अयं विचारः कर्तव्यः। तद्यथा-

**क्रूरग्रहाधिष्ठितविद्धिभं च विवर्जनीयं त्रिविधप्रवेशे ।**
**शुक्ले च पक्षे सुतरां प्रवृद्ध्यै कृष्णे च तावत् दशमीञ्च यावत् ।।**[15]

जन्मर्क्षलग्नोपचयोदये स्थिरे लग्ने अर्थात् जन्मरशितः जन्मलग्नद्वा उपचय(३-६-१०-११) लग्नेषु तथा स्थिर (२-५-८) लग्नेषु गृहप्रवेशः शुभदायको भवति। एतदतिरिच्य अन्येऽपि विचाराः अपेक्षिताः भवन्ति। यथा कलशचक्रविचारः। अस्मिन् कलशचक्रविचारप्रसङ्गे सूर्यनक्षत्रात् चन्द्रनक्षत्रं यावत् गणना क्रियते। यस्मिन्नक्षत्रे सूर्यस्तिष्ठति तस्मिन् नक्षत्रे कृते गृहप्रवेशे (तस्मिन्) गेहे अग्निदाहो भवति।

**गृहप्रवेशे कलशवास्तुचक्रम् -**

| स्थानम् | नक्षत्रसंख्या | फलं | शुभाशुभम् |
|---|---|---|---|
| मुखे | सूर्याधिष्ठितनक्षत्रं | अग्निदाहः | अशुभः |
| पूर्वे | २ - ५ | उच्चाटनं | अशुभः |
| याम्ये | ६ - ९ | धनलाभः | शुभः |
| पश्चिमे | १० - १३ | धनलाभः | शुभः |
| सौम्ये | १४ - १७ | क्लेशः | अशुभः |
| उदरे | १८ - २१ | नाशः | अशुभः |
| तले | २२ - २४ | स्थिरता | शुभः |
| कण्ठे | २५ - २७ | चिरायुः | शुभः |



इत्थं मुहूर्तस्य सम्यक् शोधनं कृत्वा गृहप्रवेशः कर्तव्यः। गृहारम्भस्य कृत यः मुहूतः ानधाारतः कथितो वा विद्यते तस्मिन् मुहूर्ते गृहप्रवेशोऽपि कर्तव्य इति वचनं प्राप्यते। तद्यथा-

**गृहारम्भोदिते मासे धिष्ण्ये वारे विशेद् गृहम् ।**

15. वृहद्वास्तुमाला गृहप्रवेशप्रकरणम्- श्लो.सं. ७

**विशेत् सौम्यायने हर्म्यं तृणागारे तु सर्वदा ।।**[16]

**गृहप्रवेशस्य कृते कालस्यापि निर्देशः प्राप्यते।** तद्यथा-

**वधूप्रवेशो न दिवा प्रशस्तः राजप्रवेशो न निशि प्रशस्तः।**
**दिवा च रात्रौ च गृहप्रवेशः सत्कीर्तिदस्स्यात् त्रिविधः प्रवेशः।।**[17]

अत्र वधूप्रवेशः दिवायान्तथा राजप्रवेशः रात्रौ नैव प्रशस्तो भवति। परं गृहप्रवेशः दिवायां रात्रौ च सर्वदा प्रशस्तो भवति। परं महर्षिवशिष्ठमतानुसारं गृहप्रवेशः दिवायामेव अतिशयेन प्रशस्तो भवति। रात्रौ गृहप्रवेशस्य कृते चन्द्रार्कयोः बलाबलमन्विष्य मुहूर्तस्य निर्धारणं करणीयम्। एवञ्च बुधवासरस्य रात्रौ तथा पूर्वतिथेः रात्रौ गृहप्रवेशः नैव करणीयः। तद्यथा महर्षिवशिष्ठः-

**दिवा प्रवेशः शुभदः सुपुत्र-पुत्राभिवृद्धिं निशि भास्करेन्दोः।**
**बलेन मध्येन्दुजवासरस्य रात्रिं विना पूर्वतिथेश्च रात्रिम्।।**[18]

इत्थं सम्यक् कालशुद्धिमवगम्य उपयुक्ते काले वितानपुष्पश्रुतिघोषयुक्ते गृहे शिल्पज्ञ-दैवज्ञ-विधिज्ञ-पौरान् भूमि-हिरण्य-वस्त्रदिभिः समर्च्य वास्तुपुरुषं सम्यक् प्रपूज्य पूर्णनिर्मिते गेहे प्रवेशः कर्तव्यः। यथोक्तमपि-

**एवं सुलग्ने स्वगृहं प्रविश्य वितानपुष्पश्रुतिघोषयुक्तः।**
**शिल्पज्ञ-दैवज्ञ-विधिज्ञ-पौरान्-राजार्चयेद् भूमिहिरण्यवस्त्रैः।।**[19]

अस्मिन् प्रसङ्गे इदमपि अवगन्तव्यं यत् कदा गृहप्रवेशः नैव कर्तव्यः इति। तदर्थमुक्तं यथा-

**अकपाटमनाच्छन्नमदत्तबलिभोजनम्।**
**गृहं न प्रविशेदेवं विपदामाकरं हि तत्।।**[20]

अर्थात् यस्मिन् नवे गेहे कपाटाभावो भवेत्, गृहं छादितं नैव भवेत्, बलि-ब्राहण-भोजनादिकं नैव भवेत्, तस्मिन् गेहे उपयुक्ते कालेऽपि प्रवेशः नैव कर्तव्यः। तद्गृहं विपदामाकरं (विपत्तिवासस्थलं) भवतीति दिक्।

---

16. वृहद्वास्तुमाला गृहप्रवेशप्रकरणम्- श्लो.सं. ६
17. बृहद्वास्तुमाला गृहप्रवेशप्रकरणम् - श्लो.सं. २
18. वशिष्ठसंहिता- गृहप्रवेशाध्यायः ३८/४
19. वृहद्वास्तुमाला गृहप्रवेशप्रकरणम्- श्लो.सं. २१
20. नारदसंहिता- गृहप्रवेशाध्यायः ३२/२०

# माङ्गलिकयोगविमर्शः

**डा. वरुणकुमारझाः**
सहायकप्राचार्यः. (अं.का.)
स्नातकोत्तरज्यौतिषविभागः
क.सिं.सं.विश्वविद्यालयः, दरभङ्गा-८४६००८
बिहारप्रान्तः

माङ्गलिकयोगस्य विचारो वरकन्ययोर्विवाहात्पूर्वं भवति। अनेन विवाहोत्तरं दाम्पत्यजीवनं सुखमयन्नवेति विचार्य्यते। विवाहस्तु सहधर्मचारिणीसंयोगः पाणिग्रहणसंस्कारविशेषो वोच्यते। तत्र प्रधानतया षोडश संस्काराः सन्ति किन्त्वेषु विवाहसंस्कारः सर्वेषां मूले वर्त्तते। यतो हि कृतदारस्यैव गृहस्थस्याग्निहोत्रादिकर्मस्वाधिकारस्तथा चान्नादिभिरितराश्रमाणां भरणपोषणं देवपित्रादीनां यज्ञादिभिस्तोषणमृणत्रयमोचनादिकञ्चापि गृहस्थ एव कर्त्तुं प्रभवति। विवाहादेव सृष्टिर्भवति, सृष्ट्यैव जगत्त्रयं प्रवर्त्तते, तस्मादेव चतुर्वर्गफलप्राप्तिरतः परिणयः सर्वथा शुभः प्रतिपादितो महर्षिभिः। गृहस्थाश्रमस्य श्रेष्ठत्वमप्येभिरेव कारणैः विद्यते। यथोक्तं मनुना -

**वेदानधीत्य वेदो वा वेदं वापि यथाक्रमम्।**
**अविलुप्तब्रह्मचर्यो गृहस्थाश्रममाविशेत्॥**
**गुरुणानुमतः स्नात्वा समावृत्तो यथाविधिः।**
**उद्वहेत् द्विजो भार्यां सवर्णां लक्षणान्विताम्॥**
**यथा वायुं समाश्रित्य वर्त्तन्ते सर्वजन्तवः।**
**तथा गृहस्थमाश्रित्य वर्त्तन्ते सर्व आश्रमाः॥**
**यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्।**
**गृहस्थेनैव धार्यन्ते तस्माज्ज्येष्ठाश्रमो गृही॥**[1]

महर्षिगौतमेन - **तेषां गृहस्थो योनिरप्रजनत्वादितरेषाम्।**[2]
**एकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्य गार्हस्थ्यस्य।**[3]

बृहस्पतिना - **विवाहादेव सत्सृष्टिः सत्सृष्ट्यैव जगत् त्रयम्।**
**चतुर्वर्गफलप्राप्तिस्तस्मात्परिणयः शुभः॥**[4]

गोविन्ददैवज्ञेनापि -किञ्चाग्निहोत्रादीनां नित्यानां कर्मणां करणे पत्नीं विना नाधिकार इति स्मृतौ स्मरणात्। नापुत्रस्य लोकोऽस्ति इति श्रुत्या पुत्राभावे परलोके दुर्गतिबोधनाच्च।[5]

---

१. मनुस्मृतौ, ३ / २, ४, ७७, ७८.
२. गौतमधर्मसूत्रे, १ / ३ / ३.
३. तत्रैव, ३ / ३ / ३५.
४. बृहद्दैवज्ञरञ्जने, ७१ / १३.
५. मुहूर्तचिन्तामणौ, विवाहप्रकरणस्य प्रारम्भे, पीयूषधारायाम्।

कश्यपेनापि - **अथातः सम्प्रवक्ष्यामि गृहस्थाश्रममुत्तमम्।**
**य आधारोऽन्याश्रमाणां भूतानां प्राणिनान्तथा॥**
**ऋणत्रयच्छेदकारि धर्मकामार्थसिद्धिदम्।**
**एतत्सर्वं स्थितं स्त्रीषु शीलवृत्तान्वितासु च॥**

अयं विवाहः येन केनापि वरेण सह कन्यायाः यद्वा यया कयापि कन्यया सह वरस्य न भवितुमर्हति। एतद्विषयकविचारो धर्मशास्त्रे ज्योतिषे च विस्तरेणोक्तः। तत्र स्व-स्ववर्णे असमानगोत्रे मातुः सन्ताने पञ्चमादूर्ध्वं पितुः सन्ताने च सप्तमादूर्ध्वं विवाहः शुभो भवति। व्यवहारात्तु पितृतः सप्तम्यपि कन्योद्वाह्या। अत एव मातृतः पञ्चमीं त्यक्त्वा पितृतः सप्तमीं भजेत् इति वचनमपि सङ्गच्छते व्यवहारे बलवत्त्वस्योक्तत्वात्। एतत्परिप्रेक्ष्ये विजातीय-देशान्तरादिविवाहोऽपि न समुचित इत्यप्यवगन्तव्यम्। यथोक्तं मनुना -

**सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते।**
**समानोदकभावस्तु जन्मनाम्नोरवेदने॥**

याज्ञवल्क्येन - **अविलुप्त ब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्।**
**अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम्॥**
**अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम्।**
**पञ्चमात् सप्तमादूर्ध्वं मातृतः पितृतस्तथा॥**[6]

अथ प्रकृतमनुसरामः - यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते इति मुहुर्तचिन्तामणेः विवाहप्रकरणस्य प्रारम्भे पीयूषधाराटीकान्तर्गतवचनेन विवाहार्थं वरवध्वोरानुकूल्यमत्यावश्यकमिति प्रतीयते। अतो विवाहात्पूर्वमायुरारोग्यमैश्वर्यसौभाग्यसन्ततिप्रभृतिविषयविचारप्रसङ्गे ज्योतिषशास्त्रोक्त-दिशा माङ्गलिकयोगविचारोऽत्र प्रस्तूयते।

अयं माङ्गलिकयोगो वरकन्ययोः लग्नचन्द्राभ्यां प्रथम-चतुर्थ-सप्तम-अष्टम-द्वादशान्यतम-स्थानगते कुजे भवति। यथोक्तम् -

**लग्ने व्यये च पाताले जामित्रे चाष्टमे कुजे।**
**कन्या भर्तृविनाशाय भर्त्ता पत्नीविनाशकृत्॥**[7]

पुनश्च - **लग्ने व्यये च पाताले यामित्रे चाष्टमे कुजे।**
**कन्या भर्तृविनाशाय भर्तुः कन्या विनश्यति॥**
**लग्नादिन्दोर्यदा भौमः सप्ताष्टान्त्याद्यतूर्यगः।**
**पत्युर्भार्या विनाशाय भार्यायाः पतिनाशनम्॥**[8]

होरामकरन्दे गुणाकरेण -

६. याज्ञवल्क्यस्मृतौ, १ / ३ / ५२-५३.
७. ज्यौतिषचन्द्रिका, मुहूर्तप्रकरणे, श्लो॰ २२२.
८. बृहदैवज्ञरञ्जने, ७१ / २०६-२०७.

**त्यक्ता धवेनोष्णकरेऽस्तसंस्थे बाल्येऽपि भौमे विधवा प्रदिष्टा।**
**पापग्रहालोकनवर्गयाते कन्यैव बन्ध्या भवतीति सूतौ॥**
**वैधव्यं क्रूरखेटैर्मदनगृहगतैर्मिश्रितैः स्यात्पुनर्भूः**
**पापैस्तैर्वीर्ययुक्तैर्भवति परिहृता प्रेयसा सौम्यदृष्टे।**
**अन्योन्यांशस्थयोश्च क्षितिसुतसितयोर्बन्धकी योषिदुक्ता**
**चन्द्रोर्वीसुनूशुक्रा यदि मदनगृहे प्रेयसोऽनुज्ञया सा॥**
**लग्ने व्यये च पाताले जामित्रे चाष्टमे कुजे।**
**कन्या भर्तृविनाशाय भर्त्ता कन्या विनाशकः॥**[9]

अपि च - **लग्ने व्यये च पाताले जामित्रे चाष्टमे कुजः।**
**कन्याजन्माङ्गचक्रस्थो भर्त्तारं नाशयेत्तथा॥**
**भर्तृजन्माङ्गचक्रस्थः स हि कन्या विनाशकः।**[10]

एवमेव यथोक्तस्थानगतमङ्गल(पाप)ग्रहफलमशुभदमुक्तं बृहत्पराशरहोराशास्त्र-बृहज्जातक-जातकपारिजात-जातकतत्त्व-सारावली-बृहद्दैवज्ञरञ्जन-भावप्रकाशादि-प्रसिद्ध-ग्रन्थेषु भावफलादि निरूपणावसरे। तत्र क्वचित्पतिविनाशरूपं क्वचित्पत्नी-नाशरूपं क्वचिदङ्गवैकल्यरूपं क्वचिदग्निभयरूपं क्वचित्पतनरूपं क्वचिद्बन्धनादिरूपं क्वचिद्रोगाक्रान्तरूपं क्वचिद्धनाभावरूपं क्वचिच्चरित्रदोषरूपं क्वचिद्बन्ध्या-काकबन्ध्या(मृतवत्सा)-सन्तानाभावरूपादिफलानि प्रतिपादितानि सन्ति। तेषु दम्पत्योरन्यतरस्य नाशः सर्वाधिककष्टप्रदो भवतीति विचिन्त्य आचार्यैः पूर्वोक्तव्यवस्था निर्द्धारिता।

यथोक्तविचारो लग्नचन्द्राभ्यां क्रियत इति तु पूर्वमेव प्रतिपादितं किन्तु यत्र ताभ्यां न स्पष्टतया निर्णयो जायते तत्र सप्तमभावकारकग्रह-शुक्रेणापि निर्णयः क्रियते। इयमाचार्याणां परम्परा विद्यते।

पूर्वोक्तमाङ्गलिकयोगो यदि कुण्डल्यां तिष्ठति वरस्य कन्याया वा तदा विवाहो न कार्य इति निष्कर्षरूपेण कथितुं शक्यते। परमत्र शास्त्रेऽस्य योगस्य बहूनि अपवादवचनान्यपि समुपलभ्यन्ते। तदनुसारं यदि कन्याया वैधव्यकरयोगो वरस्यापि कुण्डल्यां भवेत्तदा पत्नीनाशः स्यादुभयत्र तथाविधयोगे शुभं भवेत्। तथाहि -

**स्त्रीणां वैधव्यदो योगः पुंसां जन्मनि चेद्भवेत्।**
**तदा पत्नीविनाशः स्यादुभयोश्चेच्छुभं भवेत्॥**[11]
**उभयोर्जन्मकुण्डल्यामुक्तेषु भवनेषु चेत्।**
**कुजोऽथवा शनिस्तर्हि भौमदोषो न जायते॥**
**उभयोरेककुण्डल्यामुक्तेषु भवनेषु वै।**

---

९. मुहूर्तचिन्तामणौ, विवाहप्रकरणे, श्लो॰ ७ पीयूषधारायाम्।

१०. व्यावहारिकज्यौतिषसर्वस्वे, मुहूर्तस्कन्धे, श्लो॰ १०१, १०२ पूर्वार्द्धे।

११. बृहत्पराशरहोराशास्त्रे, स्त्रीजातकाध्याये, श्लो॰ ५०.

**कश्चित्पापो भवेत्सोऽपि जायते परदोषहृत्॥[12]**
**भौमतुल्यो यदा भौमः पापो वा तादृशो भवेत्।**
**उद्वाहः शुभदः प्रोक्तश्चिरायुः पुत्रपौत्रदः॥[13]**
**जामित्रे च यदा सौरिर्लग्ने वा हिबुकेऽपि वा।**
**अष्टमे द्वादशे वाऽपि भौमदोषविनाशकृत्॥[14]**

एभ्यः प्रामाणिकवचनेभ्यस्तावदिदं स्पष्टं यदुभयोर्वरकन्ययोर्यथोक्तस्थानेषु कुजो वाऽन्यपापग्रहा भवेयुस्तदा भौमदोषनाशः स्यात्तथा च विवाहः शुभदो भवति।

भौमदोषस्यान्यान्यपि वचनान्युपलभ्यन्ते। तत्र बृहद्दैवज्ञरञ्जनमतेन -

**सप्तमस्थो यदा भौमो गुरुमात्रनिरीक्षितः।**
**तदा तु सर्वसौख्यं स्यान्मङ्गलीदोषनाशकृत्॥**
**लग्नाद्विधोर्वा यदि जन्मकाले शुभग्रहो वा मदनाधिपश्च।**
**द्यूनस्थितो हन्त्यनपत्यदोषं वैधव्यदोषं च विषाङ्गनाख्यम्॥**
**केन्द्रे कोणे शुभाख्यश्चेत् त्रिषडायेऽप्यसद्ग्रहाः।**
**तदा भौमस्य दोषो न मदने मदपस्तथा॥[15]**

अर्थात् गुरुदृष्टः सप्तमस्थः कुजः मङ्गलीदोषहारको भवेत्। लग्नाच्चन्द्राद्वा शुभग्रहः सप्तमेशो वा सप्तमस्थः दोषहारको भवति। एवञ्च केन्द्रत्रिकोणगताः शुभग्रहाः त्रिषडायस्थाः पापग्रहास्तथा च सप्तमगः सप्तमेशः भौमदोषनाशकाः भवन्ति। पुनश्च - लग्नेन्दुभ्यां समान् पापग्रहानुक्तगृहस्थितान्।

**बलाबलयुतांश्चापि ज्ञात्वा तान् गणयेत्सुधीः॥**
**तत्र कन्याकुण्डलीस्थपापेभ्यो बलिनोऽधिकाः।**
**पापा वरस्य कुण्डल्यां सदैवाभिमताः स्मृताः॥**
**कन्यायाः पापखेटेभ्यश्चेदल्पा अपि दुर्बलाः।**
**वरस्य तद्गताः पापा विवाहं नानुमोदयेत्॥**
**लग्नाच्चन्द्राद्वापि जन्मकाले द्यूनस्थितः शुभः।**
**सप्तमेशोऽथवा हन्ति दोषं वैधव्यजं सदा॥**
**केन्द्रे कोणे शुभाः सर्वे त्रिषडायेऽप्यसद्ग्रहाः।**
**मदने सप्तमेशश्च भौमदोषविनाशकाः॥[16]**

अर्थात् पूर्वोक्तदोषस्थान् गतान् बलाबलयुतान् पापान् वरवध्वोः कुण्डलीभ्यां गणयेत्। तत्र

---

१२. व्यावहारिकज्यौतिषसर्वस्वे, मुहूर्तस्कन्धे, श्लो॰ १०२ उत्तरार्द्धे, १०३, १०४ पूर्वार्द्धे।

१३. बृहद्दैवज्ञरञ्जने, ७१ / २१८.

१४. ज्यौतिषचन्द्रिका, मुहूर्त्तप्रकरणे, श्लो॰ २२३.

१५. ७१ / २०९, २१६-२१७.

१६. व्यावहारिकज्यौतिषसर्वस्वे, मुहूर्तस्कन्धे, श्लो॰ १०५, १०८ उत्तरार्द्धे, १०९, ११० पूर्वार्द्धे, १११-११२.

कन्याकुण्डलीस्थपापेभ्यो वरकुण्डलीस्थपापा अधिका बलिनश्च भवेयुस्तदा शुभदो विवाहोऽन्यथा विवाहो न शुभदः स्यात्। सप्तमस्थादि फलं पूर्ववत् ज्ञातव्यम्। समानबलस्थितौ शुक्रादपि विचारो विधीयते विद्वद्भिः।

शास्त्रे पतिनाश-स्त्रीनाश-मङ्गलदोष-वैधव्यादिदोषशान्तिं कृत्वा पश्चादायुष्मते वराय कन्याप्रदानव्यवस्थापि प्रतिपादिता विद्यते। यथोक्तं रामाचार्येण -

**जन्मोत्थञ्च विलोक्य बालविधवा योगं विधाय व्रतं**
**सावित्र्या उत पैप्पलं हि सुतया दद्यादिमां वा रहः।**
**सल्लग्नेऽच्युतमूर्त्तिपिप्पलघटैः कृत्वा विवाहं स्फुटं**
**दद्यात्तां चिरजीविनेऽत्र न भवेद्दोषः पुनर्भूभवः॥**[17]

अर्थाज्जन्मकालिकं बालवैधव्ययोगं सम्यग्विचिन्त्य तत्परिहारः यथाशास्त्रं कर्त्तव्यः। तत्र सावित्रीव्रतं पिप्पलव्रतं वा कन्यया कारयित्वा पश्चात्कन्यामिमामेकान्ते शुभलग्ने चिरजीविने वराय यथाविधि दद्यात्। अन्यदपि परिहारस्त्रिधा निरुप्यते - एकान्ते स्वर्णनिर्मितया शिरोभुजाद्यवयवयुतया विष्णुप्रतिमया अश्वत्थेन कुम्भेन वा कन्याया यथाविधि विवाहं कारयित्वा तदनु सा कन्या चिरजीविने वराय दद्यात्। अत्र न पुनर्विवाहदोषो भवतीति।

## षोडशोपचारपूजाविधिः-

आवाहनाऽऽसने पाद्यमर्घ्यमाचमनीयकम्।
स्नानं वस्त्रोऽपवीतञ्च गन्धमाल्यान्यनुक्रमात्।।
धूपं दीपञ्च नैवेद्यं ताम्बूलञ्च प्रदक्षिणा।
पुष्पाञ्जलिरिति प्रोक्ता उपचारास्तु षोडशः।।
फलेन सफलावाप्ति साङ्गता दक्षिणार्पणात्।

## पञ्चोपचारपूजाप्रकारः-

गन्धं पुष्पञ्च धूपञ्च दीपो नैवेद्यमेव च।
पञ्चोपचाराः कथिताः देवानां प्रीतिहेतवे।।

## अथ सन्तानप्रदगोपालमत्रः-

देवकीसुत ! गोविन्द! वासुदेव! जगत्पते!।
देहि मे तनयं कृष्ण! त्वामहं शरणं गतः।।

इति मन्त्रस्य सपादलक्षसंख्यकजपस्तिलपायसघृतैस्तद्दशांशहोमस्तद्दशांशतर्पणं तद्दशांशमार्जनं तद्दशांशब्राह्मणभोजनञ्च सन्ततिप्रदम्।।

१७. मुहूर्तचिन्तामणौ, विवाहप्रकरणे, श्लो॰ ७.

# संहिताग्रन्थेषु मञ्जीरनामको ग्रन्थः अन्यतमः

**अंकितकुमारमिश्रः**
शोधच्छात्रः
केन्द्रीय-संस्कृत-विश्वविद्यालयः
लखनऊ-परिसरः

ज्योतिषशास्त्रमिदं मानवजीवनस्य दर्पणत्वेन प्रतिष्ठितं वर्तते। इदं वेदस्य नेत्रभूतं[1] सिद्धान्त-संहिताहोराभेदेन त्रिस्कन्धात्मकं ज्योतिषशास्त्रं वर्तते। यथोक्तमपि-

**ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम्।**
**तत्कात्स्न्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता।।**
**स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ।**
**होरान्येष्वङ्ग विनिश्चयश्च कथितः स्कन्धस्तृतीयोपरः।।** [2]

स्पष्टमेव यत् ग्रहगणिताधारितं यद्भागं तस्य प्रतिपादनं सिद्धान्तस्कन्धे भवति। एवमेव यत्र जनसम्बद्धानां विविधाङ्गानां यथा- अरिष्टयोग-राजयोगादि-प्रभृतीनां निरूपणं भवति सः होरास्कन्धः। परं यत्र समग्रस्य ज्योतिषशास्त्रस्य वर्णनं समष्टिरूपेण भवति सः संहितास्कन्धः। तदेव बृहत्संहितायाः भट्टोत्पलटीकायां आचार्यो वदति-

**गणितं जातकं शाखा यो वेत्ति द्विजपुङ्गवः।**
**त्रिस्कन्धो विनिर्दिष्टः संहितापारगश्च सः।।**[3]

संहितास्कन्धे विविधविषयाणां समाहारः दृश्यते यथा- प्रवर्षणविचारः, भूकम्पविचारः, उल्कापातादिविचारः। एवमेव अन्येऽपि विषयाः सन्ति। तेषु यद् प्रामुख्यं भजति तद् स्कन्धस्यास्य मुहूर्त्तशाखा। अद्यत्वे जनानां कृते मुहूर्तशास्त्रस्य ज्ञानं महदुपकारकम्। यतोहि जनाः एवमेव यस्मिन् कस्मिन्नपि काले किमपि कार्यं कुर्वन्ति, परं तेषु कार्येषु कानिचन तादृशानि अपि कार्याणि भवन्ति येषां महत्त्वं तेषां जीवने अधिकं भवति। तेषां कार्याणां सम्पादनेन नूनमेव साफल्यं लभेत इति कारणात् मुहूर्त्तानां शुभाशुभस्य ज्ञानपूर्वकं कार्यसम्पादनम् अपेक्षितम् इति। अत एव अद्य संहितास्कन्धे मुहूर्तशास्त्रस्य अन्यतमं ग्रन्थं मञ्जीरमाधारीकृत्य प्रसङ्गेऽस्मिन् किञ्चित् प्रकाश्यते।

सम्प्रतिकाले बहवः मुहूर्तग्रन्थाः उपलब्धाः सन्ति येषामाधारेण मुहूर्त्तानां व्यवहारः समाजे प्रचलति। तेषु प्रमुखानां मुहूर्त्तग्रन्थानां नामानि यथा- मुहूर्त्तचिन्तामणिः, मुहूर्त्तमार्तण्डः, रत्नमाला, मुहूर्त्तगणपत्यादयः। एतेषु मुहूर्त्तग्रन्थेषु विविधमुहूर्त्तानां विषयाणाञ्च वर्णनम् अस्ति। प्रत्येकं मुहूर्त्तग्रन्थस्य

१. शब्दशास्त्रं मुखं ज्योतिषं चक्षुषि श्रोत्रमुक्तं निरुक्तञ्च कल्पः करौ।
या तु शिक्षास्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः।। सिद्धान्तशिरोमणिः मध्यमा. काल. श्लो.सं.

२. बृहत्संहिता १/

३. बृहत्संहितायाः भट्टोत्पलटीकायाम्

दृष्टिः काचिद्भिन्ना वर्तते। परञ्च अद्य उपलब्धनां ग्रन्थानां समष्टिरूपं यत्र कुत्रापि प्राप्यते तदस्ति रामसेवकप्रणीतः मञ्जीर इति नामकः ग्रन्थः।

अयं संहितास्कन्धस्य अन्यतमः ग्रन्थः वर्तते। अत्र सामान्यविषयैस्सह तादृशानां विषयाणामपि वर्णनम् अस्ति, येषां समाहारः प्रायः अन्यत्र एकस्मिन्नपि ग्रन्थे न प्राप्यते। यथा- तिथिवारादिजन्यशुभाऽशुभयोगाः, ग्रहयुद्धवर्णनं तज्जन्यं शुभाऽशुभत्वम्, यात्रादिषु लग्नादीनां निर्धारणम्, सावनचान्द्रक्षयमासादीनां वर्णनं, दग्धादियोगविमर्शः, षोडशसंस्काराः, शपथग्रहणप्रभृतयः मुहूर्त्ताः।

सर्वादौ ग्रन्थस्यास्य परिचयः प्रदास्यते। यतोहि ग्रन्थोऽयं अद्यावधिः जनानां दृष्टिपथे नायातः।

**ग्रन्थस्य परिचयः-**

अयं ग्रन्थः पण्डितदेवीदत्तात्मजेन आचार्यरामसेवकेन 1840 तमेऽब्दे विरचितं वर्तते।[4] परञ्च अद्यावधि अस्य प्रकाशनं केनापि न कृतम्। अत एव अस्य ग्रन्थस्य ज्ञानम् अपि च अस्यान्तर्भूतविषयस्यापि ज्ञानं जनेषु नास्तीति मनसि निधाय अस्य महत्त्वं प्रतिपादयन् प्रमुखविषयान् अत्र उपस्थाप्यते। ग्रन्थेऽस्मिन् प्रायः सर्वविधप्रमुखमुहूर्त्तानां वर्णनम् अस्ति। अपि च ग्रन्थस्यास्य टीकाऽपि आचार्यैः स्वयमेव कृता। तत्र पूर्वाचार्याणां मतं प्रदाय स्वमतमपि आचार्यैः उपस्थापितम्। ग्रन्थस्यास्य विभाजनं प्रकरणरीत्या वर्तते। तेषु प्रमुखप्रकरणानां नामानि अत्र उपस्थाप्यते। तद्यथा-

लग्नप्रकरणम्, गोचरप्रकरणम्, नक्षत्रप्रकरणम्, निर्णयप्रकरणम्, ग्रहप्रकरणम्, षोडशसंस्कार-प्रकरणम्, अग्निहोत्रप्रकरणम्, शकुनप्रकरणम् इत्यादयः। तेषु उपर्युक्तेषु प्रकरणेषु प्रमुखविषयानां वर्णनम् अत्र क्रियते।

कस्यापि ग्रन्थस्यारम्भे तस्य ग्रन्थस्य निर्विघ्नता समाप्त्यर्थं मङ्गलाचरणम् अवश्यं भवेदिति भारतीयशास्त्रपरम्परा। मङ्गलाचरणं नमस्कारात्मकम् आशीर्वादात्मकं वस्तुनिर्देशात्मकमिति भेदेन त्रिविधात्मकं भवति। तेषु त्रिविधात्मकेषु मङ्गलाचरणेषु अत्र आचार्यः नमस्कारात्मकं मङ्गलाचरणं कुर्वन्नस्ति। तद्यथा[5]-

**पूर्णानन्दपरं ब्रह्म निर्विकल्पसमाधिना।**
**अधिगम्यमुदासीनं नमामि जगदीश्वरम्।।**

अत्र मंगलाचरणेऽपि तावत् वैशिष्ट्यम् अस्ति। यतोहि आचार्यः निर्विकल्पकसमाधिना परब्रह्म नमति। समाधिस्तु द्विविधं सविकल्पकं निर्विकल्पकञ्च। योगसूत्रे महर्षिपतञ्जलिना उक्तं यत्[6]-

**तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।**

अर्थात् समाधिना चित्तवृत्तेः निरोधः इति। अत एव आचार्यश्रीमद्रामसेवकः स्वग्रन्थे वदति यत्[7] –

**समोऽहं सर्वभूतेषु न मे द्वेषोऽस्ति न प्रियः।**

४.मञ्जीरग्रन्थे

५. मञ्जीरग्रन्थस्य मङ्गलाचरणम्-श्लो. सं. १

६. पातञ्जलयोगसूत्रम् विभूतिपादः ३

७. गीता ९/२९

- इति गीतावचनात् निर्विकल्पसमाधिना, अखण्डसमाधिना पूर्णदेशकालावच्छेद्यकामरहितं सर्वत्र सदा ते आनन्दमानन्दस्वरूपमानन्दाधिकरणं आनन्देनासीनमीश्वरं निर्विकल्पसमाधिना नमामि। ते स्वग्रन्थादौ परब्रह्मपरमेश्वरं नमस्कुर्वन्ति ।

ग्रन्थेऽस्मिन् विविधानां शुभाऽशुभमूहूर्तानां वर्णनम् अस्ति। तेषु कश्चन प्रमुखानां मुहूर्त्तानां चर्चा अत्र विधास्यते-

आचार्यः मुहूर्त्तानां प्रतिपादनात् प्रागेव लिखति यद् गर्गादिभिः ज्योतिषशास्त्रप्रवर्तकाचार्यैः[8] प्रोक्तं विषयं समाहारे क्षिपामि। अर्थात् आचार्यः स्वपूर्वाचार्याणां मतं संक्षेपेण उपस्थापयिष्यतीति उद्घोषयति। यतोऽहि सारभूतं यद् ज्ञानं तदेव सेवनीयं भवति। चाणक्यनीतौ उक्तमपि वर्तते[9]-

**अनन्तशास्त्रं बहुलाश्चविद्या अल्पश्च कालो बहुविघ्नता च।**
**यद्सारभूतं तदुपासनीयं हंसो यथा क्षीरमिवाम्बुमध्यात्।।**

सर्वादौ ग्रन्थे आचार्यः विवाहे शुभाशुभत्वं प्रतिपादयति। यथा- विवाहे उत्पातविचारः, अयनशूलः, मासशूलः तस्य परिहारश्च,अतिचारे गुरौ त्याज्यानि कर्माणि, सप्तशलाकाचक्रम्, खर्जूरचक्रादयः। अत्र ग्रन्थस्य कांश्चन विशेषभागान् प्रस्तौमि। आचार्यः अतीचारि-गुरु-विषये कथयति यत् [10]-

**चूडाविवाहो वधूनां ग्रहस्य प्रवेशो व्रतं वा प्रतिष्ठासुराणाम्।**
**न राज्याभिषेकोऽग्निहोत्रादियज्ञः शुभं किंचिदन्यद्रवौ दक्षिणस्याम्।।**

अतिचारीगुरुः विवाहादिषु वर्जितो विद्यते। टीकायाम् आचार्यः लिखति यत्- अतीचारविशिष्टो गुरुर्यदि राश्यन्तरं याति पुनः पूर्वराशिं नायाति तदा सोऽब्दो लुप्तसंज्ञः। यौगिकोऽयं शब्दः सकलराशि-भोगाभावेन तद्राशिभागस्य लुप्यमानत्त्वात्। यथा मेषराशौ अतिचारी गुरुर्वृषराशौ गतस्तदा मेषराशौ यावद्गुरुस्तिष्ठति तावन्मङ्गलं न कार्यमिति। तद्यथा-[11]

**अतिचारिवक्रे गुरौ मासमेकं निषिध्यन्ति मङ्गल्यकर्माणि केचित्।**
**न गौडे कलिङ्गे तथा गुर्जराख्ये प्रशस्तो गुरुः सिंहराशौ प्रयातः।।**

अर्थात् अतिचारी सिंहस्थः गुरुः गौडादिदेशे विविधयात्रोद्वाहचूडाव्रतादिशुभकार्येषु अप्रशस्तः भवतीति। एवमेव कुत्र कस्मिन् राशौ अतिचारीगुरुः प्रशस्तः कुत्र च अप्रशस्तः? इत्यस्मिन् विषये ग्रन्थेऽस्मिन् विशदतया प्रतिपादितं वर्तते।

गोचरप्रकरणे आचार्यः ग्रहाणां शुभाशुत्वं कुत्र कस्मिन् राशौ भवतीति वदति। यथा[12]-

**सर्वे लाभगृहे शुभाऽपचये पापग्रहाश्चन्द्रमाः**

---

८. सूर्यः पितामहो व्यासो वशिष्ठोऽत्रिः पराशरः। कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिरा।।
लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः। शौनकोष्टादशश्चेते ज्योतिषश्शास्त्रप्रवर्तकाः।। - इति काश्यपः

९. चाणक्यनीतिदर्पणम्-

१०. मञ्जीरग्रन्थे श्लो.-१७

११. मञ्जीरग्रन्थटीकायां श्लो.१७-१८

१२. मञ्जीरग्रन्थे श्लो.-२३

**जन्मभ्रातृरिपुद्यूनाम्बरगृहे जीवः स्वकोणाधुने।**
**शुक्रः कर्मरिपुद्यूने समगृहे चान्द्रिर्व्ययर्क्षं विना**
**चन्द्रः कोणधने सिते शुभफलः शान्त्या शुभा अन्यथा।।**

अर्थात् एकादशस्थाने सर्वे ग्रहाः शुभाः इत्यर्थः। अपचये इति तृतीयषष्ठैकादशे च क्रूराः शस्ता इत्यर्थः। शनिकुजराहवो दशमे न शुभाः इति बोध्यम्। उपचये पापग्रहा इति केचिदूचुः। तन्मते- जीवो द्वितीयपञ्चमनवमसप्तमे शुभः। शुक्रः षष्ठसप्तमदशमभिन्नस्थाने शुभः चन्द्र इति। नारदः वदति[13]-

**शुक्लपक्षे शुभश्चन्द्रो द्वितीयनवपञ्चमे।**
**षष्ठाष्टमचतुर्थस्थैर्न निषिद्धो गगनेचरै**रिति।

अत्र वेधोऽपि बोध्यः । अत्र वेधवाक्येनैव गोचरो निर्णीतः[14]। अत एव वेधोच्यते[15]-

**रविः शत्रु कर्म (10) त्रि (3) लाभे शुभश्चेन्नविद्धोन्त्यपातालधर्मात्मज(5)स्थैः।**
**द्यूनाद्यारिलाभाम्बरभ्रातृभावे वि स्वात्मजान्त्याष्ट तुर्याङ्क (4,9) संस्थैः।।**
**त्रिशत्रुलाभगाशुभाः कुजार्किराहुकेतवः।**
**व्ययाङ्कपुत्रगैर्नचेद्भवन्ति वेधिताः क्रमात्।।**
**स्व2जल4शत्रु6गजा8य11ख10गोबुधः,**
**सुततृतीयनवाद्यरुणाष्टगैः 5/6/9/11/12 ।**
**मदनधीनवलाभधनेगुरु- 7/5/9/11/2,**
**स्त्रिजलखाष्टविराम 3/4310/8/12 ग्रहस्थितैः।।**

अर्थात् रविः षष्ठे दशमे तृतीयैकादशे च शुभः। द्वादशे चतुर्थे नवमे पंचमे चाऽशुभः। जन्मनि द्वितीये सप्तमे अष्टमे च मध्यमफलदायकः। वेधस्त्वित्थं यदा द्वादशे कश्चिद्ग्रहस्तदा षष्ठस्थः सूर्यो विद्धो भवति। चन्द्रस्तु जन्मनि सप्तमे षष्ठे एकादशे दशमे तृतीये च शुभो तथा द्वितीये पञ्चमे द्वादशेऽष्टमे चतुर्थे नवमे चाऽशुभो भवति। चन्द्रस्य मध्यमफलद्योतकं स्थानं नास्ति। अर्थात् चन्द्रः मध्यमफलदायको न भवति। असौ चन्द्रः शुभः भवति अथवा स्वस्थित्यनुसारम् अशुभः। कुजशनिराहुकेतवः तृतीये एकादशे षष्ठे च शुभाः। द्वादशे पञ्चमे नवमे चाऽशुभाः भवन्ति। जन्मनि द्वितीये चतुर्थे सप्तमे द्वादशे च मध्यमाः। बुधस्तु द्वितीये-चतुर्थे-षष्ठेऽष्टमे दशमैकादशे च शुभस्तथा पंचमे तृतीये नवमे जन्मनि अष्टमे द्वादशे चाशुभो भवति। असौ बुधः सप्तमे मध्यफलदायको भवति। गुरुर्द्वितीये एकादशे नवमे पञ्चमे सप्तमे च शुभफलद्योतकः। द्वादशे अष्टमे दशमे चतुर्थे तृतीये चाऽशुभः। जन्मनि षष्ठे च मध्यमफलदायकः। एतेषां स्थानानां शुभाशुभत्वम् उपरोक्तरीत्या ज्ञातुं शक्यते।

मुहूर्तचिन्तामणौ अयमेव विषयः किञ्चिद् मतान्तरेण प्राप्यते। तदत्र उपास्थाप्यते [16]-

१३. नारदसंहितायाम्

१४. मञ्जीरग्रन्थे श्लो.-२३

१५. मञ्जीरग्रन्थे श्लो. २४-२६

१६. मुहूर्तचिन्तामणौ ग्रहगोचरप्रकरणे श्लो. १-४

**सूर्यो रसान्त्ये खयुगेऽग्निनन्दे शिवाक्षयोर्भौमशनी तमश्च।**
**रसाङ्कयोर्लाभशरे गुणान्त्ये चन्द्रोऽम्बराब्धौ गुणनन्दयोश्च।।**
**लाभाष्टमे चाद्यशरे रसान्त्ये नगद्वये ज्ञो द्विशरेऽब्धिरामे।**
**रसाङ्कयोर्नागविधौ खनागे लाभव्यये देवगुरुः शराब्धौ।।**
**द्व्यन्त्ये नवांशेऽद्विगुणे शिवाहौ शुक्रः कुनागे द्विनगेऽग्निरूपे।**
**वेदाम्बरे पञ्चनिधौ गजेषौ नन्देशयोर्भानुरसे शिवाग्नौ।।**
**क्रमाच्छुभो विद्ध इति ग्रहः स्यात् पितुः सुतस्यात्र न वेधमाहुः।**
**दुष्टोऽपि खेटो विपरीतवेधाच्छुभो द्विकोणे शुभदः सितेऽब्जः।।**

अर्थात् सूर्यः क्रमशः षष्ठे, द्वादशे, दशमे-चतुर्थे, तृतीये-नवमे, एकादशे-पञ्चमे च शुभः विद्धश्च भवति। अर्थात् जन्मनि सूर्यः षष्ठे स्यात्तदा शुभः भवति। द्वादशे शनिं विहाय कोऽपि अन्यः ग्रहः यदि स्यात्तदा सूर्यः विद्धः भवति। अर्थात् अस्याम् अवस्थायां षष्ठस्थः सूर्यः अशुभफलप्रदायकः भविष्यति। एवमेव जन्मकालाद् दशमराशौ सूर्यः शुभदायको भवति। चतुर्थे शनिं विहाय अन्यग्रहैः विद्धः भवति।

भौमः-शनिः-राहुश्चैते ग्रहाः जन्मनि षष्ठराशौ शुभः, नवमे कोऽपि ग्रहः भवति चेत् विद्धः भवति। एवञ्च एकादशस्थः भौमः शुभः पञ्चमस्थेन च विद्धः, तृतीये शुभः द्वादशस्थेन च विद्धः। अत्र शनिः सूर्यस्य वेधः न करोति इति शास्त्रवचनम्।

चन्द्रः जन्मराशेः दशमे शुभः चतुर्थस्थेन च विद्धः। तृतीये शुभः नवमस्थेन च विद्धः । एकादशे शुभः अष्टमस्थेन च विद्धः। जन्मराशौ शुभः पञ्चमस्थेन च विद्धः। षष्ठे शुभः द्वादशस्थेन विद्धः। सप्तमे शुभः द्वितीयस्थेन च विद्धः। अत्र चन्द्रबुधयोः वेधः न भवतीति।

एवमेव क्रमशः बुधः द्वितीये शुभः पञ्चमे विद्धः, चतुर्थे शुभः तृतीये विद्धः, षष्ठे शुभः नवमस्थेन विद्धः, अष्टमे शुभः जन्मराशिस्थेन विद्ध, दशमे शुभः अष्टमस्थेन विद्धः एकादशे शुभः द्वादशस्थेन च विद्धः भवति। अत्रापि चन्द्रबुधयोर्वेधः न भवति।

गुरुः क्रमशः पञ्चमे-चतुर्थे, द्वितीये-द्वादशे, नवमे-दशमे, सप्तमे-तृतीये, एकादशे-तृतीये च शुभः विद्धश्च भवति।

शुक्रः प्रथमे-अष्टमे, द्वितीये-सप्तमे, तृतीये-प्रथमे, चतुर्थे-दशमे, पञ्चमे-नवमे, अष्टमे-पञ्चमे, नवमे- एकादशे, द्वादशे-षष्ठे, एकादशे-तृतीये च क्रमशः शुभः विद्धश्च भवति।

अत्र उपरोक्तेषु गोचरवेधविचारे पितापुत्रयोर्वैरः न भवति। दुष्टग्रहोपि विपरीतवेधेन शुभः भवति। यथा – सूर्यः षष्ठे शुभः द्वादशे च विद्धः भवति परञ्च वैपरीत्ये सति इत्युक्ते द्वादशे अशुभकारकः सूर्यः यदि षष्ठस्थाने कोऽपि शुभग्रहः भवति चेत् सः शुभफलदायको भवति । अन्यत्रापि एवमेव स्वीकर्तव्यम्।

शुक्लपक्षे षष्ठ-अष्टम-चतुर्थस्थानम् अविद्धः सन् चन्द्रस्य द्वितीय-पञ्चम-नवमराशिश्च शुभफलप्रदायकः भवति।

अत्र उपरोक्तेषु मञ्जीरग्रन्थे त्रयाः विभागाः सन्ति। तत्र शुभस्थानानि, अशुभस्थानानि, मध्यस्थानानि च। अत्र अशुभस्थानेन विद्धः इति भावः। परञ्च मुहूर्त्तचिन्तामणौ शुभविद्धश्चेति भेदेन द्विविधः विभागः कृतः वर्तते। उभयविधविभागानां चक्रः अधः प्रदीयते-

मञ्जीरोक्तगोचरवशात् शुभाशुभत्वचक्रम्-

| ग्रहः | सूर्यः | | | | चन्द्रः | | | | | भौमः शनिः राहुः केतुः | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शुभः | ६ | १० | ३ | ११ | ७ | ६ | ११ | १० | ३ | ३ | ६ | ११ | | |
| अशुभः | १२ | ४ | ९ | ५ | २ | ५ | १२ | ४ | ९ | १२ | ९ | ५ | | |
| मध्यमः | २ | ७ | ८ | X- X- X | | | | | | २ | ४ | ७ | १२ | |

| ग्रहः | बुधः | | | | | | गुरुः | | | | | शुक्रः | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शुभः | २ | ४ | ६ | ८ | १० | ११ | २ | ११ | ९ | ५ | ७ | १ | २ | ३ | ४ | ५ | ८ | ९ | ११ | १२ |
| अशुभः | ५ | ९ | ३ | ८ | १२ | | १२ | ८ | १० | ४ | ३ | ६ | ७ | १० | | | | | | |
| मध्यमः | ७ | | | | | | ६ | | | | | | | | | | | | | |

मुहूर्तचिन्तामणिग्रन्थोक्तगोचरविचारः-

| ग्रहः | सूर्यः | | | | चन्द्रः | | | | | | भौमः शनिः राहुः केतुः | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शुभः | ६ | १० | ३ | ११ | १० | ३ | ११ | १ | ६ | ७ | ६ | ११ | ३ |
| वेधः | १२ | ४ | ९ | ५ | ४ | ९ | ८ | ५ | १२ | २ | ९ | ५ | १२ |

| ग्रहः | बुधः | | | | | | गुरुः | | | | | शुक्रः | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शुभः | २ | ४ | ६ | ८ | १० | ११ | ५ | २ | ९ | २ | ११ | १ | २ | ३ | ४ | ५ | ८ | ९ | १२ | ११ |
| वेधः | ५ | ३ | ९ | १ | ८ | १२ | ४ | १२ | १० | ३ | ३ | ८ | ७ | १ | १० | ९ | ५ | ११ | ६ | ३ |

अत्र ध्यातव्यमस्ति यत् चन्द्रस्य जन्मराशिः रामदैवज्ञमते शुभः परं श्रीमद्रामसेवकमते तद्नास्ति। एवमेव भौमशनिः राहुः केतुश्च एतेषां श्रीमद्रामदैवज्ञमते पंचमः, अष्टमः एकादशश्च राशिः शुभः परञ्च मञ्जीरग्रन्थे तृतीयैकादशषष्ठश्च शुभः।

एवमेव आचार्यः स्वमञ्जीरग्रन्थे विविधानां मुहूर्त्तानां प्रतिपादनं करोति। यथा ग्रहप्रकरणे गृहारम्भः द्वारवर्णनम्, सस्यरोपणप्रभृतीनां वर्णनं करोति। तत्र ते हलचक्रं बीजोप्तिचक्रं तिथिपत्रचक्रं द्वारचक्रस्यापि च वर्णनं कुर्वन्ति। सहैव लघुकर्ममुहूर्त्ताः अपि यथा – सूचीकर्म जलपूजनं नौकायनं

तैललेपनप्रभृतयः मुहूर्त्ताः अपि आचार्यैः प्रतिपादिताः।

तत्र तिथिशूलः,घातशूलः अयनशूलस्यापि चर्चा ग्रन्थेऽस्मिन् प्राप्यते। तेष्वत्र घाततिथि-विषयोपस्थाप्यते। तद्यथा-[17]

**नन्दादयो भौमगृहेन्दुयुग्म कर्के घटी सिंहशरासनेषु।**
**तुलामृगे स्त्री वृषमीनभेषु घाता भवन्तीति पदक्रमेण।।**

अर्थात् मेषवृश्चिकराशयोः जनानां नन्दा (१-६-११ तिथयः) घाततिथयः उच्यन्ते। मिथुन-कर्कयोः भद्रा (२-७-१२ तिथयः), सिंहधनुषोः जया (३-८-१३ तिथयः), तुलामकरयोः रिक्ता (४-९-१४ तिथयः), वृष-कन्या-मीन-राशीनां पूर्णा (५-१०-१५-३० तिथयः)। अतः यस्य या घाततिथिः भवति सः तस्यां तिथौ शुभकार्याणि न कुर्यात् इति भावः। अर्थात् तत्तद्राशिवतां जनानां कृते तत्तत् तिथयः अशुभफलद्योतकाः भवन्तीति।

उपर्युक्तानुसारेण वक्तुं शक्यते यत् विविधमुहूर्त्तयोगादिसंयुक्तः सटीकः अयं मञ्जीरनामको ग्रन्थः नूनमेव संहिताग्रन्थेषु अन्यतमः इति।

## रविवासरे त्याज्यवस्तूनि-

क्षौरं तैलं जलञ्चोष्णमामिषं निशि- भोजनम्।
रतिस्नानञ्च मध्याह्ने रवौ सप्त विवर्जयेत्।।

## रविव्रतभक्ष्याणि-

पत्रत्रित्वं तुलास्यास्त्रिपलमथ घृतं मार्गशीर्षादिभक्ष्यं
मुष्टीनां त्रिस्तिलानां त्रिपल-दधि तथा दुग्धकं गोमयञ्च।
त्रित्वं तोयाञ्जलीनां त्रिमरिचकमथो त्रिपलाः शक्तवः स्यु-
र्गोमूत्रं शर्करासद्भविरिति विधिना भानुवारे क्रमेण।

१७. मञ्जीरग्रन्थे शकुनप्रकरणम्, श्लो. सं.- १४

# वासरविमर्शः

**डॉ. विकासः**
संस्कृताध्यापकः
राजकीयवरिष्ठमाध्यमिकपाठशाला
सद्दूबडग्रॉ, कॉङ्गडा (हिमाचलप्रदेशः)

**वारावसरयूथेषु वारशब्दो विनिर्मितः।**[1]

वासरस्य भारते एव नहि अपितु विश्वस्तरे महन्महत्वं विद्यते। वासरस्य प्रयोगः क्रमश्च सर्वादौ भारते एव प्रारम्भः जातः। वासरस्य सैद्धान्तिकपक्षाः-

सूर्योदयाद् अग्रिमसूर्योदयं यावत्भूमिसावनवासरः सावनदिनं वा कथ्यते। यथोक्तमपि सूर्यसिद्धान्ते[2]-

**उदयादुदयं भानोर्भूमिसावनवासरः।**

दिनशब्दस्य परिभाषा भास्कराचार्येण इत्थम्प्रकारेण कथितम्- **दिनं दिनेशस्य यतोऽत्र दर्शने**[3]। यावत्कालपर्यन्तं सूर्यस्य दर्शनम्भवति, तावत्कालपर्यन्तं दिनम्भवति। यावत्कालपर्यन्तं सूर्यस्य दर्शनं न भवति, तावत् कालपर्यन्तं रात्रिः भवति। अर्थात् सूर्यास्तकालादग्रिमसूर्योदयं यावत् रात्रिः भवति यदा सूर्यः क्षितिजादूर्ध्वं भवति तदा दिनम्भवति वा। वासरदिनयोः प्रभृति सूर्योदयकालाद्भवति, परन्तु दिनस्य पूर्त्तिः सूर्यास्तकाले, वासरस्य पूर्त्तिः अग्रिमसूर्योदयकाले च भवति। अर्थात् अहोरात्रस्य एकः वासरः भवति। वासरदिनयोः इदमन्तरमस्ति।

**वासराः कति?**

सूर्यादयः मुख्याः सप्त ग्रहाः सन्ति। राहुकेतू तु छायाग्रहौ स्तः। अतः वासराः अपि सप्तैव सन्ति। ते च यथा-रविवासर-सोमवासर-भौमवासर-बुधवासर-गुरुवासर-शुक्रवासर-शनिवासराः च। यथोक्तमपि-

**आदित्यश्चन्द्रमा भौमो बुधश्चाथ बृहस्पतिः।**
**शुक्रः शनैश्चरश्चैते वासराः परिकीर्तिताः॥**[4]

**सप्तवासराणां नामकरणम्-**

सूर्यादि सप्तग्रहाणां नामानुसारेणैव रविवासरादिसप्तवासराणां नामकरणं कृतमस्ति। यथा-सूर्यग्रहादत्र रविवासरः, चन्द्रग्रहात्सोमवासरः मंगलग्रहात्मंगलवासरः इत्यादिः।

---

1. द्रव्यरत्नाकरनिघण्टुः नानार्थाः ६०,
2. सूर्यसिद्धान्तः मध्यमाधिकारः श्लो.सं. ३६
3. सिद्धान्तशिरोमणिः, गोलाध्याये
4. अवकाहडाचक्रम्-२

सप्तवासराणामधिपतयः-

**आदित्यश्चन्द्रमा भौमो बुधश्चाथ बृहस्पतिः।**
**शुक्रः शनैश्चरश्चैते कीर्तिताः वासराधिपाः॥**[5]

सूर्यादयः सप्तग्रहाः रविवासरादिसप्तवाराणां क्रमशः अधिपतयः सन्ति।

**प्रथमः वासरः-**

सृष्ट्यारम्भकाले सर्वादौ सूर्योदयः रविवासरे अभवत्। अतः वासरेषु प्रथमः वासरः रविवासरः अस्ति। यथोक्तमपि भास्कराचार्येण-

**लङ्कानगर्यामुदयाच्चभानोः तस्यैव वारः प्रथमं बभूव।**[6]

**वासरक्रमः-**

ब्रह्माण्डे सूर्यादिग्रहाः स्व-स्वकक्षायां भ्रमन्ति। ग्रहकक्षायां सर्वेषामुपरि नक्षत्राणि। नक्षत्राधः शनिः। शनेरधो गुरुः। गुरोरधो मंगलः। मंगलादधो रविः। रवेरधः शुक्रः। शुक्रादधो बुधः। बुधादधश्चन्द्रमाः। एते भुवः परितः भ्रमन्ति। भुवः उपरिष्टादेषां क्रमेण कक्षाः विद्यन्ते। यथोक्तं सूर्यसिद्धान्ते [7]-

**ब्रह्माण्डमध्ये परिधिर्व्योमकक्षा विधीयते।**
**तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा॥**
**मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्दवः।**
**परिभ्रमन्त्यधोऽधःस्थाः सिद्धा विद्याधरा घना॥**

ग्रहकक्षानुसारेणैव वासरक्रमः भवति। ग्रहकक्षायाम् एकस्मात् अपरः चतुर्थः-चतुर्थः ग्रहः वारेशो भवति। तद्यथा- **मन्दादधः क्रमेण स्युश्चतुर्थाः दिवसाधिपाः।**[8] यथा- शनिग्रहाच्चतुर्थग्रहकक्षा सूर्यग्रहस्यास्ति। अतः शनिवासरादग्रिमदिने रविवासरः भवति। सूर्यग्रहकक्षातः चतुर्थः ग्रहः चन्द्रमाः। अतः रविवासरतः अग्रिमदिवसे सोमवासरः भवति। चन्द्रग्रहकक्षातः चतुर्थो ग्रहो भौमः। अतः सोमवासरतः अग्रिमदिवसे मङ्गलवासरो भवति। भौमग्रहकक्षातः चतुर्थो ग्रहो बुधः, अतः भौमवासरतः अग्रिमदिवसे बुधवासरः भवति। बुधग्रहकक्षातः चतुर्थो ग्रहो गुरुः। अतः बुधवासरतः अग्रिमदिवसे गुरुवासरः भवति। गुरुग्रहकक्षातः चतुर्थो ग्रहः शुक्रः। अतः गुरुवासरतः अग्रिमदिवसे शुक्रवासरः भवति। शुक्रग्रहकक्षातः चतुर्थो ग्रहो शनिः। अतः शुक्रवासरतः अग्रिमदिवसे शनिवासरो भवति। एवम्प्रकारेण वासरक्रमः भवति। यथोक्तमपि सूर्यसिद्धान्ते [9]-

**मन्दादधः क्रमेण स्युश्चतुर्था दिवसाधिपाः।**

यत्पूर्वमुक्तमस्ति तत्तु सिद्धान्तपक्षः। अग्रे यत् कथ्यते तद् व्यावहारिकपक्षः उपस्थाप्यते।

---

5. अवकाहडाचक्रम्-
6. सिद्धान्तशिरोमणिः मध्यमा. कालमाना. श्लो. सं. ३
7. सूर्यसिद्धान्तः भूगोलाध्याये श्लोकसख्या ३०-३१
8. सूर्यसिद्धान्तः भूगोलाध्याये श्लोकसख्या ७८ः
9. सूर्यसिद्धान्तः भूगोलाध्याये श्लोकसख्या ७८

**वासरस्य व्यावहारिकपक्षाः-**

शुभाशुभवासराः-

सोमबुधगुरुशुक्रवासराः शुभाः सन्ति। शुभवासरेषु उद्वाहव्रतोपनयनदेवप्रतिष्ठादि-शुभकार्याणि करणीयानि। रविभौमशनिवासराः अशुभवासराः सन्ति। अशुभवासरेषु कलहशस्त्रघातादि-क्रूरकार्याणि कर्तव्यानि। यथोक्तमपि -

**गुरुश्चन्द्रो बुधः शुक्रः शुभा वाराः शुभे स्मृताः।**
**क्रूरास्तु क्रूरकृत्येषु ग्राह्या भौमार्कसूर्यजाः॥**[10]

**दानम्-**

जातकस्य जन्मकुण्डल्यां यो ग्रहो निर्बलोऽस्ति सो ग्रहः यस्मिन्भावे स्थितोऽस्ति तेन भावेन यस्य विषयस्य विचारः क्रियते। तस्य हानिः भवति। तस्य विचारितविषयस्य हानिः न स्यात् उत लाभः स्यात्तदर्थं निर्बलग्रहस्य निर्बलतां दूरीकर्तुं तस्य ग्रहस्य सम्बन्धितवस्तूनां दानं करणीयम्। अर्थात्यः ग्रहः निर्बलोऽस्ति तस्य ग्रहस्य यत्तत्त्वं भवति तस्य जातकस्य शरीरेऽपि तस्य तत्त्वस्य हानिः भविष्यति। जातकस्य शरीरे तस्य तत्त्वस्य पूर्त्यर्थं तस्य ग्रहस्य तत्सम्बन्धितपदार्थानां (ओषधि-रत्न-खाद्यसामग्रीत्यादीनाम्) दानं तस्य ग्रहस्य वासरे कर्तव्यम्।

रविवासरे धेनु-ताम्र-रक्तपुष्प-केशर-रक्तचन्दन-गुड-गोधूम-माणिक्य-रक्तवस्त्रादिपदार्थानां दानं कर्तव्यम्। सोमवासरे शङ्ख-सितवस्त्र-दधि-रजत-श्वेतपुष्प-कर्पूर-तण्डुल-श्वेतचन्दन-श्वेत-वृषभानां पदार्थानां दानं कर्तव्यम्। मङ्गलवासरे विद्रुम(मूंगा)रत्न-ताम्र-रक्तपुष्प-केशर-रक्तचन्दन-गुड-आरक्तवृषभ-रक्तवस्त्राणां पदार्थानां दानं कर्तव्यम्। बुधवासरे गारुत्मत(पन्ना)रत्न-मुद्गहरित वस्त्राणां पदार्थानां च दानं कर्तव्यम्। गुरुवासरे पीतपुष्प-पुष्पराग-पीतधान्य-हरिद्रा-पीतवस्त्राणां पदार्थानां दानं कर्तव्यम्। शुक्रवासरे श्वेतघोटक-सितवस्त्र-दधि-रजत-श्वेतपुष्प-कर्पूर-तण्डुल-श्वेतचन्दन-वज्रक(हीरा)रत्नानां पदार्थानां दानं कर्तव्यम्। शनिवासरे नीलमरत्न-कृष्णवस्त्र-श्यामवर्णगो-तैल-माषाणां पदार्थानां दानं कर्तव्यम्। यथोक्तमपि -

**धेनुः कम्ब्वरुणो वृषश्चकनकं पीताम्बरं घोटकः।**
**श्वेतो गौरसितामहासिरज इत्येता रवेर्दक्षिणाः॥** [11]

इतोऽपि -

**माणिक्यमुस्ताफलविद्रुमाणि गारुत्मकं पुष्पकवज्रनीलम्।**
**गोमेदवैदूर्यकमर्कतः स्युः रत्नान्यथो ज्ञस्य मुदे सुवर्णम्॥** [12]

वारानुसारेण ओषधिसेवनम्-

**वाराः निगदिताः शस्ता भैषज्यस्य च कर्मणि।**

10. अवकहडाचक्रम्

11. मुहूर्तचिन्तामणिः ४/१६

12. मुहूर्तचिन्तामणिः ४/१०

**सुरेज्यभार्गवादित्यचन्द्रा नित्यं बुधैः सदा॥**[13]

यदि कश्चिज्जनः रुग्णः अस्ति तर्हि सः रोगी गुरुवासरे शुक्रवासरे रविवासरे सोमवासरे वा एतेषु वासरेषु प्रथमवारं औषधं गृहीत्वा खादति तदा सः रोगी शीघ्रमेव स्वस्थो भवति।

**वारानुसारेण दिक्शूलम्-**

पूर्वदिशि सोम-शनिवासरयोः, दक्षिणदिशि गुरुवासरे, पश्चिमदिशि रवि-शुक्रवासरयोः, उत्तर-दिशि मङ्गलवारे च दिक्शूलं भवति। अतः दिक्शूलदिशि यात्रा न कर्तव्या। प्रसङ्गात् अत्र सारिणी-माध्यमेन विवरणं प्रस्तूयते। तद्यथा[14]-

| **दिशा** | **वारशूलः** | **तिथिशूलः** | **नक्षत्रशूलः** | **वारशूलपरिहारः** |
|---|---|---|---|---|
| पूर्व | सोमः, शनिः | १,९ | श्रवण, ज्येष्ठ | दुग्धम् |
| आग्नेय | सोमः, गुरुः | ३, ११ | X | दुग्धं/दधिं प्राश्यम् |
| दक्षिण | गुरुः | ५, १३ | अश्वि,धनि.,शत.,पू.भा.,उ.भा.,रेव. | दधिं प्राश्यम् |
| नैर्ऋत्य | रविः, शुक्रः | ४, १२ | X | घृतम्/यवान् भुक्त्वा |
| पश्चिम | रविः, शुक्रः | ६, १४ | रोहि. पुन. | घृतम्/यवान् भुक्त्वा |
| वायव्य | मंगलः | ७, १५ | X | गुडम् |
| उत्तर | मंगलः, बुधः | २, १० | उ.फा. हस्त | गुडम्/तिलान् भुक्त्वा |
| ईशान | बुधः, शनिः | ८, ३० | X | तिलान्/मसान् भुक्त्वा |

**राश्यनुसारेण घातवासराः-**

व्यवहारे अवलोक्यते यत्जनाः कथयन्ति अहम् अमुकवासरे किमपि नूतनकार्यं करोमि तस्य कार्यस्य निर्विघ्नतापूर्वकं सिद्धिः भवति तथा अमुकवासरे किमपि नूतनकार्यं करोमि तस्य कार्यस्य कदापि सिद्धिः नो भवति। तस्य कारणं कालविधायकशास्त्रानुसारेण घातवासराः भवन्ति। भिन्न-भिन्नराशीनां कृते भिन्न-भिन्नघातवासराः भवन्ति। तद्यथा-

**नक्रे भौमो गोहरिस्त्रीषु मन्दश्चन्द्रो द्वन्द्वेऽर्कोऽजभे ज्ञश्च कर्के।**
**शुक्रः कोदण्डालिमीनेषु कुम्भजूके जीवो घातवारा न शस्ता॥**[15]

मेषराशेः कृते रविवासरः घातवासरो भवति। अतः यस्य जातकस्य मेषराशिः अस्ति। सः जातकः रविवासरे किमपि नूतनकार्यं न कुर्यात्। अन्यथा तस्य कार्यस्य नाशो भविष्यति। मिथुनराशेः कृते सोमवासरः घातवासरः। मकरराशेः कृते मङ्गलवासरो घातवासरः। कन्याराशेः कृते बुधवासरः घातवासरः। कुम्भ-तुलयोः कृते गुरुवासरः घातवासरः। धनुर्वृश्चिकमीनराशीनां कृते शुक्रवासरः घातवासरः। वृषसिंहकन्याराशीनां कृते शनिवासरः घातवासरश्च अस्ति।

13. अवकहडाचक्रम्, मिश्रप्रकरणम्-२९
14. श्रीजगन्नाथपञ्चाङ्गम् पृ.सं. २४
15. मुहूर्तचिन्तामणिः- ११/३१

**तैलाभ्यङ्गे शुभाशुभवासराः-**

प्रत्येकऽस्मिन् वासरे तैलमर्दनस्य भिन्नं भिन्नं फलम्भवति। यथा- रविवासरे तैलमर्दनेन ज्वरः, सोमवासरे तैलमर्दनेन कान्तिः, भौमवासरे तैलमर्दनेन मृत्युतुल्यं कष्टं, बुधवासरे तैलमर्दनेन धनस्य वृद्धिः, गुरुवासरे तैलमर्दनेन धनस्य हानिः, शुक्रवासरे तैलमर्दनेन विपत्तिः, शनिवासरे तैलमर्दनेन समस्तभोगानां प्राप्तिः च भवति। यदि प्रतिदिनं तैलमर्दनं क्रियते चेत्तदा उपर्युक्तस्य विचारो न कर्तव्यः। यथोक्तमपि-

**रविस्तापं कान्तिं वितरति शशी भूमितनयो**
**मृतिं लक्ष्मीं चान्द्रिः सुरपतिगुरुर्वित्तहरणम्।**
**विपत्तिं दैत्यानां गुरुरखिलभोगानुगमनं**
**नृणां तैलाभ्यङ्गात् सपदि कुरुते सूर्यतनयः॥** [16]

नूतनवस्त्रधारणं बुधवासरे गुरुवासरे शुक्रवासरे च करणीयम्। येन कारणेन तद् वस्त्रं दीर्घकालं यावत्तिष्ठति। यथा-

**ब्रह्मानुराधवसुपुष्यविशाखहस्तचित्रोत्तराश्विपवनादितिरेवतीषु।**
**जन्मर्क्षजीवबुधशुक्रदिनोत्सवादौ धार्यं नवं वसनमीश्वरविप्रतुष्ट्यै।।** [17]

वासरः व्यावहारिकः। अतः उपर्युक्तवासरसम्बन्धितशास्त्रीयपक्षाणां व्यवहारेण अनिष्ट-निवारणमिष्टप्राप्तिश्च भवत्येव इत्यत्र संशयः नैव कर्तव्यः।

।। इति शम् ।।

---

16. अवकहडाचक्रम्-४

17. अवकहडाचक्रम्, मिश्रप्रकरणम्-७

# वास्तुपुरुषविमर्शः

**विनायकशर्मा,** शोधच्छात्रः(NET)
केन्द्रीयसंस्कृतविश्वविद्यालयः,
गंगानाथझापरिसरः, प्रयागराज
E-mail:- hpvinayak2020@gmail.com
चलदूरवाणी-7807447441

भवननिर्माणस्य शिल्पविज्ञानस्य वा नाम वास्तुविद्या कथ्यते। भारतीयवास्तुविद्यायाः परम्परा अतीव प्राचीना वर्तते। 'वस्' धातोः 'तुण्' प्रत्यये कृते निष्पन्नोऽयं 'वास्तुशब्दः'।[1] यस्यार्थः गृहनिर्माणस्थानं भूखण्डो वा गृह्यते। मनुष्याणां वासयोग्यं स्थानम् वास्तु इति पदेन उच्यते। तद्यथा- भृगुसंहितायाम्-

**नानाविधानां वस्तूनां यन्त्राणां कल्पसम्पदाम्।**
**धातूनां साधनानाञ्च वास्तुनां शिल्पसंज्ञितम्।।** [2]

अन्यत् व्युत्पत्त्यनुसारं 'वसति अस्मिन् इति वास्तुः'। **वसन्ति प्राणिनो यत्र**[3] अर्थात् प्राणिनः यत्र वसन्ति इति वास्तु। एवं गृहरचनायाः निमित्ता विभिन्ना भूमि वास्तु उच्यते । बृहत्संहितायां वराहमिहिरेण वास्तुशब्दस्य प्रयोगः एकस्मिन् सीमितार्थे क्रियते। वास्तुशब्दः वेदेषु 'वास्तोष्पतिः' शब्दमाध्यमेन व्याख्यायते। अन्येषु स्थानेषु वास्तुशब्दः भवन-गृह-नगर-उद्यान-प्रासाद-मन्दिर-प्रभृति-अर्थेषु गृह्यते।

संक्षेपेण वास्तुः ईशानादिकोणेभ्यः प्रारभ्य गृहनिर्माणस्य विद्या वर्तते। इयं विद्या विघ्नप्राकृतिक-उत्पातोपद्रवेभ्यः जीवान् रक्षति। गृहनिर्माणप्रयोजनं स्पष्टयन् मनीषिभिः उद्घोषितं यत् गृहं मनुष्येभ्यः स्त्री-पुत्र-सुख-धर्मार्थ-कामरूपी पुरुषार्थान् ददाति। तथा च अन्यान् प्राणीन्संरक्षति तथा प्राकृतिकापदान् यथा-शीत-वात-धूप(घर्म) आदिभ्यः कष्टेभ्यः रक्षति। यद्यपि विश्वदृष्टया पश्यामः तर्हि वास्तुशास्त्रस्योद्भवः वेदेभ्यः एव मन्यते। परञ्च वेदेषु वास्तुशास्त्रोपदेष्टृणां स्पष्टोल्लेखः न प्राप्यते। मत्स्यपुराण-अग्निपुराण-बृहत्संहिता-मानसार-सनत्कुमारवास्तुशास्त्र-इत्यादिषु ग्रन्थेषु प्रदत्त वास्तुविद्याचार्याणां उल्लेखो प्राप्यते। उक्तञ्च बृहद्वास्तुमालायाम्-

**स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदम्**
**जन्तूनामयनं सुखास्पदमिदं शीताम्बुघर्मापहम्।**
**वापी देव गृहादिपुण्यमखिलं गेहात्समुत्पद्यते**
**गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः।।** [4]

1. शब्दकल्पद्रुमे
2. भृगुसंहितायाम्
3. शब्दकल्पद्रुमे
4. बृहदवास्तुमाला श्लो.सं.

अनेन विज्ञायते यद् वास्तुशास्त्रस्य प्रथमः कर्ता श्रीविश्वकर्मा एव। वस्तुतः वास्तुशास्त्रस्य आचार्याणां स्पष्टनिर्देशः पुराणसाहित्ये एव मिलति। मत्स्यपुराणे वास्तुशास्त्रस्य अष्टादशप्रवर्तकाः आचार्यः विश्लेषिताः क्रियन्ते। ते सन्ति- भृगु-अत्रि-वसिष्ठ-विश्वकर्मा-यम-नारद-नग्नजित-विशालाक्ष -पुरन्दर-ब्रह्मा-कुमार-नन्दीश-शौनक-गर्ग-वासुदेव-अनिरुद्ध-शुक-बृहस्पत्यादयः।

बृहत्संहितायामेतेषामतिरिक्तं भास्कर-मनू वास्तुशास्त्रस्य उपदेष्टारौ स्वीक्रियेते। तत्र प्रमुखतया सप्तवास्तु-आचार्यानां उल्लेखो वर्त्तते। भारतीयदर्शने मानवानां कृते चत्वारः पुरुषार्थाः प्रतिपादिताः। धर्म-अर्थ-काम-मोक्षाश्च। एषां चतुर्णां पुरुषार्थानां प्राप्त्यर्थं शरीर-मनोबुद्धिनामानु-कूल्यमपरिहार्यम्। स्वस्थं शरीरं, स्थिरं मनः, निर्मला बुद्धिश्च तदैव भवति यदा प्रकृत्या सर्वाधिको लाभो भवेत्। अयं लाभश्च वास्त्वाधृते भवने आश्रयद्वारा प्राप्यते। अतस्तदर्थं सर्वथा प्रयतितव्यम्। वास्त्वानुकूलताविषये विश्वकर्मणा कथितम् -

**चतुर्वर्गफलप्राप्तिः सलोकश्च भवेद् ध्रुवम्।**
**शिल्पशास्त्रपरिज्ञानान्मर्त्येऽपि सुरतां वर्तेत्।।**
**इदं पवित्रं परमं रहस्यं यः पठेन्नरः।**
**स्यात्तस्यापि तथा वाणी सत्यं सत्यं वदाम्यहम्।।** [5]

अस्यायमभिप्रायो यद् वास्तुशास्त्रस्य ज्ञानेन मानवः धर्मार्थकाममोक्षान् प्राप्नोति। सः आलौकिकगुणसम्पन्नश्च भवति। तस्य वाणी च सत्यतां धारयति। सः लोकहिते सदा प्रवर्तते। वस्तुतः वास्तुविद्यायाः विकासो मानवसभ्यताया सहैव जातः। अस्याः विद्यायाः सम्बन्धः मनुष्यस्य शालीन-जीवनेन सह अस्ति। प्राणीमात्रेषु आत्मरक्षायाः सुखसाधनस्य च भावः स्वभाविको विद्यते। पक्षिणो नीडं रचयन्ति। मूषकादयः भू-गह्वरं (बील इति भाषायां) खनन्ति। जीव-जन्तु-पशु-पक्षिप्रभृतिषु आत्मरक्षायै सुन्दरातिसुन्दरकलापूर्णनिवासनिर्माणस्य भावनां समुद्भवन्ति। एवं हि मनुष्याः शीतोष्णवातवर्षणादिभि आत्मरक्षायाः अनुभवं कृत्वा वास्तुविद्यायाः जन्म प्रदत्तवन्तः। पुराणानुसारं प्रजा द्वन्द्वादिभिरातुरा भूत्वा स्वरक्षणाय कृत्रिमं दुर्ग-पुर-नगर-खर्वटादीनां निर्माणाय प्रायतन्त। एवं शीत- आतपादिबाधां दूरीकर्तुं प्राथमिकी कला प्रथा प्रचलिता।

राज्ञः पृथोः प्रसङ्गे पुराणेषु उक्तम् अस्ति यत् पूर्वं पुरग्रामादीनां नियमितो विभागो नासीत्। राज्यभिषेकानन्तरं पृथुना स्वधनुष्कोष्ट्या पर्वतानुत्पाट्यैकत्र ते स्थापिताः। तेन पृथ्वी समतला जाता। तदनन्तरं कृषेः पुर-ग्रामादीनां निर्माणमारब्धम्।

## वास्तुपुरुषस्वरूपम्

वास्तुपुरुषं वस्तुतः पुरुषस्य संज्ञा दीयते। भवननिर्माणसम्बन्धे वास्तोष्पतिदेवतायाः आह्वानस्य विवरणं निम्नमन्त्रे प्राप्यते।[6]

---

5. प्रकीर्णम्

6. वास्तुरत्नावली, वस्तुपूजनविवेकाध्यायः पृ.सं. ४५, संपादकः अच्युतानन्दझा, चौखम्बाअमरभारती वाराणसी

**वास्तोष्पते प्रतिजानीह्यस्मानत्स्वावेशो अनमीवो भवा नः।**
**यतस्त्वेमहे प्रति तन्नो जुषस्व शं नो द्विपदे शं चतुष्पदे।।**

अनेन मन्त्रेण स्पष्टमेव ज्ञायते यद् वास्तुदेवतायाः आवाहनं विधाय पूजां च क्रियते तदा गृहादिनिर्माणं श्रेयस्करं भवति। वास्तोष्पतिः एव गृहनिर्माणस्य देवतेति कथ्यते। यथा-वास्तो गृहक्षेत्रस्य परिधिष्ठाता। ऋग्वेदे गृहरक्षको देवः एव वास्तोष्पतिः इति लिखितं वर्तते। वास्तोष्पतिर्गृहस्य पालयितृदेवः। अस्य जन्मवृतान्तः वेदेषु, पुराणेषु,ज्योतिषग्रन्थेषु च सर्वत्र प्राप्यते।

वास्तुपुरुषस्योत्पत्तिविषये बृहत्संहितायां वास्तुसौख्ये च समानमेव मतं वर्तते। अनयोः अनुसारं पूर्वकाले स्वशरीरेण पृथ्वी-आकाशयोः आच्छादकः कश्चन अपरिचितः जीवः प्रादुर्बभूव। तं दृष्ट्वा देवैः अधोमुखं कृत्वा पृथिव्यां स्थापितः। तस्मिन् काले ये देवाः यस्याङ्गं धृतवन्तः आसन् तेषां स्थानं तदेव अभवत्। सः अलौकिकः जीवः देवमयो भूत्वा कालान्तरे वास्तुपुरुषनाम्ना प्रतिष्ठितो जातः। यस्य पूजनं प्रायः सर्वेषु वास्तुकर्मसु नूनमेव क्रियते। तद्यथा-[7]

**सङ्ग्रमेऽन्धकरुद्रयोश्च पतितः स्वेदो महेशात्क्षितौ**
**तस्माद्भूतमभूच्च भीतिजननं द्यावापृथिव्योर्महत्।**
**तद् देवै सहसा निगृह्य निहतं भूमावधो वक्त्रकं**
**देवानां वचनाच्च वास्तुपुरुषस्तेनैव पूज्यो बुधैः।।**

मत्स्यपुराणानुगुणं भगवच्छिवस्य अन्धकदैत्येन साकं युद्धं जातम्। अनन्तरं भगवता शिवेन सः मारितः। युद्धस्य फलरूपेण शिवस्य मस्तकस्य स्वेदकणात् विराट्पुरुषस्योत्पत्तिरभूत्। तदनु सः देवः तपः चकार। तेन तपसा तुष्टः शिवः शिवानुकम्पया वरं प्राप्तवान्। तथा च सः त्रिलोकभक्षणं कर्तुं समुद्यतोऽभूत्। तद्भगवता मन्यते। त्रिलोकान् स्वीक्रित्य सः अधोवक्त्रं भूत्वा निपतितः। भयाक्रान्तदेवाः तं धृत्वा तस्मिन् स्वस्थाननिर्माणं कुर्वन्ति। स एव पुरुषः वास्तुपुरुषनाम्ना प्रसिद्धोऽभूत्। अस्य पुरुषस्य उत्पतिः विषये वर्णितमस्ति यत् भाद्रपदमासे कृष्णपक्षस्य तृतीयायां तिथौ, शनिवासरे, कृतिकानक्षत्रे, व्यतीपातयोगे, विष्टिकरणे, भद्रामध्ये, कुलिकमुहूर्ते, तस्योत्पत्तिर्जाता।

## वास्तुपुरुषस्यावस्थितिः

यदा तं महाभूतं देवाः अधोमुखं कृत्वा भूमौ पातयामासुस्तदा तस्य शिरः ईशानकोणे चरणौ च नैर्ऋत्यकोणे आस्ताम्। वास्तुपुरुषस्य वास्तुभूमौ स्थितिः प्रायः सर्वेषु ग्रथेषु समानमेव विद्यते। बृहत्संहितायां वास्तुपुरुषः ईशानकोणे शिरं निधाय अधोमुखो वर्तते। बृहत्संहितायां समराङ्गणसूत्रे च वास्तुपुरुषस्य अङ्गोपरि देवविशेस्य स्थितिः यथा निर्दिष्टा वर्तते।

मत्स्यपुराणे एकाशीतिवास्तुपदनिर्णयाख्ये त्रिपञ्चाशदधिकद्विशततमे वास्तुपदचक्रे वंशाः, मर्मस्थानानि च वर्णितानि सन्ति। एवमेव बृहत्संहितायामपि वर्णितानि। भूपरीक्षणस्य नैके विधयः विभिन्नवास्तुग्रन्थेषु उपलभ्यन्ते। तदेतत्परीक्षणं शोधनञ्च वास्तुतन्त्रं तद्व्याप्यं चोच्यत इति तन्त्रसंहितायां

7. वास्तुरत्नावली, वस्तुपूजनविवेकाध्यायः पृ.सं. ४५, संपादकः अच्युतानन्दझा, चौखम्बाअमरभारती वाराणसी

निगदितम्।

यथा कस्यचिदपि कार्यस्य आरम्भणात् प्राक् कार्ये प्रयुज्यमानानाम् अवयवावयवीनां परीक्षण-मावश्यकं भवति तथैव भवनादिवास्तुनिर्माणात्प्राक् भूमेः परीक्षणम् आवश्यकमस्ति। परीक्षणस्य च अनेकाः विधयः सन्ति। अग्निपुराणे मतं स्वीकृत्य वराहेण एवमुक्तमस्ति। तद्यथा [8]

**क्षेत्रमादौ परीक्ष्येत गन्धवर्णरसप्लवैः।**
**सुमध्वाज्यान्नपिशितं गन्धं विप्रानुपूर्वकम्।।**
**सितेषद्रक्तहरितकृष्णवर्णायथाक्रमात्।**
**मधुरं कटुकं तिक्तं काषायरससन्निभम्।।**

वराहानुसारेण ब्राह्मणाय मधुगन्धा, क्षत्रियाय घृतगन्धा, वैश्याय अन्नगन्धा तथा शूद्राय रक्तगन्धा भूमिः शुभप्रदा भवति। अग्निपुराणात् वराहोक्तं मतं भिन्नमेवास्ति। अग्निपुराणापेक्षया वराहस्य रसपरीक्षणमधिकमुत्तम्। तथैव खातपरीक्षणविधिना उत्तमभूमेर्निर्धारणं तावत् उभयत्र अग्निपुराणमते वराहमते चास्ति। किन्तु मध्यम अशुभभूम्योर्निधारणम् अग्निपुराणे नास्ति। कदाचित् अग्निपुराणोक्तं मतं दृष्ट्वा वराहेण मध्यम-अधम-भूम्योः निर्धारणं स्वयमेव कल्पितम्। विविधग्रन्थेषु शल्योद्धारः शोधप्रकारश्च एवं वर्णितोऽस्ति। यथा शल्यशोधनं वास्तुशास्त्रे[9]-

**जलान्तं प्रस्तरान्तं वा पुरुषान्तमथापि वा।**
**क्षेत्रं संशोध्य चोद्धृत्य शल्यं सदनमारभेत्।।** इति।।

अर्थात् शल्यज्ञानात्परं शल्योद्धाराय सा भूमिः जलान्तं प्रस्तरान्तं वा खननीया। इत्थं शल्योधारानन्तरं वास्तुपूजनं विधाय गेहारम्भादिकं करणीयम्। तद्यथा-[10]

**प्रासादे भवने तडागखनने कूपे च वाप्यां वने**
**जीर्णोद्धारपुरेषु यागभवनप्रारम्भनिर्वर्तने।**
**वसतोः पूजनकं सुखाय कथितं पूजां विना हानये**
**तस्मात् यत्नपरेण तत्करजतः सम्पूजनीयः सता।।**

।। इति दिक् ।।

८. बृहत्संहिता

९. तत्रैव

10. वास्तुरत्नावली, वस्तुपूजनविवेकाध्यायः पृ.सं. ४५, संपादकः अच्युतानन्दझा, चौखम्बा अमरभारती वाराणसी

# विवाहलग्नस्थग्रहकृतशुभाशुभयोगानां विवेचनम्

**वेदप्रकाशपाण्डेयः**
सहायकाचार्यः (ज्यौतिषम् )
रा. स. महाविद्यालयः -क्यार्टू
शिमला,हिमाचलप्रदेशः

अस्माकं पूर्वाचार्यैः सकलशुभाशुभकार्येषु मुहूर्तविचारः कथितः। सनातनपरम्परायां विवाह-संस्कारः सर्वाधिको महत्त्वपूर्णसंस्कारो वर्तते। विवाहसंस्काराय शुभलग्नस्य चयनं परमावश्यकं भवति। यतो हि शुभलग्नेनैव भार्या शुभशीलयुक्ता भवति। यथोक्तं मुहूर्तचिन्तामणौ१-[1]


**भार्यात्रिवर्गकरणं शुभशीलयुक्ता शीलं शुभं भवति लग्नवशेन तस्याः ।**
**तस्माद्विवाहसमयः परिचिन्त्यते हि तन्निघ्नतामुपगताः सुतशीलधर्माः ।।**

अत एव विवाहसंस्कारे शुभलग्नस्य चयनं भवितव्यम् । विवाहलग्नेऽपि ग्रहकृताः विविधाः शुभाशुभयोगाः सन्ति। जातकशास्त्रे गजकेसरीसुनफाऽनफा-हंसभद्रादयः अनेके शुभयोगाः प्रसिद्धाः। केमद्रुमग्रहणाङ्गारकादय अनेके अशुभयोगाः सन्ति। एतेषां योगानाम् मानवजीवनस्योपरि येन प्रकारेण प्रभावो भवति तेनैव प्रकारेण विवाहलग्नस्थग्रहकृतयोगानां वरवध्वोर्दाम्पत्यजीवने प्रभावो भवति। विवाहलग्ने निर्मितानां केचित् शुभाशुभयोगानां वर्णनमत्र क्रियते ।
तत्रादौ चक्रयोगं तत्फलञ्च २-[2]

चक्रस्यार्धे प्राचि पश्चात्क्रमेण क्रूराऽक्रूरैश्चक्रमित्यामनंति।
अत्रोढायाः सुभ्रुवः स्वैरिणीत्वे भ्राम्यत्युच्चैश्चक्रवच्चित्तवृत्तिः।।

अर्थाद्यदि विवाहलग्ने ''दशमभावाच्चतुर्थभावपर्यन्तम्'' क्रूरग्रहाः स्थिताः भवेयुस्तथा ''चतुर्थात् दशमभावपर्यन्तम्'' शुभग्रहाः स्थिताः भवेयुस्तदा चक्रनामको योगो भवति। योगोऽयं नैव शुभफलप्रदः। अस्मिन् योगे विवाहिता स्त्री पुंश्चली स्यात्। यथा -

चक्रयोगः-




1. मुहूर्तचिन्तामणिः - ६.१

2. विवाहवृन्दावनम् - ११.१

अतो यदि विवाहलग्ने एतादृषो योगो भवति तदा विवाहिता स्त्री चक्रवदेव चञ्चलमनसः प्रेरणया व्यभिचारं करोति। विवाहलग्ने निर्मितस्य ध्वजयोगस्य लक्षणं फलञ्च३-[3]

**शुभैर्लग्नगतैः खेटैरशुभैर्निधननोपगैः।**


**ध्वजोऽयं परिणीताऽत्र युवती प्रियवल्लभा।।**

विवाहलग्ने यदि शुभग्रहाः स्थितास्तथा अष्टमभावे क्रूरग्रहाः भवेयुस्तदा ध्वजनामकशुभयोगो भवति । अस्मिन् योगे विवाहिता स्त्री सगुणलाभवती भवति तथा स्वचेष्टितैः पतिमाकृष्टं करोति।

**सर्वैः केन्द्रगतैः पापैर्वापीयोगोऽपि निन्दितः।।४** [4]

प्रथमचतुर्थसप्तमदशमस्थानानि केन्द्रस्थानानि सन्ति। एतानि स्थानानि शुभानि सन्ति। यथोक्तम् पराशरेण - ''विष्णुस्थानं च क्रेन्द्रं स्याल्लक्ष्मीस्थानं त्रिकोणकम्।।''[5] अतो यदि शुभस्थानेषु क्रूरग्रहाः स्थितास्तदा तत्र तेषां दुष्प्रभावो तु भवत्येव।

वापीयोगः




विवाहलग्ने यदि चतुर्थदशमनवमस्थानेषु शुभग्रहाः स्थितास्तदा भृगुमुनिमते शंखनामक योगः भवति । अस्मिन् योगे विवाहितास्त्री धनयशनीतिभिर्युक्ता भवति । यथा६ [6]

**गगनतोयतपस्सु शुभैर्भृगुर्गदति शंखमशंस्खलयत्यसौ ।**


**धनयशोनयशोभितनुश्रियां परिणयेन पयोरुहचक्षुणाम् ।।**

अत्र द्वे केन्द्रस्थाने तथा एकं त्रिकोणस्थानं कथितम्। एतानि सर्वाणि स्थानानि शुभानि सन्ति। अतः स्वभाविकोऽयं यद्यदि शुभस्थानेषु शुभग्रहाः स्थिताः भवेयुस्तदा फलमपि शुभं भविष्यति। लोकव्यवहारेऽपि वयं पश्यामो यद् द्वयोः सज्जनयोः परस्परं सम्बन्धः शोभन एव भवति। ग्रहाणां सम्बन्धेऽपि एवमेव अस्ति। तस्मात् शुभस्थानेषु शुभग्रहाः शुभाः कथिताः।

अन्यत्रापि द्रष्टव्यो योगोऽयम् -''खतुर्यनवगैः सौम्यैः शङ्खोऽयं शुभकृत् सदा। [7]''७

3. मुहूर्तगणपतिः विवाहप्रकरणम् - २३८
4. तत्रैव,- २४४
5. बृहत्पराशरहोराशास्त्रम् - ४२/ २८
6. विवाहवृन्दावनम् - ११/ ४
7. मुहूर्तगणपतिः विवाहप्रकरणम् - २४२

शङ्खयोगः




श्रीवत्सयोगस्य निर्माणप्रकारः फलञ्च [8] –

**कुजेऽर्के लाभगे षष्ठे शनौ चन्द्रे द्वितीयगे ।**
**धर्मस्थैः खेचरैरन्यैः श्रीवत्सो योग उत्तमः।।**


अत्र येऽन्याः ग्रहाः कथितास्ते गुरुबुधशुक्रकेतुराहवश्च सन्ति। अत्रापि गुरुबुधशुक्रास्तु नवमस्थाने भवितुं शक्यन्ते परञ्च राहुकेतू भवितुं न शक्येते। उभौ परस्परं षड्राश्यन्तरे स्थितौ भवतः। विवाहलग्ने एकादशस्थसूर्यः सर्वेषां दोषाणां नाशं करोति। अस्मिन् विषये रामदैवज्ञः कथयति [9] –

**केन्द्रे कोणे जीव आये रवौ वा लग्ने चन्द्रे वापि वर्गोत्तमे वा।**
**सर्वे दोषाः नाशमायन्ति चन्द्रे लाभे तद्वद्द्विमुहूर्तांशदोषाः।।**

बुधगुरुशुक्रास्तु कथितस्थानेषु शुभाः सन्ति। रामदैवज्ञस्तु कथयति यद्यदि विवाहलग्ने बुधगुरुशुक्राः केन्द्रस्थानेषु अथवा त्रिकोणस्थानेषु स्थिताः भवेयुस्तदा विवाहलग्ने निर्मितानां सर्वेषां दोषाणां नाशो भवति। तद्यथा [10] -

**अब्दायनर्तुतिथिमासभपक्षदग्धतिथ्यन्धकाणबधिराङ्गमुखाश्च दोषाः।**
**नश्यन्ति विद्गुरुसितेष्विह केन्द्रकोणे तद्वच्चपापविधुयुक्तनवांशदोषाः ।।**

श्रीवत्सयोगः




विवाहलग्ने शुभग्रहाः स्थितास्तथा द्वितीयद्वादशयोः क्रूरग्रहाः स्थिताः भवेयुस्तदा कार्मुकनाम योगो भवति । अस्मिन् योगे परिणीता कन्या कान्तवेषा सती विषशस्त्रादिभिः स्वपतिं हत्वा अतिशयेन


8. तत्रैव - २३९
9. मुहूर्तचिन्तामणिः - ६.९०
10. मुहूर्तचिन्तामणिः - ६.९१

रमयति । तद्यथा-[11] ११

सौम्याः मूर्तौ स्वांतराश्योरसौम्याः कुर्युर्योगं कार्मुकं कन्यकास्मिन् ।
हत्वा कान्तं कान्तवेषा विषाद्यैर्वेश्यारामं रंरमीति स्वरत्या ।

क्रूरग्रहाणां मध्ये शुभग्रहस्य स्थितिः नैव शोभनम् । क्रूरग्रहाणां संसर्गेणात्र शुभग्रहेऽपि संसर्गजो दोषो भवतियस्माद्योगोऽयमशुभफलप्रदो जायते । तद्यथा-

कार्मुकयोगः





मुहूर्तगणपतावपि -''**सौम्यैर्लग्ने व्यये वित्ते पापैः कोदण्डकोऽप्यसत्** ।।[12]

विवाहकालिककन्यालग्ने पञ्चमस्थाने शुक्रस्तथा तृतीयस्थाने गुरुचन्द्रौ यदि गतौ तदा आनन्दनाम योगो भवति। अस्मिन् योगे परिणीता कन्या पितृभर्तृवंशयोरानन्दं विस्तारयति [13] -

**यदि स्यात् कन्यका लग्ने तृतीये चन्द्रवाक्पती।**
**पंचमे भृगुरानन्दयोगश्चानन्दकृत् स हि।।**

कन्यालग्नात् तृतीयस्थाने वृश्चिकराशिर्भवति। यस्य स्वामी भौमः गुरुचन्द्रयोर्मित्रमस्ति। उभयोर्मित्रस्य गृहे स्थितिः शुभफलप्रदा वर्तते। एतद्भिन्नं कन्यालग्नात् पञ्चमस्थाने मकरराशिर्वर्तते। मकरस्य स्वामी शनिः शुक्रस्य परममित्रमस्ति। यस्मादत्र पञ्चमस्थाने शुक्रस्य स्थितिः शुभफलप्रदा कथिता।

आनन्दयोगः




विवाहलग्ने द्वादशस्थाने भौमः शत्रुस्थाने शुक्रस्तथा चतुर्थस्थाने शनिः स्थितो भवेत्तदा कुठारनाम

11. विवाहवृन्दावनम् - ११.६
12. मुहूर्तगणपतिः विवाहप्रकरणम् - २४४
13. मुहूर्तगणपतिः विवाहप्रकरणम् - २४०


योगो भवति। मुहूर्तगणपतौ योगोऽयं वंशलतायाः नाशकः कथितः [14] १४-

**भौमे द्वादशगे षष्ठे शुक्रे तुर्ये शनैश्चरे। कुठारोऽयं समाख्यातः शुभवल्लीविदारणः।।**

विवाहलग्ने त्रिषट्सप्ताष्टस्थानेषु शुक्रः सर्वत्रैव अतीव अशुभः। तद्यथा- [15] १५

**सितोऽष्टत्रिद्यूनषड्व्ययगृहान् परिहृत्य शस्तः ।।**

कुठारयोगः




विवाहलग्ने यदि सूर्यो द्वादशे, शुक्रो द्वितीये, शनिष्षष्ठे तथा चन्द्रोऽष्टमे भवेयुस्तदा कूर्मनाम योगो भवति। अस्मिन् अशुभयोगे विवाहिता स्त्री परगृहेषु भ्रमति [16]१६-


**विकविरविजेन्दुभिः क्रमेण व्ययधनषण्निधनेषु कूर्म एषः।**

**इह विहितकरग्रहा गृहाणि भ्रमति भुजिष्यतया परः शतानि।।**

अत्र सूर्यो द्वादशे भावे स्थितः कथितः। ग्रहाणां विवाहलग्नबलानुसारं द्वादशस्थसूर्यः शुभो न भवति। तत्र षष्ठस्थशनिस्तु शुभः कथितः। द्वितीयस्थानस्य शुक्रोऽपि शुभो भवति परञ्च अष्टमस्थचन्द्रः शुभो न। एवं अस्मिन् योगे द्वौ ग्रहौ शुभौ तथा द्वौ शुभौ न स्तः, तथापि अत्र अशुभयोगस्य एव निर्माणोऽभवत्। कारणमिदं यद् द्वादशस्थस्य सूर्यस्य दृष्टिष्षष्ठस्थशनेरुपरि भवति, उभौ परस्परं परमशत्रू स्तः। इत्थं अष्टमस्थचन्द्रस्य द्वितीयस्थशुक्रस्योपरि पूर्णा दृष्टिर्भवति। उभौ परस्परं समशत्रू स्तः। अन्यत्रापि योगोऽयं कथितः [17] -

व्ययेऽर्के द्रविणे शुक्रेऽरिगे मन्देऽष्टमे विधौ ।
योगः स्यात् कूर्मनामाऽयं नवोढा भिक्षुकी भवेत्।।

कूर्मयोगः-




14. मुहूर्तगणपतिः विवाहप्रकरणम् - २४५

15. मुहूर्तचिन्तामणिः विवाहप्रकरणम् - ८७

16. विवाहवृन्दावनम् - ११.९

17. मुहूर्तगणपतिः विवाहप्रकरणम् - २४६

विवाहलग्ने यदि द्वादशे स्थाने शनिः, अष्टमस्थाने चन्द्रस्तथा लग्ने सूर्यः स्थिताः भवेयुस्तदा मुसलनामको योगो भवति । अस्मिन् वृष्णिकुलांतके योगे विवाहिता स्त्री कुलनाशिनी भवति १८। [18]


**व्ययनिधनतनूषु मन्दचन्द्रारुणकिरणैर्मुसलं जगुर्मुनीन्द्राः।**
**इह वृष्णिकुलान्तके कुमारी कुलमारी न च कापि कार्यसिद्धिः।।**

अत्र यद् वृष्णिकुलान्तकं कथितं तत् पुराणेषु स्पष्टं वर्तते। एकदा केचन् यदुवंशीयाः बालका एकं बालकं स्त्रीवत् कृत्वा मुनीनां सन्निधौ गतवन्तः। ते पृच्छन्ति स्म यद् अस्याः गर्भे किमिति? स्वतपोबलेन सर्वं ज्ञात्वा कोपाविष्टास्ते मुनयः बालकेभ्यः शापं दत्तवन्तो यद् अस्याः गर्भाद् मुसल उत्पन्नो भविष्यति यः सर्वेषां वृष्णीनां नाशं करिष्यति। यथोक्तं श्रीमद्भागवतमहापुराणे१९-[19]

**एवं प्रलब्धा मुनयस्तानूचुः कुपिता नृप। जनयिष्यति वो मन्दा मुसलं कुलनाशम्।।**

कथानुसारं स मुसल एव कालान्तरे वृष्णीनां नाशस्य कारणमभवत् । मुसलयोगोऽयमन्यत्रापि एवमेव प्रकारेण कथितम् - [20] **रवौ लग्ने व्यये मन्देऽष्टमेऽब्जे मुसलाभिधः।**
**तत्रोढा या कुमारी सा कुलमारी भवेद्ध्रुवम् ।।**


मुसलयोगः




गजयोगः २१-[21]

**गुरौ धर्मे बुधे मूर्तौ लाभे मन्दे गजाभिधः। परिणीतेह वामा श्रीसाध्वी धर्मार्थदायिनी।।**

केन्द्रे त्रिकोणे च गुरुबुधशुक्राणां स्थितिरतीवोत्तमा कथिता। यथा पूर्वमप्युक्तं एषां मध्ये यद्येकोऽपि ग्रह केन्द्रे (सप्तमस्थानं परित्यज्य) त्रिकोणे वा स्थितस्तदा विवाहलग्नस्य विविधानां दोषाणां नाशो जायते । गजयोगः-




इत्थं विवाहलग्ने विविधाः ग्रहनिर्मिताः शुभाशुभयोगाः सन्ति, येषां वरवध्वोर्दाम्पत्यजीवने निश्चयेन प्रभावो भवति।

---

18. विवाहवृन्दावनम् - ११ / ११
19. श्रीमद्भागवतमहापुराणम् - ११.१.१६
20. मुहूर्तगणपतिः विवाहप्रकरणम् - २४७
21. तत्रैव - २४२

# सन्ततिविचारः तत्प्राप्त्युपायाश्च

**डॉ.अरुणकुमारः**
सहायकाचार्यः, ज्योतिषविभागः
हिमाचल-आदर्शसंस्कृतमहाविद्यालयः, जांगला
रोहड़ू, शिमला, हिमाचलप्रदेशः - 171214

भारतीयमनीषिभिः प्रतिपादितं ज्योतिषज्ञानं सुमेरोरारभ्य क्षीरसागरपर्यन्तं सर्वेषामपि भारतीयानां जन्मकालादारभ्य मृत्युपर्यन्तं सर्वेषु कार्येषु मार्गदर्शनं करोति। इदं हि ज्योतिषशास्त्रं सिद्धान्त-संहिता-होराभेदेन त्रिस्कन्धात्मकं वर्तते। तद्यथा-[1]

**ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं**
**तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता ।**
**स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ**
**होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ।।**

उपर्युक्तेषु स्कन्धेषु यद्यपि भिन्न-भिन्नविषयाः विचार्यन्ते, तत्रापि होरास्कन्धे विनिश्चितस्य फलविचारः क्रियते। पूर्वार्जितं कर्म परकाले भाग्यरूपेण परिणमति। अन्य जन्मनि प्रारब्धक्रियमाण-सञ्चितकर्मानुसारेण भगवता ग्रहर्क्षाणां जन्माङ्गचक्रे गतिस्थितिवशाद् उचितानुचितकर्म निर्दिश्यत इत्युक्तं होराशास्त्रस्य प्रयोजनकथनावसरे त्रिस्कन्धज्ञेन आचार्यवराहमिहिरेण-[2]

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ।**
**व्यञ्ज्यति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ।।**

अतः पूर्वजन्मनि अर्जितानां शुभाशुभकर्मणां प्रभावात् जन्मकालिकग्रहस्थित्यनुगुणमनेके तादृशयोगाः मानवजीवने सञ्जायन्ते यैः योगैः मानवः स्वजीवने सुखानुभवं दुःखानुभवञ्च करोति। तेष्वेव योगेषु सन्ततियोगोऽपि अतीवमहत्त्वाधायकं स्थानमावहति। अतोऽत्र सन्तति-प्रतिबन्धकयोगाः तत्परिहाराश्च संक्षेपेण विमृश्यन्ते।

कस्यापि जातकस्य शुभाशुभफलविचारः तन्वादिद्वादशभावैः क्रियते। ज्योतिषशास्त्रे तन्वादयो द्वादशभावाः प्रसिद्धाः सन्ति । यथा - तनुः, धनं, भ्राता, सुखं, पुत्रः, रिपुः, स्त्री, मृत्युः, धर्मः, कर्म, आयः, व्ययश्चेति। यथा- [3]

**तनुर्धनं ततो भ्राता सुखं पुत्ररिपुस्त्रियः। मृत्युर्भाग्यं राज्यलाभौ व्ययो भावाः क्रमादिमे।।**

---

1. बृहत्संहिता 1-9
2. लघुजातकम् 1-3
3. भावप्रकाशः 1-7

तत्र तन्वादिद्वादशभावेषु यस्य भावस्याधिपतिः पूर्णबलवान् भवेत्, यो भावः स्वस्वामिना शुभग्रहेण वा युतो दृष्टो वा भवेत् तस्य भावस्य वृद्धिर्भवति। एतद्विपरीतं यस्य भावस्याधिपतिः बलरहितः, पापग्रहेण यतः दृष्टः वा भवेत् तस्य भावस्य हानिर्जायते। यथोक्तमपि आचार्येण षट्पञ्चाशिकायाम्-[4]

**यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्यास्ति वृद्धिः ।**
**पापैरेवं तस्य भावस्य हानिर्निर्देष्टव्या पृच्छतो जन्मतो वा ।।**

अपि च [5] -

**तन्वादयो भावबलं वदन्ति यत्स्वामिसम्पूर्णबलैः समेतः ।**
**युक्तेऽथ दृष्टे शुभदृग्युते च क्रमेण तद्भावविवृद्धिकारी ।।**

एतेष्वेव तन्वादिद्वादशभावेषु पञ्चमभावः सन्ततिभावनाम्ना ज्ञायते। अर्थात् पञ्चमभावात् सन्ततेर्विचारो विधीयते। अतः पञ्चमभावान्तर्गतः सन्ततिविचारः अत्र संक्षेपेण प्रस्तूयते।

पञ्चमभावः सुतः, तनयः, बुद्धिः, धीः, विद्या, सन्ततिः, आत्मजः, वाक्स्थानं, तनुजः, मन्त्रः, सन्तानादि-संज्ञया ज्ञायते। लग्नात् चन्द्राद्वा यो पञ्चमभावः तस्मात् मुख्यरूपेण सन्ततिविचारो विधीयते। न केवलं सन्ततिविचारः अपितु मन्त्रवचन-गद्यपद्यप्रवीणतामतिवृद्धिनीतिविनयप्रबन्धादीनां विचारोऽपि पञ्चमभावादेव क्रियते। यथा -[6]

**पुत्रमन्त्रवचनप्रवीणता गद्यपद्यमतिवृद्धिमङ्गजात् ।**
**मातुलादरिचतुष्पद्व्रणव्रातभीतिसमरादि चिन्तयते ।।**

तथा च -[7]

**बुद्धिप्रबन्धात्मजमन्त्रविद्या विनयगर्भस्थितिनीतिसंस्थाः ।**
**सुताभिधाने भवने नराणां होरागमज्ञैः परिचिन्तनीयाः ।।**

सूर्यादिग्रहेषु बृहस्पतिः पञ्चमभावस्य कारकः भवति। अतः बृहस्पतेरपि सन्तति विचारः क्रियते। प्रसङ्गेनात्र तन्वादिद्वादशभावानां कारका उच्यन्ते- [8]

**तरणिरमरमन्त्री मङ्गलश्चन्द्रसौम्यो गुरुरथ शनिभौमौ शुक्र-आर्किः क्रमेण ।**
**अमरगुरुदिनेशौ मन्दभानुज्ञजीवाः सुरगुरुरपि मन्दः कारकाः स्युर्विलग्नात् ।।**

भावानं कारकादिविचारे आचार्येषु मतवैभिन्न्यमपि परिलक्ष्यते । तद्यथा - [9]

**सूर्यो गुरुः कुजः सोमो गुरुभौमः सितः शनिः ।**
**गुरुरुश्चन्द्रसुतो जीवो मन्दश्च भावकारकाः ।।**

---

4. षट्पञ्चाशिका 1-3
5. मानसागरी 2
6. भावप्रकाशः 3-3
7. भावकुतूहलम् 6-3
8. भावप्रकाशः, भावकारकाध्यायः
9. बृ.पा.हो. 33-34

अपि च जातकतत्वे -[10]

अर्को जीवः कुजश्चन्द्रज्ञौ गुरुः मन्दारौ शुक्रः शनिः सूर्येज्यौ ज्ञार्केज्यमन्दा जीवः शनिरिति क्रमात् तन्वादिकारकाः।

अत्र शोधपत्रेऽस्मिन् पञ्चमभावान्तर्गतः सन्ततिविचारः मुख्यरूपेण प्रतिपाद्यते, यतोहि मानवजीवने सर्वेष्वपि विषयेषु मुख्यविषयः वर्तते। अतस्तदत्र संक्षेपेणोपस्थाप्यते -

सन्ततिविचारः - पञ्चमाधिपतिः पञ्चमस्थाने भवेदथवा पञ्चमेशः पञ्चमभावमवलोकयेत् तथा पञ्चमस्थानं शुभग्रहयुतं भवेत्तदा जातकाय सन्ततिलाभो जायते । तथैव लग्नपञ्चमयोः शुभग्रहाः भवेयुः गुरुश्च पञ्चमे, दशमे, एकादशे वा स्यात्तदापि विवाहानन्तरं शीघ्रमेव पुत्रोत्पत्तिर्जायते। तद्यथा -[11]

**लग्ने शुभे ग्रहे पुत्रे शुभाक्रान्ते सुतो भवेत् ।**
**पञ्चमे दशमे लाभे गुरौ वा बलसंयुते ।।**

पञ्चमाधिपतिर्भूत्वा पूर्णबलयुतः गुरुः लग्नेशेन दृष्टः स्यात्तदा जातकः पुत्रयुक्तः भवति। पञ्चमेशलग्नेशयोः परस्परं व्यत्ययसम्बन्धेनापि सन्ततिप्राप्तिर्जायते। यथा -[12]

**पुत्रेशेज्ये बलिनि लग्नेशदृष्टे पुत्राप्तिः ।**
**पुत्राङ्गपावन्योन्यभगौ वा युतौ पुत्राप्तिः ।।**

**सन्ततिप्रतिबन्धकयोगाः**- पञ्चमेशः यदि पञ्चमस्थानं नावलोकयेत्, पञ्चमस्थानं पापयुतं पापदृष्टं गुरुदृष्टिरहितं च स्यादथवा पञ्चमेशो शुभदृष्टियुतिरहितो क्रूराक्रान्तः स्यात्तदा जातकः सन्ततिसुखरहितः जायते। पञ्चमेशः बलरहितः पापयुतः अस्तङ्गतः वा भवेत्तदा तस्य जातकस्य पुत्रः न सम्भवति। भवेच्चेदपि सद्यः मरणं भवति। तद्यथा- [13]

**दुर्बलो पापसंयुक्ते पञ्चमेशेऽस्तगेऽपि वा ।**
**आत्मजो न भवेत्तस्य जातोऽपि म्रियते क्षणात् ।**
**पञ्चमस्थेन भौमेन सन्ततिः पुनः पुनः नाशमायाति ।**

पञ्चमस्थः सूर्यः हतापत्ययोगं मृतापत्ययोगं च सञ्जनयति। पञ्चमभावे मंगलः भावे भवेत्तदा पुनः पुनः सन्ततिनाशं करोति तथा पञ्चमस्थः सूर्यः हतापत्यं मृतापत्यं च योगं जनयति। तद्यथा- [14]

**नन्दने मङ्गलो जातं जातं हन्ति सुतं बलात् ।**
**हतापत्यं मृतापत्यं कुरूते पञ्चमे रविः ।।**

गुरुः शुक्रो वा नीचस्थः बुधः समराशिस्थः, सूर्यः विषमस्थः भवेत्तदापि जातकः सन्ततिसुखं

---

10. जा.त. 1-65
11. भावकुतूहलम् 6-8
12. जातकतत्वम् 5-168,172
13. भा. प्र. 5-17
14. भा.प्र. 5-18

नाप्नोति तद्यथा-[15]

**नीचे गुरौ भृगौ वापि समे ज्ञे विषमे रवौ ।**
**तदा पुत्रसुखं न स्यादित्युक्तं गणकोतमैः ।।**

अपि च पराशरः -[16]

**सुतेशेऽस्तङ्गते वाऽपि पापाक्रान्ते च निर्बले ।**
**तदा न जायते पुत्रो जातो वा म्रियते ध्रुवम् ।।**

यस्य स्त्रीजातकस्य जन्माङ्गचक्रे पञ्चमेशः त्रिकस्थः नीचगतः पापयुतश्च भवेत् सा कन्या काकवन्ध्या (सन्ततिरहिता) भवति। विशिष्य अस्मिन् योगे शनियुत्या स्त्री अनपत्यतामाप्नोति तद्यथा-[17]

**नीचे पुत्रेशे षष्ठादित्रयगे पापयुते काकवन्ध्या ।**
**पुत्रेशे नीचे मन्दयुते काकवन्ध्या ।।**

त्रिकगतः वीर्यहीनवीर्यः पञ्चमेशः भौमकेतुबुधशनिभिर्युतः अनपत्यतायोगं जनयति। यथा आचार्यपराशरः -[18]

**षष्ठस्थाने सुताधीशे लग्नेशे कुजसंयुते ।**
**म्रियते प्रथमापत्यं काकबन्ध्या च गेहिनी ।।**
**सुताधीशो हि नीचस्थो व्ययषष्ठाष्टमस्थितः ।**
**काकबन्ध्या भवेन्नारी सुते केतुबुधौ यदि ।।**
**सुतेशो नीचगो यत्र सुतस्थानं न पश्यति ।**
**तत्र सौरिबुधौ स्यातां काकबन्ध्यत्वमाप्नुयात् ।।**

पञ्चमेशसप्तमेशनवमेशानां नवांशेशाः पापग्रहयुताः क्रूरराशियुताः वा भवेयुस्तदापि पुत्रनाशः सम्भवति। [19]

**भाग्यपुत्रकलत्रेशसंयुक्तनवभागपाः।**
**पापांशगाः पापयुताः पुत्रनाशं वदेत्तदा ।।**

**शापद्वारासन्ततिविनाशः** - जातकस्य जन्मकुण्डल्यां पञ्चमस्थः राहुः भौमेन दृष्टः भवेदथवा मेषस्थः वृश्चिकस्थः वा राहुः पञ्चमस्थाने भवेत्तदा सर्पशापाद् सन्ततिक्षयो भवति । तथैव पञ्चमस्थः शनिः चन्द्रदृष्टियुतः स्यात्तथा पञ्चमेशः राहुणा युतो भवेत्तदा सर्पशापादनपत्यता विज्ञेया ।

एवं पञ्चमस्थानं, पञ्चमेशः, लग्नं पञ्चमभावकारकग्रहः वा कथंचिदपि भौमराहुकेतुभिः सम्बन्धं

15. भा.कु. 6-8
16. बृ. पा. होराशास्त्रम्
17. जा. त. 5-190,191
18. बृ. पा. हो. 17-4,5,6
19. सर्वार्थचिन्तामणिः 5-15

स्थापयति चेत् सर्पशापाद् सन्तानहानिर्वक्तव्या। तद्यथा- [20]

**सुते राहौ भौम दृष्टे भौमभे वा सर्पशापाद्विपुत्रः ।**
**यमे सुते चन्द्रदृष्टे सुतेशे राहुयुते सर्पशापाद्विपुत्रः ।**
**राहुकेतुयुते दृष्टे पञ्चमे बलवर्जिते ।**
**तदीशे वा तथा प्राप्ते सर्पदोषात्सुतक्षयः ।।**

सूर्यः पञ्चमेशो भूत्वा पापमध्यगः पापयुतः पापदृष्टः वा त्रिकोणस्थः स्यात्तदा पितृशापवशाद्विपुत्रत्वं सम्भवति। दशमेशः दशमस्थानं क्रूरयुतं स्यात्, बृहस्पतिः सिंहस्थः भवेत्, पञ्चमेशः सूर्ययुतः स्यात्, पञ्चमस्थानं लग्नं च क्रूराक्रान्तं भवेत्तदापि पितृशापद्वारा सन्ततिकष्टं भवति। तद्यथा- [21]

**पुत्रपेऽर्के क्रूरान्तरे त्रिकोणे पापयुतदृष्टे पितृशापाद्विपुत्रः ।**
**सिंहेज्ये पुत्रेशेऽर्कयुते पुत्राङ्गगौ पापौ पितृशापाद्विपुत्रः ।।**

अपि च जातकपारिजाते-[22]

**नवमे पापसंयुक्ते मन्दयुक्ते सुताधिपे ।**
**त्रिकोणे मान्दि संयुक्ते पितृदोषात्सुतक्षयः ।।**

यदि जातकस्य जन्माङ्गचक्रे क्रूराग्रहाः चतुर्थभावस्थाः भवेयुः, पञ्चमेशः शनियुक्तः स्यात्तथा अष्टमद्वादशयोरपि क्रूरग्रहाः स्युस्तदा मातृशापाद् अपत्यहानिर्जायते। तद्यथा-[23]

**मातृस्थानगते पापे सुतेशे मन्दसंयुते ।**
**व्ययनाशगते पापे मातृदोषात्सुतक्षयः ।।**

चन्द्रः पुत्रेशो भूत्वा नीचस्थः पापमध्यगः भवेत्, चतुर्थपञ्चमयोः क्रूरखेचराः भवेयुस्तदा मातृशापाद् सुतक्षयः सञ्जायते। शनिरेकादशस्थः, पापाः चतुर्थगाः, नीचस्थः चन्द्रः पञ्चमस्थः स्यात्तदाऽपि मातृशापात् सन्तति हानिर्सम्भवति - [24]

**पुत्रस्थानाधिपे चन्द्रे नीचे वा पापमध्यगे ।**
**हिबुके पञ्चमे पापे मातृशापात् सुतक्षयः।।**
**लाभे मन्दसमायुक्ते मातृस्थाने शुभेतरे ।**
**नीचे पञ्चमगे चन्द्रे मातृशापात् सुतक्षयः।।**

यस्य जातकस्य जन्मकाले पञ्चस्थानं राहुणा केतुना वा युतः दृष्टः वा भवेत्तथा पञ्चमभावः स्वयमपि वीर्यहीनः स्याच्चेत् सर्पदोषात् सन्ततिनाशः सम्भवति। सुतेशः राहुयुतः, शनिः सुतस्थः भवेत्तत्र च चन्द्रयुतिः दृष्टिः वा स्यात्तदापि सर्पदोषेण सन्ततिप्रतिबन्धकयोगः सञ्जायते। पञ्चमस्थः राहुः भौमदृष्टः

20. जा. तः 5-85, 86
21. जा. त. 5-93,95 ,जा.पा.13-35
22. जातकपारिजाते
23. जा.पा. 13-35
24. बृ.पा.हो. 85-34,35 जा.पा. 13-36,

स्यादथवा मेषस्थः वृश्चिकस्थः राहुः पञ्चमस्थाने भवेत्तदापि सर्पदोषोऽवगन्तव्यः। तद्यथा-[25]

**राहुः केतुयुते दृष्टे पञ्चमे बलवर्जिते ।**
**तदीशे वा तथा प्राप्ते सर्पदोषात्सुतक्षयः ।।**
**पुत्रेशे राहुसंयुक्ते पुत्रस्थे भानुनन्दने ।**
**चन्द्रेण संयुक्ते दृष्टे सर्पदोषात्सुतक्षयः ।।**
**सुते राहौ भौमदृष्टे भौमभे वा सर्पशापाद्विपुत्रः ।**

शनिगृहे स्थितः सूर्यः यदि पापेन दृष्टः भवेत्तथा लग्नमपि क्रूरग्रहवर्गेऽस्थितं भवेत्तदा कुलदेवदोषात्सन्ताननाशः सम्भवति । शत्रुगृहगः शनिः सूर्यचन्द्रबुधैः दृष्टः, लग्नमपि पापदृष्टं भवेत्तदा कुलदेवशापवशात् सन्तानहानिर्जायते तद्यथा-[26]

**मन्दालयेऽर्के खलदृष्टियुक्ते लग्नेऽपि वा पापखगस्य वर्गे ।**
**अपत्यहानिः कुलदेवकोपात्पुरातनैरङ्गभृतां निरुक्ताः ।।**
**मन्दोऽरिगेहे ज्ञेन्दुसूर्यदृष्टे लग्ने पापदृष्टे कुलदेवदोषाद्विपुत्रः ।**

**सन्ततिप्राप्त्युपायाः** - ज्योतिषशास्त्रस्य इदमेव वैशिष्ट्यं वर्तते यदत्र न केवलं शुभाऽशुभयोगा एव वर्णिताः भवन्तिऽपितु क्रूरग्रहकृद्दुर्योगानां परिहारोपायापि दैवज्ञैः प्रतिपादिताः भवन्ति। ये ग्रहा अशुभफलदाः भवन्ति ते होमदानजपपूजनादिभिः शान्तिमधिगच्छन्ति । तद्यथा-[27]

**येऽपि दुष्टफलकारका ग्रहास्तेऽपि पूजनादिना दानजपः ।**
**सत्फलं परिदिशन्ति हर्षिता वच्मि दानविधिमादरादतः ।।**

एवं सन्ततिप्रतिबन्धकयोगानां परिहाराय अपि आचार्यैः अनेके उपायाः ज्योतिषशास्त्रग्रन्थेषु प्रतिपादितास्सन्ति। यदि जन्माङ्गचक्रे सन्ततिप्रतिबन्धकः चन्द्रः भवेत्तदा देवदोषेण, सूर्यगुरौ स्यातां तदा पितृदोषेण, भौमेन यक्षदोषेण बुधेन प्रतिबन्धकत्वेन प्रेतदोषेण सन्ततिप्राप्तौ बाधा उत्पद्यते । तथैव शुक्रकृत्प्रतिबन्धकयोगेन वीर्यदोषः, शनिना रजदोषः तथा राहुकेतुभ्यां भ्रूणहत्यादोषो विज्ञेयः। तद्यथा-[28]

**चन्द्रे तु देवतादोषः पितृदोषोऽर्कजीवयोः ।**
**मंङ्गले यक्षकृद्दोषः सौम्ये भूतभवोमतः ।।**
**शुक्रे शुक्रकृतो दोषो मन्दे योनिकृतो भवेत् ।**
**राहौ केतौ भ्रूणहत्या दोषः सद्भिर्निरूपितः ।।**

तत्र सूर्य अनपत्यकारकः स्यात्तदा हरिवंशपुराणस्य पारायणेन उत वा श्रवणेन शान्तिर्भवति। सन्ततिप्राप्तिर्जायत इत्याशयः। राहुकृतदोषे कन्यादानेन, केतौ कपिलाधेनुदानेन, शनिभौमयोः रुद्राभिषेकेन

25. भा.कु. 6-13,जा.त.5-106
26. भा. प्र. 12-1
27. बृ. पा. हो. 85-18
28. बृ. पा.हो. 85-31,32

सन्तानप्राप्तिर्जायते। तद्यथा-[29]

**हरिवंशौ रवौ प्रोक्तः कन्यादानं तु राहुणा ।**
**केतुना कपिलादानं रुद्रपाठः शनौ कुजे ।।**

एवं विविधशापयोगोपशमनाय अनेके परिहाराः प्रतिपादिताः वर्तन्ते। तद्यथा सन्ततिबाधायां सर्पदोषे सति सुवर्णनागप्रतिमां निर्माय प्रतिष्ठापनं कृत्वा वैदिकविधिना नागपूजनपुरस्सरं गो-भूमि-तिल-सुवर्णादिपदार्थानां स्वसामर्थ्यनुगुणं दानकरणेन सर्पदोषः नश्यते सन्ततिश्च प्राप्यते। तद्यथा-[30]

**स्वगृहोक्तविधानेन प्रतिष्ठां कारयेत् सुधीः ।**
**नागमूर्ति सुवर्णेन कृत्वा पूजां समाचरेत् ।।**
**गो-भू-तिल-हिरण्यादि दद्यात् वित्तानुसारतः ।**
**एवं कृते तु नागेन्द्र-प्रसादात् वर्धते कुलम् ।।**

ग्रहयोगवशात् पितृशापेन वा सन्तानावरोधः दृष्टिपथमायाति चेत्तद्दोषोपशमनार्थं गयातीर्थं सम्प्राप्य विप्रभोजन-पुरस्सरं श्राद्धकर्म कारयेदथवा कन्यादानं गोदानं वा कुर्यात्। एवं कृते सति पितृशापनिवृत्तिपूर्वकं सुसन्ततिः प्राप्यते तद्यथा- [31]

**तद्दोषपरिहारार्थं गयाश्राद्धं च कारयेत् ।**
**ब्राह्मणान् भोजयेदत्र अयुतं वा सहस्रकम् ।।**
**अथवा कन्यकादानं गोदानं च समाचरेत् ।**
**एवं कृते पितुः शापान्मुच्यते नाऽत्र संशयः ।।**

मातृशापोपशमनाय समुद्रे स्नात्वा अत्यल्पदुग्धपानमात्रं कृत्वा लक्षसंख्यकं गायत्रीजपं कृत्वा ग्रहदानं विप्रभोजनदानं च कृत्वा श्रद्ध्या च अश्वत्थस्य सहस्रोत्तरशतम् प्रदक्षिणाः क्रियन्ते चेदवश्यं पुत्ररत्नं प्राप्यते -तद्यथा-[32]

**सेतुस्नानं प्रकर्तव्यं गायत्री लक्षसंख्यका ।**
**रौप्यमात्रं पयः पीत्वा ग्रहदानं प्रयत्नतः ।।**
**ब्राह्मणान् भोजयेतद्वदश्वत्त्थस्य प्रदक्षिणम् ।**
**कर्तव्यं भक्तियुक्तेन चाष्टोत्तरसहस्रकम् ।।**
**एवं कृते महादेवि शापान्मोक्षो भविष्यति ।**
**सुपुत्रं लभते पश्चात् कुलवृद्धिश्च जायते ।।**

अनेन विधिना शापविमुक्त्युपाया ज्योतिषशास्त्रे बहुधा निरूपिताः वर्तन्ते, येषामाश्रयेण जनाः विविधेभ्यः शापेभ्यः मुक्ताः सुसन्ततिं प्राप्नुवन्ति । तद्यथा राहुदोषे कन्यादानेन, रविदोषे विष्णुसेवया,

29. भा.प्र.5-31
30. तत्रैव 48,49,50
31. भा. कु. 6-19,20
32. भा. प्र,.5-32,33

केतुदोषे कपिला धेनुदानेन भौमदोषे च रुद्राभिषेककर्मणा सन्ततिः प्राप्यते । अपि च सर्वविधदोषपरिहारार्थं सन्तानगोपालनुष्ठानद्वारा अथवा भौमव्रतेन अथवा कामदेवव्रतेनापि शान्तिः भवति। तद्यथा-[33]

**राहुणा कन्यकादानं भानुना हरिकीर्तनम् ।**
**शिखिना कपिलादानं मन्दाराभ्यां षडङ्गकम् ।।**
**सर्वदोषविनाशाय सन्तानहरिपूजनम् ।**
**कुर्याद्भौमव्रतं चापि कामदेवव्रतं नरः ।।**

एवमुपर्युक्तविवेचनेन सिद्ध्यति यज्ज्योतिषशास्त्रं आधुनिकेऽस्मिन् वैज्ञानिकयुगेऽपि सामाजिकेषु स्वभौतिकक्लेशानाम् उपशमनाय शास्त्रीयं, भावनात्मकं, लोकोपकारकं च मार्गं निर्दिशति, येन न केवलं जनानां क्लेशा एव नष्टाः भवन्ति, अपितु तेषां शास्त्रनिष्ठा, परोपकारभावना, जनसेवाभावना अपि वर्धते । इत्थं ज्योतिषशास्त्रं न केवलं प्राणिनां लौकिकमेव उन्नतिं साधयति अपितु पारलौकिकोन्नतिमपि साधयतीति इत्यत्र नास्ति कश्चन संशीतिलेशः ।

**देवालये गेहारम्भे जलाशयादिनिर्माणे विदिगवस्थितो राहुमुखविचारः-**

| **राहुमुखम्** | **ऐशान्याम्** | **वायव्याम्** | **नैर्ऋत्याम्** | **आग्नेय्याम्** |
|---|---|---|---|---|
| **देवालये** | मीन-मेष-वृषभस्थे सूर्ये राहुमुखम् | मिथुन-कर्क-सिंहस्थे सूर्ये राहुमुखम् | कन्या-तुला-वृश्चिकस्थे सूर्ये राहुमुखम् | धनु-मकर-कुम्भ-राशिस्थिते सूर्ये राहुमुखम् |
| **गेहे** **गृहनिर्माणे** | सिंह-कन्या-तुला- राशिस्थिते सूर्ये राहुमुखम् | वृश्चिक-धनु-मकरस्थे सूर्ये राहुमुखम् | कुम्भ-मीन-मेषस्थे सूर्ये राहुमुखम् | वृष-मिथुन-कर्क-राशिस्थिते सूर्ये राहुमुखम् |
| **जलाशये** | मकर-कुम्भ-मीन-राशिस्थिते सूर्ये राहुमुखम् | मेष-वृष-मिथुनस्थे सूर्ये राहुमुखम् | कर्क-सिंह-कन्या-राशिस्थे सूर्ये राहुमुखम् | तुला-वृश्चिक-धनु-राशिस्थिते सूर्ये राहुमुखम् |
| **खातः-** | **अग्निकोणे** | **ईशानकोणे** | **वायव्यकोणे** | **नैर्ऋत्यकोणे** |

33. भावप्रकाशः ५/३२-३३

# शैक्षणिकसंस्काराणां मानवजीवने प्रभावः

**डॉ. रमेशशर्मा**
सहायकाचार्यः (ज्यौतिषम् )
राजकीयनेहरुसंस्कृतमहाविद्यालयः, फागली
शिमला, हिमाचलप्रदेशः

भारतीयसंस्कृतेः मूलमस्ति संस्काराः, येषु समग्रमानवतायाः विकासस्तथा च शारीरिकमानसिकाध्यात्मिकनैतिकोन्नतिभिः सार्धं दिव्यगुणाः विद्यमानाः सन्ति । उक्तञ्च मनुना-[1]

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।।**

अत एव संस्काराणां प्रभावेण मानवदेहोऽयं ब्रह्मज्ञानप्राप्तियोग्यो भवति। यथोक्तम्-[2]

**स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः ।**
**महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ।।**

**संस्कारस्य स्वरूपम् -** संस्क्रियतेऽनेन श्रौतेन कर्मणा स्मार्तेन वा पुरुष इति संस्कारः। 'सम्' उपसर्गपूर्वकात् 'कृञ्' धातुना 'घञ्' प्रत्ययकृते 'संपरिभ्यां करोतौ भूषणे' सूत्रेण सुडागमेन संस्कारशब्दस्य निष्पत्तिर्भवति। अस्य प्रयोगः शिक्षणं, प्रशिक्षणं, अनुशीलनं, संस्करणं, संस्मरणं, परिष्करणम्, आभूषणं, शुद्धिकरणम्, अभिषेकं, धार्मिकानुष्ठानं, धारणा, भावना, विचारादयः विविधेष्वर्थेषु भवति। अत एव सनातनधर्मे उत्पादिताः चित्तशुद्धिहेतुकाः क्रियाः संस्कारनाम्ना व्यवह्रियन्ते। आचार्यचरकेण गदितं यत्- **"संस्कारो हि गुणान्तराधानमुच्यते"**।[3] अर्थात् दोषाणां परिष्करणं गुणानामाधानमिति क्रियायाः नाम संस्कारः। संस्कारप्रकाशानुसारेण संस्कारस्य परिभाषा एवमस्ति- **"आत्मशरीरान्यतरनिष्ठो विहितक्रियाजन्योऽतिशयविशेषः संस्कारः"** [4] अत्र संस्कारस्यार्थः परिष्करणं वर्तते। येन मानवस्य अन्तर्बाह्य सर्वविधशुद्धिर्भवति। मुख्यतः संस्काराणां मूलोद्देश्य त्रिविधरूपेण परिलक्षितं भवति।

**1. मलापनयनम्, 2. अतिशयाधाननम्, 3. हीनांगपूर्तिः** ।

**1. मलापनयनम्-** गर्भाधानजातकर्मान्नप्राशनादिसंस्काराणामुद्देश्यं मलापनयनं शारीरिकदोष-मार्जनं च वर्तते ।

**2. अतिशयाधाननम्-** उपनयनब्रह्मव्रतसमावर्तनादिसंस्कारामामुद्देश्यं अतिशयाधानं अर्थात् अन्तःकरणशुद्धिः तथा च अन्तःकरणे विशेषगुणानां स्थापनं वर्तते ।

1. मनुस्मृति. अ. 2 श्लो. 20
2. मनुस्मृति. अ. 2 श्लो. 28
3. चरकसंहिता, विमान. 1/27
4. संस्कारप्रकाशः

3. हीनांगपूर्तिः विवाहाग्न्याधानादिसंस्काराणामुद्देश्यं जीवनस्य हीनांगपूर्तिः भवति। एवं संस्काराणां अनेकविधिना मानवजीवनस्य परिष्करणं शुद्धिकरणं च कृत्वा मानवतायाः प्राप्त्यर्थं मानवाः समर्थाः भवन्ति।

**संस्काराणां संख्या** [5]– आश्वलायनगृह्यसूत्रे दशसंस्काराणां, बौधायन-पास्कर-वाराह गृह्यसूत्रे त्रयोदशसंस्काराणां, वैखानसगृह्यसूत्रे अष्टादशसंस्काराणां तथा च गौतमधर्मसूत्रे अष्टचत्वारिंशत् संस्काराणामुल्लेखः प्राप्यते। तेषु चत्वारिंशत्संस्काराः अष्टावात्मगुणाश्च सन्ति। ते च संस्काराः अष्टचत्वारिंशत्। महर्षि-अंगिरा-द्वारा प्रतिपादितानां पञ्चविंशतिः संस्काराणामुल्लेखः प्राप्यते। अत एव संस्कारविमर्शकप्रधानग्रन्थेषु संस्काराणां संख्या भिन्ना-भिन्ना प्राप्यते। परञ्च भारतीयसंस्कृतौ प्राधान्येन षोडश संस्काराः उपलभ्यन्ते। उक्तञ्च-[6]

**गर्भाधानं पुंसवनं सीमन्तो जातकर्म च ।**
**नामक्रियानिष्क्रमणेऽन्नाशनं वपनक्रिया ।।**
**कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः ।**
**केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः ।।**
**त्रेताग्निसंग्रहश्चेति संस्काराः षोडश स्मृताः ।**

एतेषु षोडशसंस्कारेष्वाद्य त्रयः संस्काराः प्राग्जन्मसंस्काराः सन्ति। अग्रिमाः षट्संस्काराः जातकर्मतः कर्णवेधपर्यन्तं शैशवसंस्काराः तथा च अग्रिमाः त्रयः संस्काराः उपनयन-वेदारम्भ-समावर्तन शिक्षासम्बन्धितशैक्षिकसंस्काराः सन्ति। तत्पश्चात् त्रयः संस्काराः आश्रमप्रवेशद्वारसंस्काराः सन्ति, तथा च जीवनस्य पारलौकिकयात्रायाः अन्तिमसंस्कारः अन्त्येष्टिसंस्कारः वर्तते।

उपनयन-वेदारम्भ-समावर्तन त्रयः संस्काराः विद्याध्ययनेन तथा च ब्रह्मचर्याश्रमेण सम्बद्धाः शैक्षणिकसंस्काराः सन्ति। एतेषां संस्काराणाम् आचरणेन मानवस्य सामाजिक-आध्यात्मिक-मनोवैज्ञानिक-नैतिकदृष्ट्या च सर्वांगीणं व्यक्तित्वनिर्माणं भवति। विद्याध्ययनकालं शिक्षणमतिरिच्य स्नातकस्य जन्मकालोऽप्युच्यते। "जन्म द्विधा, जन्मना विद्यया च" । उपनयनकाले आचार्यः ब्रह्मचारिणं गर्भरूपेण धारयति। उक्तञ्च [7]–

**आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः**

अतः विद्याकाले ब्रह्मचारिणः विद्या-यश-श्रीरूपत्रिरोचनानि धारयन्तः समस्तलोकान् प्रकाशयति। यथोक्तम्-[8]

**अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचानो अस्थात्।**

---

5. कल्याण संस्कार अंक पृ. सं. 210 एवं 211
6. व्याससमृतिः – 1/13-15
7. अथर्व. 11/5/3
8. ८. ऋग्वेदः 1/149/4

एवमेव मातापितरौ शरीरं जनयति, विद्यया यज्जन्म भवति तच्च श्रेष्ठः। यथा गदितम्- [9]

**स हि विद्यातः तं जनयति, तदस्य श्रेष्ठं जन्म। मातापितरौ तत् शरीरमेव जनयतः।**

अत एव शैक्षणिकसंस्कारेण विद्यया वा सर्वविधः पापान् निवारयति, आयुः वर्धते, सर्वसिद्धिः प्राप्यते, अन्ते विद्ययाऽमृतमश्नुते।

**विद्यया लुप्यते पापं विद्ययाऽऽयुः प्रवर्धते ।**
**विद्यया सर्वसिद्धिः स्याद्विद्ययाऽमृतमश्नुते ।।** [10]

विद्यारम्भसंस्कारः चौलकर्मानन्तरं करणीयम्- वृतचौलकर्मा लिपिं संख्यानं चोपयुञ्जीत। जन्मकालात् पंचमवर्षे विद्यारम्भसंस्कारः उपयुक्तो भवति। संस्कारमयूखे मार्कण्डेय वचनस्ति-

**प्राप्तेऽथ पञ्चमे वर्षे विद्यारम्भं तु कारयेत्।**

ज्योतिषशास्त्रे अक्षराम्भ एवं विद्यारम्भकृते शुभकालं मुहूर्तरूपेण एवमेव गदितम् – [11]

**गणेशविष्णुवाग्रमाः प्रपूज्य पञ्चमाब्दके**
**तिथौ शिवार्कदिग्द्विषट्शरत्रिके रवावुदक् ।**
**लघुश्रवोऽनिलान्त्यभादितीशतक्षमित्रभे**
**चरोनसत्तनौ शिशोर्लिपिग्रहः सतां दिने ।।**

चैत्रमासं विहाय उत्तरायणे स्थिते सूर्ये गणेशविष्णुवाग्रमाः एता देवता प्रपूज्य पञ्चमवर्षे सति बालकस्य अक्षरारम्भसंस्कारं करणीयम् तत्र तिथिनक्षत्रवारलग्नादिशुद्धिः एवमस्ति -

**अक्षरारम्भे शुभतिथयः** - 2,3,5,6,10,11,12

**अक्षरारम्भे विहितनक्षत्राणि-** हस्त, अश्विनी, पुष्य, श्रवणा, स्वाति, रेवती, पुनर्वसु, आर्द्रा, चित्रा एवं अनुराधा एतेषु दशनक्षत्रेषु अक्षरारम्भः उत्तमो भवति।

**वाराः-** चन्द्रबुधगुरुशुक्रशुभवासरे अक्षरारम्भसंस्कारः करणीयः ।

**शुभलग्नम्-** वृषः, मिथुनं, धनुः, मीनं चेति। जन्मलग्नाद् जन्मराशितः वा अष्टमस्थानं शुद्धं स्यात्। एवं प्रकारेण यदा कालशुद्धिः स्यात् तस्मिन्नेव काले अक्षरारम्भसंस्कारः उत्तमः स्यात्।

**विद्यारम्भमुहूर्तः-**

**मृगात्कराच्छुत्रेस्त्रयेऽश्विमूलपूर्विकात्रये**
**गुरुद्वयेऽर्कजीवविित्सितेऽह्नि षट्शरत्रिके ।**
**शिवार्कदिग्द्विके तिथौ ध्रुवान्त्यमित्रभे परैः**
**शुभेरधीतिरुत्तमा त्रिकोणकेन्द्रगैः स्मृता ।।** [12]

---

9. कल्याण संस्कार अंक पृ. सं. 222
10. कल्याण संस्कार अंक पृ. सं. 42
11. मुहूर्तचिन्तामणिः, संस्कारप्रकरणम् श्लो.सं. 37
12. मुहूर्तचिन्तामणिः, संस्कारप्रकरणम् श्लो.सं. 38

**विद्यारारम्भे विहितनक्षत्राणि-** मृगशिरा, आर्द्रा, पुनर्वसुः, हस्तः, चित्रा, स्वाती, श्रवणा, धनिष्ठा, शतभिषा, अश्विनी, मूलं, पूर्वाफाल्गुनी, पूर्वाषाढा, पूर्वाभाद्रपदा, पुष्यः, आश्लेषा एतेषु षोडशनक्षत्रेषु विद्यारम्भसंस्कारः करणीयः ।

**विद्यारारम्भे शुभतिथयः-** 2,3,5,6,10,11,12

**वाराः-** सूर्यबुधगुरुशुक्रवाराणां दिने विद्यारम्भसंस्कारः उत्तमः स्यात्।

**शुभलग्नम्-** वृषः, मिथुनं, धनुः, मीनं चेति । जन्मलग्नाद् जन्मराशितः वा अष्टमस्थानं शुद्धं स्यात्। केन्द्रत्रिकोणेषु शुभग्रहाः (चन्द्रबुधगुरुशुक्राः) स्युः ।

**उपनयनसंस्कारः-** संस्कारोऽयं व्रतबन्धसंस्कारोऽप्युच्यते। अस्मिन् संस्कारे यज्ञद्वारा पवित्रितं सूत्रं ब्रह्मचारी धारयति। यज्ञोपवीतधारणयोग्यः कालः वर्णानुसारेण भिन्नः-भिन्नः वर्तते। अत्र त्रिविधः कालः गदितः-

**विप्राणां व्रतबन्धनं निगदितं गर्भाज्जनेर्वाऽष्टमे**
**वर्षे वाप्यथ पञ्चमे क्षितिभुजां षष्ठे तथैकादशे ।**
**वैश्यानां पुनरष्टमेऽप्यथ पुनः स्याद् द्वादशे वत्सरे**
**कालेऽथ द्विगुणे गते निगदिते गौणं तदाहुर्बुधाः ।।** [13]

अत्र यज्ञोपवीतधारणार्थं द्विविधः कालः निगदितः। नित्यः काम्यश्च । ब्राह्मणानां जन्मकालादष्टमे वर्षे यज्ञोपवीतधारणकालः नित्यकालः तथा च पंचमे वर्षे यज्ञोपवीतधारणकालः काम्यकालः उच्यते। एवमेव क्षत्रियाणामैकादशवर्षे नित्यकालः षष्ठवर्षे काम्यकालः वर्तते। वैश्यानां द्वादशे वर्षे नित्यकालः अष्टमवर्षे काम्यकालः उच्यते। यद्यस्मिन् काले यज्ञोपवीतसंस्कारः न स्यात् तदा द्विगुणे व्यतीतकाले अर्थात् ब्राह्मणस्य षोडशवर्षपर्यन्तं, क्षत्रियाणां द्वाविंशतिवर्षपर्यन्तं, वैश्यानां चतुर्विंशतिवर्षपर्यन्तं यज्ञोपवीतसंस्कारः करणीयः। कालोऽयं गौणकालः उच्यते।

**व्रतबन्धमुहूर्तः -**

**क्षिप्रध्रुवाहिचरमूलमृदुत्रिपूर्वारौद्रेऽर्कवित्गुरुसितेन्दुदिने व्रतं सत् ।**
**द्वित्रीषुरुद्ररविदिक्प्रमिते तिथौ च कृष्णादिमत्रिलवकेऽपि न चापराह्णे ।।** [14]

उपनयने नक्षत्राणि- भरणी, कृत्तिका, मघा, विशाखा, ज्येष्ठा एतानि पञ्चनक्षत्राणि विहाय शेषेषु द्वाविंशतिनक्षत्रेषु व्रतबन्धसंस्कारः सत्स्यात् ।

**उपनयनतिथयः-** द्वितीयातृतीयापञ्चम्येकादशीद्वादशीदशमीसंज्ञितासु तिथिषु चोपनयनसंस्कारः शुभः स्यात् ।

**उपनयने वाराः-** सूर्यबुधगुरुशुक्रचन्द्रवाराः शुभाः सन्ति ।

**उपनयने लग्नशुद्धिः-** षष्ठाष्टमद्वादशस्थानं विहाय शुभग्रहाः स्थिताः स्युः, तृतीय-

---

13. मुहूर्तचिन्तामणिः, संस्कारप्रकरणम् श्लो.सं. 39

14. मुहूर्तचिन्तामणिः, संस्कारप्रकरणम् श्लो.सं. 40

षष्ठैकादशस्थाने पापग्रहाः स्युः, लग्ने वृषकर्कराशौ चन्द्रः स्यात्। तदा उपनयनसंस्कारः उत्तमः भवति।

**समावर्तनसंस्कारः**- विद्याध्ययनोपरान्तः समावर्तनसंस्कारः भवति। संस्कारोऽयं दीक्षान्त-संस्कारोऽप्युच्यते। उपनयनोक्ततिथिवारनक्षत्रदिवसेषु समावर्तनसंस्कारः करणीयः।

अन्ते वक्तुं शक्यते, यत् मानवजीवने शैक्षणिकसंस्काराणामत्यधिकः प्रभावः भवति। सर्वांगीण-व्यक्तित्वस्य निर्माणमस्मिन्नैवकाले भवति। एतैः संस्कारैः जीवने धार्मिकाध्यात्मिकबौद्धिकशक्तीनां संचारः भवति। अतः मानवजीवने सम्पूर्णतायाः प्राप्त्यर्थम् एते संस्काराः नितरामपेक्षिताः भवन्ति।

## धर्मार्जन/पुण्यार्जन की विशेषता :

**मानुष्यं वरवंशजन्मविभवो दीर्घायुरारोग्यता**
**सन्मित्रं सुसुतः सती प्रियतमा भक्तिश्च नारायणे।**
**विद्वत्वं सुजनत्वमिन्द्रियजयः सत्पात्रदाने रति-**
**स्ते पुण्येन विना त्रयोदश गुणाः संसारिणां दुर्लभाः।।**

**एवमेव**

**पुण्यतीर्थे कृतं येन तपः क्वाप्यतिदुष्करम् ।**
**तस्य पुत्रो भवेद्वश्यः समृद्धो धार्मिकः सुधी ।।**

(एकोनविंशोऽङ्कः २०२१-२२ पृष्ठसंख्या- 81)

# दृग्ग्रहसाधनोपयुक्तकालमानानां समीक्षणम्

**डा. अश्विनीपाण्डेयः**
सहाकाचार्यः (अतिथिः) ज्योतिषविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः
लखनऊ-परिसरः

अथ कल्पादितः सृष्ट्यादिकालं यत् भगवता सूर्येण स्वीकृतं तस्य कालमानस्य का उपयोगिता, किं तस्य वैशिष्टयम् इति प्रसंगाद् सर्वप्रथमं दृगग्रहाणां प्राग्गतेरुत्पत्तिनिर्धारणमावश्यकम्-

**ग्रहर्क्ष-देव-दैत्यादि सृजतोऽस्य चराचरम्।**
**कृताद्रिवेदा दिव्याब्दाः शतघ्ना वेधसो गताः।।**[1]

ग्रहर्क्षदेवदैत्यादीनां (ग्रह-नक्षत्र-देव-दानव-भू-भूधरादीनां) कल्पारम्भकालात् ४७४०० दिव्यवर्षावधिं सृष्ट्युपकरणानि सङ्कलय्य ततः परं सृष्टिः प्रचालिता ब्रह्मणेति भावः। तत्र यतः ३६० सौरवर्षैरेकं दिव्यवर्षमतः कल्पादितः सृष्टिकालं यावत् सौरवर्षाणि ४७४०० x ३६० = १७०६४०००।

अथात्र कल्पादितः (ब्रह्मदिनादितः) यावता कालेन सृष्ट्यादिस्तावत्कालानन्तरमेव कल्पान्तात् (ब्रह्मदिनान्तानन्तरं) सृष्ट्यन्तमिति समकालीनं ब्राह्म-सृष्टिकल्पद्वयं आमनन्ति कमलाकरभट्टादयो विबुधाः। परं न तद्भास्करादीनामभिमतम्। तेषां मते कल्पादि-सृष्ट्यादिकालयोरभेदात् । तथा चाह भास्कर[2]ः-

**यतः सृष्टिरेषां दिनादौ दिनान्ते लयस्तेषु सत्स्वेव तच्चारचिन्ता।**
**अतो युज्यते कुर्वते तां पुनर्येऽप्यत्स्वेषु तेभ्यो महद्भ्यो नमोऽस्तु।।**

वस्तुतो ब्रह्मदिनान्ते (कल्पान्ते) यतः सर्वेषामपि भूतानां लयेति तदानीं तेषां चिन्तैव केति भास्करकथनं युक्तमेव, परन्तु ब्रह्म-सृष्टिकल्पद्वयेऽपि कालस्य तुल्यत्वात् केवलं नामभेदाद् वस्तुभेदो भवतीत्यलम्।

विश्वस्योत्पत्तिस्थितिलयाः कस्मिंश्चित् निर्दिष्टे काले एव भवन्ति। अतः सकलचराचरजगदिदं कालस्य परिधौ निबद्धमस्ति। सम्पूर्णे वैदिकवाङ्मये कालस्य चर्चा प्रतिपदं दृश्यते। वेदोक्तयज्ञयागादिकर्मणां सम्पादनं कालज्ञानं विना न संभाव्यते। सौम्यायन–याम्यायन-विषुवद्–दर्श-पौर्णमास्यादिभिः कालनियामकैः पदार्थैः यज्ञयागादीनां प्रारम्भः सम्पूर्त्तिश्च निर्धारिता भवति। अस्मिन् यज्ञकर्मणि कालस्य महत्त्वमाधारीकृत्यैव अथर्ववेदे कालविषयकम् ''**कालसूक्तम्**'' प्राप्यते। कालसूक्तेऽस्मिन् कालमहिमा विस्तरेण वर्णिता अस्ति। वायु-जल-पृथिवी-सूर्यादयः सर्वे एव कालादुत्पद्यन्ते, काले एव एतेषां लयः अपि जायते। सम्पूर्णोऽयं ब्रह्माण्डः काले एव गतिमान् वर्तते। वैदिककाले सूर्यचन्द्रयोः गत्योः परिशीलनेन कालस्य विभिन्नघटकानां ज्ञानं कृतं ऋषिभिः। तत्र रविगतिगणनाया उदयक्षितिजे सूर्योदयाः वेधेन चिह्निताः। एतेषां माध्यमेन उत्तरायणस्य दक्षिणायनस्य विषुवद्बिन्दोश्च निर्धारणं जातम् । अनेन निर्धारणेन दिनानां माने न्यूनाधिक्य-क्रमोऽपि सारल्येन अवगतः। अनया रविगतिगणनया वर्ष-अयन-ऋतु-मास-पक्ष-दिनादीनां निर्धारणं जातम्। चन्द्रबिम्बस्य कलानां ह्रासवृद्धिः चान्द्रमासज्ञानमपि कालगणनायां सहायकमभवत्। पुराणेष्वपि बहुषु स्थलेषु कालविषयकचर्चा प्राप्यते। तत्र सूक्ष्मातिसूक्ष्मकालादारभ्य कल्पमानपर्यन्तं विभिन्नकालमानानां वर्णनं परिदृश्यते। श्रीमद्भगवद्गीतायामपि स्वयं भगवता श्रीकृष्णेन कालस्य उभयोः खण्डाखण्डात्मकयोः स्वरूपयोः प्रतिपादनं कृतम्। उक्तञ्च यथा– ''**अहमेवाक्षयः**

---


1. सूर्यसिद्धान्तः मध्यमाधिकरे श्लो. सं.
2. सि.शि.म., श्लो.सं.२४

**कालो**''[3] अहमेव अनादिरनन्ताखण्डात्मकमहाकाल अस्मि। यस्मिन् सकलजगदिदमुत्पद्यते संसरति विनाशमेति। यथा बीजगणितीयानन्तमानात्मकखहरराशौ किमपि योजनेन विशोधनेन च अन्तरं न आयाति, तथैव अस्मिन् अखण्डात्मके काले कदापि कोऽपि विकारो नायाति। ''**कालः कलयताम् अहम्**''[4] इत्यनेन कालस्यापरः, खण्डात्मकः, गणनात्मकः व्यावहारिकी सत्तायां प्रयुक्तः भेदः प्रतिपादितः। अथर्ववेदे वर्णितमस्ति यत् पूर्णोऽयं ब्रह्माण्डः काले एव गतिमान् वर्तते। पुराणेष्वपि बहुषु स्थलेषु कालविषयकचर्चा प्राप्यते। आचार्यलगधेन वेदाङ्गज्योतिषे कालस्य महत्त्वं निरूपयन् उक्तं यत् यज्ञार्थमभिप्रयुक्ताः वेदाः यज्ञादयः शुभमुहूर्त्तमपेक्षन्ते, तज्ज्ञानं च ज्योतिषशास्त्रेणैव भवितुमर्हति। अतः अस्यापरं नाम कालविधानशास्त्रमिति। तत्र आर्चज्योतिषे याजुष्ज्योतिषे च सौरचान्द्रनाक्षत्रसावनानि चतुर्विधकालमानानि व्यवहृतानि। सूर्यसिद्धान्तानुसारेण लङ्कायाम् अर्धरात्रिकाले रविवासरे कालप्रवृतिः जाता। ततः एव कालगणना जायते। अयं हि सृष्ट्यादिः। प्रलयं यावत् कलनात्मकः कालः महाकालस्य खण्डरूप इति। सूर्यसिद्धान्तेऽपि कालस्य कलनात्मकस्य नवविधमानानां वर्णनं प्राप्यते परन्तु तत्रापि एतेषां चतुर्णामेव कालमानानां व्यावहारिकत्वम् प्रतिपादितम्। तत्रापि चतुर्विधकालमानानामेव मुख्यत्वेन परिगणने मूलकारणमस्ति यत् जनाः दैनिकक्रियाकलापसम्पादनार्थमिमान् चतुर्विधकालान् स्वीकुर्वन्ति। यतोहि एषां प्रत्यक्षत्वेन सरलतया साधनं भवितुमर्हति। ''कल्'' सङ्ख्याने धातोः कर्त्तरि घञ् प्रत्ययेन निष्पन्नोऽयं कालशब्दः। गणनार्थे अस्य शब्दस्य प्रयोगः क्रियते। सूर्यसिद्धान्ते ये विषयाः प्रतिपादिताः ते सर्वे कालसापेक्षिताः सन्ति। अहर्गणादारभ्य नवविधकालमानपर्यन्तं सर्वं ज्ञानं कालसम्बद्धं वर्तते। भास्कराचार्योक्तसिद्धान्तलक्षणं सर्वं ज्ञानं कालसम्बद्धं वर्तते। भास्कराचार्योक्तसिद्धान्तलक्षणं 'त्रुट्यादिप्रलयान्त-कालकलना'[5] कालमहत्त्वं सूचयति। आचार्यवराहमिहिरेणापि दैवज्ञ-लक्षणप्रसंगे उक्तं यत् स एव दैवज्ञः यः कालवेत्ता। अयं च कालः द्विविधः खण्डाखण्डात्मकः। तत्र अखण्डकालः समेषां जड़चेतनानां संहारको, अपरश्च खण्डकालः कलनात्मकः। कलनात्मकोऽयं कालः ज्ञानविषयकः। अनेन कलनात्मककालेन विना सकलजगद्व्यापारः भवितुं न शक्यते ।

**१. कालः-** लोकान् नाशयति इति संहारात्मको भवाति, तथा च कलयतीति कालः अर्थात् गणनायां कालस्य प्रयोगो भवति।

**२. मूर्त्तकालः-** यस्य व्यावहारिकी सत्ता विद्यते सः व्यवहारयोग्यकालः मूर्त्तकालः। जगति प्रचलितः कालः मूर्त्तकालः भवति, अस्य प्रत्यक्षीकरणं सारल्येन भवति यथा प्राचीनमापकेषु घटीपलादयः तथा च आधुनिकप्रमापकेषु घण्टामिनटादयः मूर्त्तकालस्य उदाहरणानि सन्ति।

**३. अमूर्त्तकालः-** यस्य कालस्य गणनात्मकसत्ता एव विद्यते न तु व्यावहारिकी। अर्थात् जगति यस्य कालस्य प्रत्यक्षीकरणं सामान्यतया न सम्भवति, सः अमूर्त्तः कालः। यथा प्राचीनमापकेषु त्रुटिरेणुलवादय आधुनिकप्रमापकेषु च सेकेण्ड् इत्यस्मात् न्यूनः कालः। अस्य अमूर्त्तकालस्य प्रयोगः गणितीयप्रक्रियासु भवति। यद्यपि अत्याधुनिकयन्त्राणां साहाय्येन अतिसूक्ष्मामूर्त्तकालस्य गणना अपि सम्भाव्यते। वृत्तचित्रम्–




3. श्रीमद्भगवद्गीता, १०.३३
4. तत्रैव, १०.३०
5. सि.शि.का., श्लो.६

**लोकानामन्तकृत् कालः कालोऽन्यः कलनात्मकः ।**
**स द्विधा स्थूलसूक्ष्मत्वान्मूर्त्तश्चामूर्त्त उच्यते ।।**[6]

अत्र कालस्वरूपं विवेचयन् कालस्य भेदानां वर्णनं कृतं वर्तते। कालः द्विविधः प्रथमोऽनन्तः यः सकलचराचरभूतानां संहारकारकः भवति। द्वितीयः गणनात्मकः ज्ञानयोग्यः व्यवहारार्हश्च। सः गणनात्मकः कालोऽपि स्थूलसूक्ष्मभेदात् द्विविधः वर्तते। स्थूलकालः मूर्त्तसंज्ञकः सूक्ष्मकालश्च अमूर्तसंज्ञकः भवति। अयं स्थूलकाल एव दैनिकव्यवहारयोग्यः वर्तते, सूक्ष्मकालस्तु गणिते एव प्रयुज्यते, न तु व्यवहारे । एवमत्र कालस्य त्रैविध्यं सिद्धम्।

**प्राणादिः कथितो मूर्तस्त्रुट्याद्योऽमूर्तसंज्ञकः ।**
**षड्भिः प्राणैर्विनाडी स्यात् तत्षष्ट्या नाडिका स्मृता।।**[7]
**नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम् ।**
**तत् त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा ।**
**ऐन्दवस्तिथिभिस्तद्वत् संक्रान्त्या सौर उच्यते ।।**[8]

अत्र मूर्तामूर्तकालपरिचयः कृतोऽस्ति ।

प्राणः नाम स्वस्थसुखासीनपुरुषस्य अव्यवहितदशगुर्वक्षरोच्चारणान्तर्वर्त्ती कालः । गुर्वक्षरलक्षणं च –

**'सानुस्वारं विसर्गान्ते दीर्घो युक्तः परश्च यः ।**
**वर्णस्तं गुरुमित्याहुश्छन्दःशास्त्रविशारदाः।।** [9]

अस्मात् प्राणादारभ्य कल्पमानं यावत् कालस्य मूर्त्तरूपं भवति तथा च त्रुट्यादितः प्राणाद्यं यावत् कालः अमूर्त्तसञ्ज्ञकः। तत्र त्रुटिः नाम सूचिकायाः अग्रभागेन जलजपत्रच्छेदनतुल्यकालः। यथोक्तं नारदेन– **'सूच्या भिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते।'**[10] एवं षड्भिः प्राणैः एका विनाडिका एकपलतुल्या भवति। षष्टिभिः विनाडिकाभिः एका नाडी भवति। अस्या एव पर्यायौ घटीदण्डौ स्तः। षष्टिनाडिकाभिः एकं नाक्षत्राहोरात्रं भवति तथा च त्रिंशता नाक्षत्राहोरात्रैः एकः नाक्षत्रमासो भवति। कस्यचिन्नक्षत्रस्योदयादुदयं यावत् यत्कालः व्यतीतः तन्नाक्षत्राहोरात्रम्। तत्र नक्षत्राणां गतेरभावान्नाक्षत्राहोरात्रमानं सर्वदैव षष्टिघटिकात्मकम्। एवमेव एकसूर्योदयात् द्वितीयसूर्योदयं यावत् कालमानम्। एकं सावनाहोरात्रं भवति। अमान्तादमान्तं यावत् त्रिंशत्संख्यकाभिः तिथिभिरेको चान्द्रमासः जायते। तिथिर्नाम सूर्याचन्द्रमसोः द्वादशांशान्तरात्मकः कालः। अर्थात् सूर्याचन्द्रमसोरमायां संयोगः जायते ततश्च शीघ्रगतिकः चन्द्रः सूर्यादग्रे गच्छति एवं वर्धितान्तरं यदा द्वादशांशतुल्यं भवति तदैका तिथिर्जायते। रवेः क्रान्तिवृत्तसम एकांशभोगकालः सौरदिवसः तथा सौर-संक्राान्तिद्वयान्तर्वर्तीकालस्य एकः सौरमासो भवति। तत्र संक्रान्तिर्नाम ग्रहकेन्द्रबिन्दोः राशिप्रवेशकालः। अतः सूर्यकेन्द्रबिन्दो एकराशि-प्रवेशकालादपरराशिप्रवेशकालं यावदेको सौरमासः ।

अत्र नाडी, घटी, दण्डः, एते शब्दाः तुल्यार्थबोधकाः सन्ति । नाडीघटीदण्डयन्त्रैः कालमापनं क्रियते स्म। नाडीयन्त्रेण मापितः कालः नाडी, घटीयन्त्रेण घटी, दण्डेन च मापितः दण्डाख्यः भवति। अत्र यन्त्रभेदेन केवलं नामभेदः न तु मानभेदः। 'वि' उपसर्गप्रयोगेण तत्षष्ट्यंशस्य ज्ञानं जायते यथा 'विनाडी' पदेन नाडीषष्ट्यंशतुल्यकालस्य बोधः भवति। इदानीं भारतीयपाश्चात्यकालयोः साम्यनिरूपणं सारिणीमाध्यमेन प्रस्तूयते –

---

6. सू.सि.मा. अधि. श्लो.१०
7. सू.सि.मा. अधि. श्लो.११
8. सू.सि.मा. श्लो.१२
9. सू.सि.म. श्लो.१२ टीकायां
10. सि.शि.का. श्लो.१६-१८

| भारतीयः कालः | | पाश्चात्यः कालः |
|---|---|---|
| | **(मूर्त्तकालः)** | |
| १ प्राणः (असुः) | १० विपलानि | ०४ सेकेण्ड |
| १ पलम् (विघटी) | ६० विपलानि | २४ सेकेण्ड |
| ५/२ | पलानि | ०१ मिनट |
| १ नाडी (घटी) | ६० पलानि | २४ मिनट |
| ५/२ नाडी | (घटी) | ०१ घण्टा |
| १ नाक्षत्राहोरात्रम् | ६० नाड्यः | २४ घण्टा |
| १ मासः | ३० अहोरात्राणि | १ मन्थ (Month) |
| १ वर्षम् | १२ मासाः | १ ईयर (Year) |
| | **(अमूर्त्तकालः)** | |
| १ त्रुटिः | सूच्या पद्मपत्रभेदनकालः | |
| १ रेणुः | ६० त्रुटयः | |
| १ लवः | ६० रेणवः | |
| १ लीक्षकम् | ६० लवाः | |

**पारिभाषिकशब्दाः**

(१) **अहोरात्रम्** – शाब्दिकव्युत्पत्तिदृष्ट्या तु अहश्च रात्रिश्च तयोरैक्यम् अहोरात्रम् । व्यवहारिकदृष्ट्या तु अहोरात्रमानं सावननाक्षत्रादिभेदेन भिन्नं भिन्नं भवति ।

(२) **राशिः**- षष्ट्युत्तरत्रिशतांशात्मकस्य क्रान्तिवृत्तस्य समानद्वादशभागाः द्वादशराशयः भवन्ति । तथा प्रत्येकं राशेर्मानं त्रिंशदंशात्मकं भवति ।

(३) **क्रान्तिवृत्तम्** – यस्मिन् वृत्ते सूर्यः भ्रमति तत् क्रान्तिवृत्तम् । अस्मिन्नेव वृत्ते समाः मेषादिद्वादशराशयः भवन्ति ।

(४) **संक्रान्तिः** - संक्रमणमेव संक्रान्तिः। ग्रहकेन्द्रबिन्दोः राशिप्रवेशकालः संक्रान्तिरिति उच्यते।

(क) अस्मिन् अध्याये सारांशरूपेण कालस्य भेदत्रयमुपलभ्यते। तेष्वपि प्रथमः लोकान्तकारकः संहारात्मकः कालः।

(ख) कलनात्मकस्य कालस्य द्वौ भेदौ मूर्त्तामूर्त्तरूपौ स्तः। तयोरपि अमूर्त्तकालस्य व्यवहारे अनुपयोगित्वात् मूर्त्तकालेनैव जगतः सर्वाणि व्यावहारिक-कार्याणि प्रचलन्ति।

(ग) अतिसूक्ष्मत्वात् अमूर्त्तकालः गणिते सांकेतिकरूपेण प्रयुज्यते ।

(घ) प्राचीनभारते घट्यादिमानैः व्यवहारः भवति स्म। परञ्चेदानीं घण्टादिकैः आधुनिकमानैः सर्वत्र व्यवहारः परिदृश्यते। तत्र सावनमानस्य प्रत्यक्षोपलब्धत्वात्।

**अथ ग्रहाणां पूर्वगतौ कारणमाह-**

**पश्चाद् व्रजन्तोऽतिजवान्नक्षत्रैः सततं ग्रहाः।**
**जीयमानास्तु लम्बन्ते तुल्यमेव स्वमार्गगाः।।**[11]
**प्राग्गतित्वमतस्तेषां भगणैः प्रत्यहं गतिः।**
**परिणाहवशाद् भिन्ना तद्वशाद् भानि भुञ्जते।।**[12]

पश्चादिति सूर्यादयो गगनेचराः नक्षत्रैः ग्रह प्रवहानिलजनितातिशयवेगात्, पश्चिमाभिमुखं नित्यं, स्वस्थानात्

11. सू.सि.म.अ.श्लो.२५
12. सू.सि.भ.अ.श्लो.२६


पूर्वाभिमुखं लम्बायमाना भवन्ति। अत्रेदमवधेयम्- यदेतद्भचक्रं सग्रहं भ्रमद् दृश्यते तज्जगदुत्पादकेन ब्रह्मणा सृष्टयादौ विरचय्याकाशे भे मुखेऽश्विन्यादो निवेशितम्। यत्रैतद्भचक्रमाकशे निवेशितं तत्र नित्यं प्रत्यग्गतिः प्रवहो नाम वायुः। तेन प्रवहानिलेन प्रेरितं सखेचरं भचक्रं प्रत्यग्भ्रमणे प्रवृत्तमित्यतो ग्रहाणां प्रवहजनिता प्रत्यग्गतिः। सा त्वतिशीघ्रा गतिर्यत एकेनाहोरात्रेण भमण्डलस्य परिभ्रमणं जायते। अथ तयाऽतिशीघ्रगत्या नक्षत्रैः सह प्रत्यङ्मुखं गच्छन्तो ग्रहाः (स्वस्वकक्षासु तुल्यमेव) नक्षत्रापेक्षया पूर्वदिशि लम्बिता भवन्ति।

यथा ह्येकस्मिन् प्रातःकाले कोऽपि ग्रहो येन नक्षत्रेण सहोदितो दृष्टः स ग्रहो द्वितीये प्रातःकाले तन्नक्षत्रात्पूर्वदिशि (अधोलम्बितः) दृश्यतेऽर्थाद् द्वितीयदिने नक्षत्रस्योदयानन्तरं ग्रहोदयो जायते। एवं कस्मिंश्चिद्दिनेऽश्विनीनक्षत्रे दृष्टश्चन्द्रो द्वितीयदिने तत्समये भरण्यां दृश्यतेति तत्र न क्षरति-(न गच्छति) ति नक्षत्रमिति नक्षत्रशब्दव्युत्पत्त्या नक्षत्राणां गतेरभावात्पूर्वपूर्वक्रमेण निवेशाच्च ग्रहाणां स्वतः पूर्वागतिः सिद्धयति। पूर्वा गतिः स्वस्वकक्षासु योजनमानेन समैव। तथा चाह भास्करः-'**समा गतिस्तु योजनैर्नभःसदां सदा भवे'दिति**।

यतो हि सर्व एव ग्रहाः कल्पे खककक्षायोजनमेव भ्रमन्ति। अतो यदि कल्पकुदिनैः खककक्षायोजनं तदा एकेन किम्? इत्यनुपातेन योजनात्मिका गतिः सिद्ध्यति।

अतः प्राच्यामवलम्बनात् ग्रहाणां, प्रागगतित्वं पूर्वचारित्वं वा सिद्धम्। अथ पूर्वमुक्तं '...लम्बन्ते तुल्यमेव स्वमार्गगाः' तत्कथं ग्रहाणां भगणेषु भेदो दृश्यत इत्यत आह-भगणैः प्रत्यहं गतिरिति। ग्रहाणां स्वस्वभगणैः, दैनन्दिनी गतिः, अर्थात् कल्पकुदिनैः कल्पग्रहभगणास्तदैकेन कुदिनेन किमित्यनुपातेन या गतिः सा, स्वस्वकक्षाऽनुरोधाद्, अतुल्या भवति। एतदुक्तं भवति। सर्वेषामपि ग्रहाणां स्वस्वकक्षा भिन्ना तेन भगणानुपातसिद्धा कलात्मिका दिनगतिरतुल्या भवति। तद्दिनगत्यनुरोधात् ग्रहाः भानि राशीन् भुञ्जते। अनयैव कलात्मिकया गत्या ग्रहा राशिभोगं कुर्वन्तीत्यर्थः। अत्रोपत्तिः -

चन्द्र-बुध-शुक्र-रवि-कुज-गुरु-शनैश्चराः क्रमेण उपर्युपरिसंस्थया भूकेन्द्रिकस्व-स्व-कक्षासु भूबिम्बं परितो भ्रमन्तीति प्राचीनानां पाश्चात्यानां मते बुधः-शुक्र-भू-कुज-गुरु-शनयो ग्रहाः सूर्यमभितो दीर्घवृत्ते भ्रमन्तीति मध्यगतिवशाद् ग्रहाणां स्पष्टीकरणथं दीर्घवृत्तलक्षणमेव शरणम्। चन्द्रः भुवः परितो भ्रमतीत्यनेन उपग्रहत्वेनाख्यात इति। भास्करोऽपि- '**भूमेः पिण्डः शशाङ्क-ज्ञ-कवि-रवि-कुजे-ज्यार्कि-नक्षत्रकक्षा**'[13] इत्याह। सर्वा अपि ग्रहकक्षाश्चक्रलिप्तात्मिका इति ग्रहकक्षायोजनैर्यदि भगणकलाः २१६००' तदा गतियोजनैः केति? इति सर्वेषां ग्रहाणां गतियोजनेषु तुल्येष्वपि कक्षानामतुल्यत्वादनुपातलब्धा गतिकला भिन्ना भिन्ना स्यादेव। यतो महायोजनात्मके वृत्ते एकस्मिन्योजने याः कलाः न ता लघुयोजनात्मके वृत्ते भवन्तीति।




अत्र कल्प्यते उपरितनं वृत्तं दशयोजनात्मकमधस्तनं वृत्तं पञ्चयोजनात्मकं च। तत्रोपरिष्ठवृत्ते अ इ चापमेकयोजनमितं तल्लघुवृत्ते उ च चापसनमर्थात् अ इ वृत्तखण्डं उ च वृत्तखण्डं १ योजनम्। परश्च वस्तुतः अइ

13. सि.शि.गो.अ. भुवनकोशे, श्लो.२

चापं मउ चापं, उभयवृत्तकेन्द्रनिष्ठ (अकेइ) कोणस्यैकत्वात् चापस्य कोणमानारोधाच्च। अतो महद्वृत्ते गतियोजने या गतिकला ततोऽधिका लघुवृत्तीयगतियोजने गतिकला भवन्तीत्युपपन्नम्। एतेन लघुकक्षायां स्थितो ग्रहः शीघ्रगतिकः, महत्कक्षायां स्थितो ग्रहः मन्दगतिको भवतीत्यप्यवधेयम्।

अथ ग्रहाणां भगणभोगे कालस्य न्यूनाधिक्यमाह-

**शीघ्रगस्तान्यथाऽल्पेन कालेन भहताऽल्पगः।**
**तेषां तु परिवर्तेन पौष्णान्ते भगणः स्मृतः।।**[14]

अत्र अथ शब्दः पूर्वोक्ताद्विशेषं सूचयति। शीघ्रगतिकः (अधिकगतिकलः) ग्रहः, भानि (राशीन्) अल्पेन कालेन, मन्दगतिकः ग्रहः, महता कालेन, तानि भानि भुञ्जते। तेषां द्वादशराशीनाम् प्राग्गत्या समन्ताद् भ्रमणेन, रेवतीनक्षत्रान्ते (मीनराश्यन्ते) ग्रहाणां स्वस्वचक्रभोगः स्मृतो मनीषिभिः। यः कोऽपि ग्रहः पूर्वगत्या अश्विनीनक्षत्रमारभ्य रेवतीनक्षत्रान्तमेकं भचक्रं यावता कालेन भ्रमति तावाँस्तस्य भगणभोगाख्यः कालो ज्ञेयः। भचक्रभ्रमणं तस्यैको भगण इति।

अत्रोपपत्तिः-

लघुकक्षो ग्रहः शीघ्रगतिः, बृहत्कक्षो मन्दगतिरिति पूर्वं उपपत्तावुक्तमेव। तत्र कक्षाणां भगणकलाङ्कितत्वात् कक्षा-(भचक्र) भ्रमणमेव भगण इति तुल्यगतियोजनेन भ्रमन् मन्दगतिग्रहो महत्कक्षत्वान्महता कालेन, शीघ्रगतिग्रहस्तु लघुकक्षत्वादल्पेन कालेन भगणपूर्त्तिं करोतीति किं चित्रम् ? अत एवाह भास्करः-

**कक्षाः सर्वा अपि दिविषदां चक्रलिप्ताङ्कितास्ता**
**वृत्ते लघ्व्यो लघुनि, महति स्युर्महत्यश्च लिप्ताः।**
**तस्मादेते शशिजमृगुजादित्यभौमेज्यमन्दा**
**मन्दाक्रान्ता इव शशधराद् भान्ति यान्तः क्रमेण।।**[15]

२. ग्रहाणां भगणसंख्या पठनाद् पूर्वं कथितं सौरसिद्धान्तरीत्या-

**विकलानां कला षष्ठ्या तत्षष्ठ्या भाग उच्यते।**
**तत् त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते।।**[16] **१**

विकलानामिति। षष्टिविकलाभिः एका कला तथा कलानां षष्ट्या, एकोंऽशः कथ्यते अंशानां त्रिंशता ३०, एको राशिः, ते द्वादश राशय एव, एको भगणो भवेत्।

अत्र मूर्त्ते काले यथा प्राणादिः कालः परिभाषितस्तथैव क्षेत्रात्मके विकलादेः परिभाषा बोध्या। अर्थाद् विकलाधः क्षेत्रीयकालोऽमूर्त इति तस्य व्यवहारे त्यागः समुचितोऽतो विकलादिरेव परिभाषित आचार्येण। परञ्च न तावदेवतया परिभाषया विकलामितिः प्रस्फुटा भवत्यतः 'क्षेत्रे समाद्येन समा विभागाः स्युश्चकराश्यंश-कलाविलिप्ता इति भास्करोक्तेन सौरवर्षमेकम् १ भगणः। १ मासः १ राशिः। १ दिनम् १ अंशः। १ घटी १ कला। १ पलं १ विकला। १ विपलं १ प्रतिविकला। अथ यतः ६ प्राणाः १ पलं, अतः १ विकला ६ प्राणः, तेन विकला/६० (प्रतिविकला) ६ प्राणाः/६० प्राणः/१०। अर्थात् विकलाधोविभागः प्राणल्पोऽतोऽमूर्त्त इति।

---

14. सू.सि. म., श्लो.सं.२६
15. सि.शि.ग्र.ग. श्लो.२७
16. सू.सि. म., श्लो.सं.

# व्रतपर्वोत्सव मीमांसा

**श्रीतेजस्करपाण्डेयः**
फलितज्योतिषाचार्यः

ज्योतिषशास्त्रं वेदाङ्गशास्त्रमुच्यते।[1] वेदाङ्गेष्वपि चक्षुःस्थानीयं [2] शास्त्रमिदं सर्वलोकोपकारकमपि कथ्यते। शास्त्रमिदं यत्र जन्मपत्रमाध्यमेन जातकस्य जीवने शुभाशुभघटनानां दिग्दर्शनं करोति तथैव धर्मानुरागिणां कृते व्रत-पर्वोत्सवादीनां निर्णयं कृत्वा समुचितं मार्गदर्शनमपि करोति। धर्मशास्त्रानुमोदितं प्रकृतेऽस्मिन् प्रबन्धे व्रत-पर्वोत्सवादीनां धर्मशास्त्रीयं ज्योतिषशास्त्रीयं विश्लेषणं कृतं विद्यते।

भारतीयवैदिकसनातनपरम्परायां व्रतपर्वणां दीर्घा परम्परा अनादिकालाद् वर्तते। एतेषां व्रतपर्वणां निर्णयः ज्योतिषधर्मशास्त्रानुसारं क्रियते। एकस्मिन् वर्षे चैत्रादयः द्वादशमासाः सन्ति। एतेषु द्वादशमासेषु बहूनि पर्वाणि भवन्ति। लेखस्य विस्तरभयाद् समेषां पर्वणां नामानि न विलिख्य अत्र प्रमुख-प्रमुखपर्वणाम् उल्लेखः क्रियते। वयं जानीमः यन्मानवव्यवहारः नवविधकालमानेषु चतुर्भिः सौर-सावन-नाक्षत्र-चन्द्रमानैः एव प्रचलति। तत्र वर्ष-अयन-ऋतूनां विचारः सौरमानानुसारेण, मास-तिथ्योः विचारः चान्द्रमानानुसरेण, दिवसविचारः सावनमानानुसारेण तथा घट्यादीनां विचारः नाक्षत्रमानानुसारेण प्रचलति। तत्र एकस्मिन् चन्द्रमासे शुक्ल-कृष्णप्रभेदाभ्यां द्वौ पक्षौ भवतः। एकस्मिन् पक्षे पञ्चदशतिथयः भवन्ति। प्रत्येकस्मिन् मासे प्रतिपदातिथितः पञ्चमीपर्यन्तं भिन्न-भिन्नपर्वाणि भवन्ति।

**प्रतिपदातः पञ्चमीतिथिपर्यन्तं निर्णयः –** चैत्रशुक्लप्रतिपदातिथौ अन्यतिथौ वा एकैव व्यक्तिः एकस्मिन् दिने भिन्न-भिन्नसंकल्पेन इष्टिः कलशस्थापनं, वसन्तनवरात्रव्रतारम्भः, वर्षपतिपूजनं, ध्वजारोहणं, गौरीयात्रा, धर्मघटदानं, रोटकव्रतं, कल्पादिश्राद्धञ्च क्रियन्ते। कार्तिकशुक्लद्वितीयायाः यमद्वितीयाव्रतं, चैत्रशुक्लतृतीयायां सौभाग्यशयनव्रतं, ज्येष्ठशुक्लतृतीयायां रम्भाव्रतं, श्रावणशुक्लतृतीयायां मधुश्रवाव्रतं, भाद्रशुक्लतृतीयायां हरितालिकाव्रतञ्च वर्तन्ते। एतत् आवश्यकं वर्तते यत् प्रत्येकं व्रताय भिन्न-भिन्नसंकल्पः तत्तत्सम्बन्धिदेवतापूजनं कुर्यात्। अतः एकस्मिन्नेव दिने अनेके व्रताः परस्परविरोधिनः न, अपितु पूरकाः भवन्ति। भिन्न-भिन्नव्रतमाध्यमेन भिन्न-भिन्नकामनानां पूर्तिः भवति। त्रिमुहूर्त्तव्यापिनीतिथेः धर्मशास्त्रीयं महत्त्वं वर्तते। मुहूर्तो घटिकायद्वयम् इत्यनुसारं द्वयोः घट्योः एको मुहूर्त्तो भवति। अतः षड् घटीनां त्रयो मुहूर्त्ताः। एका घटी = 24 मिनटात्मिका वर्तते। षड् घट्यः = 2:24 घण्टादिः। यदि काचित् तिथिः सूर्योदयकालात् षड् घट्यः/त्रिमुहूर्ता अल्पा भवेत्तदा धार्मिककार्यार्थं विचारणीया भवति।

**षष्ठीतः दशमीतिथिं यावत् निर्णयः-** व्रतराजग्रन्थानुसारं षष्ठीतिथौ ललिताव्रतं, कपिलाषष्ठी, सूर्यषष्ठी, स्कन्दषष्ठी, चम्पाषष्ठी च वर्तन्ते। एतेषु व्रतेषु बिहार-झारखण्ड-उत्तरप्रदेशादिप्रान्तेषु सूर्यषष्ठीप्रमुखं वर्तते। ललिताव्रतं भाद्रपदशुक्लपक्षस्य षष्ठीतिथौ भवति। हेमाद्रौ भविष्यपुराणे

1. सिद्धान्तशिरोमणिः गणिताध्याध्याये कालमानाध्यायः श्लो.सं.

2.

च लिखितं यत् मध्याह्नव्यापिनीतिथिः ग्राह्या। यतोहि अस्मिन् पर्वणि जागरणं मुख्यं, जागरणं रात्रौ वर्तते। इदं पर्व गुर्जरप्रान्ते प्रसिद्धमस्ति। कपिलाषष्ठीव्रतं भाद्रपदमासस्य कृष्णपक्षस्य षष्ठीतिथौ मन्यते। एतत्  व्रतं पूर्व-परविद्धा गृह्यते। पुराणानुसारं भाद्रपदकृष्णषष्ठीतिथौ सूर्यो हस्तनक्षत्रे, व्यतीपातयोगः रोहिणीनक्षत्रं मङ्गलवासरश्च तदा  कपिलाषष्ठीव्रतं भवतीति ब्रह्मणः निर्देशः। सप्तमीतिथौ गङ्गासप्तमी, शीतलासप्तमी, मुक्ताभरणसप्तमी, रथसप्तमी अचलासप्तमी च भवन्ति एतेषु समेषु व्रतेषु शुक्लपक्षान्तर्गतं परविद्धाष्टमी ग्राह्या कृष्णपक्षे पूर्वविद्धा च। शुक्लपक्षे बुधाष्टमी प्रभातकालादारभ्य अपराह्नकालं यावत् अर्थात् तृतीयप्रहरपर्यन्तं द्विघटीं यावत् बुधवासरेण युक्ता तदा ग्रहणीया। सायंकाले चैत्र-श्रावण-भाद्रपद-आश्विन-कार्तिकमासेषु कृष्णपक्षे बुधाष्टमी न ग्रहीतव्या। यदा शुक्लपक्षे बुधवासरे अष्टमीतिथिः भवेत्तदा एकभुक्तादिव्रतेषु ग्रहणीया। बुधाष्टमी चैत्रमासे देवशयने सन्ध्याकाले च न ग्रहीतव्या, यतोहि उपर्युक्तनिषिद्धकाले बुधाष्टमीव्रतपालनेन पूर्वजन्मोपार्जितपुण्यक्षयकारिका भवति। नवमीतिथिव्रतेषु मुख्यरूपेण रामनवमी अक्षयनवमी महानवमी च सन्ति। नवमीतिथिः दशमीसंयुक्ता कदापि न ग्रहीतव्या। दशमीतिथौ प्रमुखरूपेण विजयादशमी आशादशमीव्रतं दशावतारव्रतञ्च वर्तन्ते। आश्विनशुक्लपक्षे दशमीतिथिः विजया दशमी इति कथ्यते या तारोदयकाले व्याप्ता भवेत् सा ग्रहणीया। चिन्तामणिग्रन्थे कथितं वर्तते यत् आश्विनशुक्लदशमी तारोदयकाले व्याप्ता भवति सा विजया कारिका अनेकसिद्धिदायिका च विद्यते।

**एकादशीतः पूर्णिमा-अमावस्यातिथिपरकनिर्णयः-** अस्माकं धर्मशास्त्रीयग्रन्थेषु एकादशीव्रतनिर्णयविषये विस्तृतरूपेण लिखितमस्ति। एतदर्थं एकादशीव्रतीनां कृते एकादशीतिथिव्रतविषये शास्त्रसम्मतं लिख्यते। प्रथमतया तिथिः तद्वेधविषये ज्ञानमावश्यकं विद्यते। तिथिः द्विविधा भवति 1. सम्पूर्णा (शुद्धा) 2. सखण्डा (विद्धा)। सूर्योदयात् अग्रिमसूर्योदयं यावत् 60घटिका तिथिः पूर्णा कथ्यते, अस्मिन् मध्ये द्वितीया तिथिः भवेत्तदा सा सखण्डा विद्यते। सखण्डापि द्विविधा 1. सूर्योदयात् सूर्यास्तं यावत् या तिथिः सा शुद्धातिथिः 2. अन्या विद्धातिथिः। तिथीनां वेधः द्विविधः 1. प्रातर्वेधः 2. सायंवेधश्च। सामान्यतः वेधः षड् घटिकात्मकः भवति। यदि न्यूनातिन्यूनं 4 घटिका भवेत्तदा सा अग्रिमा तिथिः विद्धा वर्तते। अतः अल्पमानत्वात् स्वतः अग्रिमया तिथ्या वेधिता भवति। एवम्प्रकारेण सायंवेधेन सूर्यास्तात् न्यूनातिन्यूनं 6 घटीपूर्वं यस्याः तिथेः आरम्भो भवेत्तदा पूर्ववर्तीतिथेः वेधं करोति अन्यथा स्वतः तस्मात् तिथेः विद्धा विद्यते। अयं तिथिविषयकः सामान्यवेधविचारो वर्तते। परञ्च एकादशीव्रतनिर्णये दशमीतिथेः विशेषवेधविचारः क्रियते। एकादशीव्रतस्य मुख्यतः चत्वारः भेदास्सन्ति। चतुर्विधभेदानामाधारेण निर्णयः क्रियते। 1. स्मार्त्तः= 60 घटिकात्मकः वेधः 2. वैष्णवः =56 घटिकात्मकः वेधः 3. रामानुज-वल्लभमतानुयायिनां वैष्णवानां = 55 घटिकात्मकः वेधः 4. निम्बार्कसम्प्रदायस्य चक्राङ्कितमहाभागवतां = 45 घटिकात्मकः वेधः। सूर्योदयकाले दशमीतिथिः भवेत्तदा स्मार्त्तः, सूर्योदयात् पूर्वं चतुर्घट्याभ्यन्तरे दशमीतिथिः भवेत्तदा वैष्णवः, सूर्योदयात् पूर्वं पञ्च घट्याभ्यन्तरे दशमीतिथिः भवेत्तदा रामानुजवल्लभ-सम्प्रदायस्य वैष्णवजनाः, सूर्योदयात् पूर्वं पञ्चदशघट्याभ्यन्तरे दशमीतिथिः भवेत्तदा निम्बार्कसम्प्रदायस्य

महाभागवताः एकादशीतिथिं दशमीविद्धां मन्यन्ते। दशमीविद्धैकाकादशीव्रतं समेषामाचार्याणां मतानुसारं वर्जितमस्ति। द्वादशीतिथेः व्रतेषु चैत्रशुक्लद्वादशी 'दमनोत्सवः' इत्यस्य विधानमस्ति। रामार्चनचन्द्रिकायां लिखितं यत् चैत्रशुक्लद्वादश्यां दमनोत्सवः प्रतिवर्षं मन्यते। दमनं दमनकं वा अशोकवृक्षस्य फलस्य नाम वर्तते। पद्मपुराणे उल्लिखितमस्ति यत् कार्तिके व्रतम्, चैत्रे दोला, श्रावणे तन्तुपूजनं पवित्रारोहणञ्च, चैत्रे दमनोत्सवः इत्यादीनाम् आचरणं यो न करोति तदा तस्य पतनं भवति। त्रयोदशीतिथौ जयापार्वतीव्रतं, गोत्रिरात्रव्रतम्, अशोकरात्रिरात्रव्रतम्, शनिप्रदोषव्रतं, अनङ्गत्रयोदशीव्रतञ्च प्रमुखाः सन्ति। यदि कस्मिंश्चित् पक्षे द्विदिनात्मिका चतुर्दशीतिथिः (तिथिवृद्धिः) स्यात्तदा कृष्णे पूर्वा, शुक्ले उत्तरा ग्रहणीया। उपवासे द्वयोः पक्षयोः चतुर्दशी परा ग्राह्या, व्रतराजे लिखितं यत् चैत्रशुक्लचतुर्दश्यां पूर्वा ग्रहीतव्या। अमावस्यातिथेः प्रमुखानि पर्वाणि कुशोत्पाटनी, पिठोरीव्रतं, महालक्ष्मीव्रतं (दीपावली), महाव्रतं, सोमवती अमावस्याव्रतं, अर्धोदयव्रतं, मलमासव्रतं, स्वस्तिकादिव्रतं च सन्ति। एवम्प्रकारेण पर्वणां निर्णयः कर्तव्यः।

।। इति दिक्।।

**सर्पापसारणमन्त्रः-**

सर्पापसर्प भद्रन्ते दूरं गच्छ महाविष !।
जन्मेजयस्य यज्ञान्ते आस्तीक वचनं स्मर ।।
आस्तीकवचनं श्रुत्वा यः सर्पो न निवर्तते।
शतधा भिद्यते मूर्ध्ना शिंशवृक्षफलं यथा

-महाभारते ।।

## लखनऊपरिसरीय-ज्योतिष-विभागस्य गतिविधयः

(सत्रम्-२०२०-२१)




उत्तरप्रदेशस्य राजधान्यां लखनऊ (लक्ष्मणपुरी)नामके नगरे अवस्थितोऽयं राष्ट्रिय-संस्कृत- संस्थानस्य लखनऊ-परिसरः स्वस्थापनादिवसात् (२ अगस्त १९८६ दिनाङ्कात्) भारतीयां संस्कृतिमभिरक्षयन् संस्कृत प्रचार- प्रसारादिषु क्षेत्रेषु महदवदानं कुर्वन् महानगरे अवस्थितोऽपि दशएकड़ परिमितेन क्षेत्रफलेन गोमतीनद्याः तटे विलसन् सज्जनानाकर्षयन् संस्कृतच्छात्राणां मनोकामनां पूरयन् निरन्तरमग्रे सरो वर्तते ।



अस्मिन् परिसरे १९९५ तमस्य ख्रिस्ताब्दस्य दिसम्बरमासे श्रीमताम् आचार्यसर्वनारायणझा-महोदयानामागमनेन ज्योतिष-विभाग-स्यारम्भः सञ्जातः। एतेषां कार्यकालः दिसम्बर १९९५ तः मई २०११ यावत् आसीत्। एतेषामागमनानन्तरं ज्योतिषशास्त्रस्य सम्यक् प्रचारः प्रसारश्च सञ्जातः। बहवश्छात्राः ज्योतिषाचार्योपाधिं विद्यावारिध्युपाधिञ्च सम्प्राप्य देशस्य विभिन्नेषु प्रभागेषु ज्योतिषशास्त्रस्य प्रचार प्रसारादिकर्मणि शास्त्राध्यापनादिकर्मणि च संलग्नाः विद्यन्ते । इमे श्रीकामेश्वरसिंहदरभङ्गाविश्वविद्यालयस्य कुलपतिपदे दिनांक 29 अप्रैल 2017 तः 30 मई 2020 शनिवासरं यावत् सेवां विधाय अद्यत्वे केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊ-परिसरस्य निदेशकपदस्य शोभामभिवर्धयन्ति। एतेषां निदेशकत्वे लखनऊ-परिसरस्य शोभा अनुदिनं शुक्लपक्षस्य चन्द्र इव वर्धमाना विद्यते।

(एकोनविंशोऽङ्कः २०२१-२२ पृष्ठसंख्या- 91)

संस्थानस्य लखनऊ-परिसरेऽस्मिन् फलितज्योतिषस्य गणितज्योतिषस्य च सम्यक् अध्यापनं भवति। द्वयोः विभागयोः मेधाविनः छात्राः अध्ययन-लेखनादिकर्मसु अग्रसराः वर्तन्ते। सिद्धान्तज्योतिषशास्त्रस्य सविधि-अध्ययन-अध्यापन-निमित्तमाधुनिकयन्त्राणां सङ्कलनाय प्रस्तावः मुख्यालये प्रेषितो विद्यते। तेषु दूरवीक्षणयन्त्रम् (२०१६-१७)सत्रे ज्योतिषविभागेन सम्प्राप्तम्। अनेन यन्त्रमाध्यमेन छात्राः अध्यापकाश्च ग्रह-नक्षत्रैश्च वेधविधिना परिचिताः भवन्ति।

**सत्रेऽस्मिन् विभागीयाचार्याणां नामानि –**

अस्मिन् सत्रे लखनऊपरिसरे ज्योतिषविभागे चत्वारः अध्यापकाः आसन्। तेषु विभागस्य सहायकाचार्यः (संविदा) डॉ. नरेशशर्मा 27 जनवरी 2021 दिनाङ्के हरियाणाप्रान्तस्थ-श्रीवाल्मीकि-संस्कृतविश्वविद्यालये समायोजितायां सहायकाचार्यपदस्य अन्तर्वीक्षायां चयनितः सञ्जातः। तदनु देहलीमुख्यालयस्य निर्देशेन ज्यौतिषविभागे 21 फरवरी 2021 दिनाङ्के समायोजितायाम् अन्तर्वीक्षायां द्वयोः अतिथि-आचार्ययोः चयनं सञ्जातम्। तेषु डॉ. अश्विनीकुमारपाण्डेयस्य तथा वाराणसीस्थस्य रानीपद्मावती-तारा-योगतन्त्र-आदर्श-संस्कृत-महाविद्यालस्य ज्योतिष-विभागीय-अतिथिप्राध्यापकस्य श्रीआनन्दप्रकाशपाठकस्य चयनं सञ्जातम्। अद्यत्वे विभागे षड्-अध्यापकाः स्वीयं-स्वीयं दायित्वं महत्या श्रद्धया निर्वहन्ति। तेषां नामानि तथा परिसरेऽस्मिन् कार्यभारग्रहणतिथिः-

| नाम | पदम् | | परिसरेऽस्मिन् कार्यभारग्रहणतिथिः- |
|---|---|---|---|
| १. **प्रो. सार्वनारायणझाः** | परिसर-निदेशकः | | २८ दिस. २०२० |
| २. **प्रो. मदनमोहनपाठकः** | आचार्योऽध्यक्षश्च | | ०६ जून २०११ तः |
| ३. **डॉ. उमेशकुमारपाण्डेयः** | सहायकाचार्यः | (संविदा) | २१ जून २०११ तः |
| ४. **डॉ. (श्रीमती) चन्द्रश्रीपाण्डेयः** | सहायकाचार्या | (संविदा) | ०१ अगस्त २०१२ तः |
| ५. **डॉ. अश्विनीकुमारपाण्डेयः** | सहायकाचार्यः | (अ.प्रा.) | २४ फरवरी २०२१ तः |
| ६. **श्रीआनन्दप्रकाशपाठकः** | सहायकाचार्यः | (अ.प्रा.) | २४ फरवरी २०२१ तः |

अस्मिन् परिसरे ज्योतिषशास्त्रं पठितुं देशस्य विविधेभ्यः प्रान्तेभ्यः पिपठिषवः छात्राः अध्ययनं विधाय स्वीयं जीवनं सफलीकुर्वन्ति। ज्योतिषविभागे विषयद्वयोः फलित-गणितयोः सम्यक् अध्यापनं विभागीयाध्यापकैः सोत्साहं क्रियते। यस्य प्रमाणस्वरूपं अत्रत्याश्छात्राः समग्रेऽपि भारते फलित-सिद्धान्तविभागद्वयोरपि परीक्षायां सर्वाधिकानङ्कानवाप्नुवन्ति।

यद्यपि ज्योतिषं पठितुं छात्राणां संख्या स्वल्पीयसी भवति । तथापि अत्रत्याः छात्राः आचार्यकक्षोत्तीर्णतां सम्प्राप्य विविध-उद्योगद्वारा स्वीयं जीवनं यापयन्ति। केचन छात्राः शास्त्रेऽस्मिन् शोधकार्यमपि कुर्वन्ति। अत्र प्रतिकक्षं छात्राणां संख्या निम्नलिखिताः विद्यन्ते । तद्यथा –

| **अस्मिन् (२०१९-२०) सत्रे छात्रसंख्या - (फलितज्योतिष-सिद्धान्तज्योतिष-विभागयोः)** | | | | | | | आहत्य कुलसं. |
|---|---|---|---|---|---|---|---|
| कक्षा | फलितज्योतिषे | | | सिद्धान्तज्योतिषे | | | |
| लिङ्गम् | पु. | स्त्री. | **योगः** | पु. | स्त्री. | **योगः** | |
| प्राक्शास्त्री- 1 | 06 | 00 | **06** | - | - | - | 06 |
| प्राक्शास्त्री- 2 | 03 | 00 | **03** | - | - | - | 03 |
| शास्त्री- 1 | 06 | 00 | **06** | 03 | 00 | **03** | 09 |
| शास्त्री- 2 | 06 | 00 | **06** | 02 | 00 | **02** | 08 |
| शास्त्री- 3 | 08 | 00 | **08** | 01 | 01 | **02** | 10 |
| आचार्यः-1 | 07 | 00 | **07** | 05 | 00 | **05** | 12 |
| आचार्यः-2 | 03 | 00 | **03** | 01 | - | **01** | 04 |
| विद्यावारिधि- | | | | | | | |
| | | | | | | | 52 |

२०१३-१४ शिक्षासत्रतः विद्यावारिधि(शोध)च्छात्राणां विवरणम्-

| शोधार्थी नाम<br>शोध-पञ्जीयनसंख्या<br>आधारसंख्या | **पञ्जीयन-दिनांकः** | **शोधशीर्षकः** | नियमितः/<br>स्वतन्त्रः | **मार्गदर्शक- नाम** |
|---|---|---|---|---|
| १.उमाकान्ततिवारी<br>पं.सं.- १५६८४<br>आ.सं- ५१९१७७७८५५४२ | १४ फर. २०१४<br>**शोधप्रबन्धसमर्पित दि.**-16/7/2019<br>**उपाधिप्राप्तः** | शुभाशुभफलनिर्धारणे सामुद्रिकशास्त्रस्य प्रायोगिकमनुशीलनम् | स्वतन्त्रः | प्रो.मदनमोहन पाठकः |
| २.शैलेशकुमारतिवारी<br>पं.सं.-१५७१०<br>आ.सं.-४५६९१५१६२४ | २५ फर. २०१४<br>**उपाधिप्राप्तः** | ज्योतिषशास्त्र दृष्ट्या मानसिकरोगस्य प्रायोगकिमध्यनम् | नियमितः | प्रो.मदनमोहन पाठकः |
| ३.अभयत्रिपाठी<br>पं.सं. १६७९७<br>आ.सं.-९००९६४६६९०७६ | २९ दिस.२०१४ | मयमत-समरांगणसूत्र-धारयोः देवालयसन्दर्भे तुलनात्मकमध्ययनम् | स्वतन्त्रः | डा.अमितकुमार शुक्लः |

| | | | | |
|---|---|---|---|---|
| ४. कु. चित्राश्रीवास्तव<br>पं. सं.-१६७९९<br>आ.सं.- ६०५९८३०३१५४१ | २९ अप्रै.२०१४<br>**शोधप्रबन्धसमर्पित** | प्रशासकीययोगानां<br>ज्योतिषशास्त्रदृष्ट्या<br>अध्ययनम् | नियमितः | डा.अमितकुमारशुक्लः |
| ५. शत्रुघ्नपाण्डेयः<br>पं.सं.- १८३९५<br>आ.सं.-२२३७४८०७६११४ | २० जन.२०१५ | ज्योतिषशास्त्रोक्तानाम्<br>अरिष्टयोगानां<br>विश्लेषणात्मकमध्ययनम् | नियमितः | डा.अमितकुमारशुक्लः |
| ६. सरिता शुक्ला<br>पं.सं. १७११५<br>आ.सं. | १ जन. २०१५ | डा. प्रशस्यमित्रशास्त्रिणः<br>कथासाहित्यिक<br>समीक्षात्मक-<br>मध्ययनम् | नियमितः | डा. अमितकुमारशुक्लः |
| ७. वैङ्कटेश्वरपाण्डेयः<br>पं.सं.- ४३२<br>आ.सं. ७८७६३०६४७९०२ | २१ सित.२०१७ | आदितस्त्रिप्रश्नाधि-<br>कारपर्यन्तं सूर्यसिद्धान्तस्य<br>समीक्षात्मकमध्ययनम् | नियमितः | प्रो. मदनमोहनपाठकः |
| ८. सन्तोषपाठकः<br>पं.सं.<br>आ.सं. ५३००८७६६२०८३ | २१ सित. २०१७ | कमलाकरभटदृष्ट्या सूर्य-<br>चन्द्रग्रहणयोस्तुलना<br>त्मकमध्ययनम् | नियमितः | प्रो. मदनमोहनपाठकः |
| ९. अभयकुमारपाण्डेयः<br>पं.सं.<br>आ.सं. ५३००८७६६२०८३ | १० अगस्त<br>२०१७ | कृषिपराशरस्य<br>समीक्षात्मकमध्ययनम् | नियमितः | प्रो. मदनमोहनपाठकः |
| १०. अमितकुमारमिश्रः<br>पं.सं.<br>आ.सं. ३४००३९२६७१८७ | ०७ अगस्त<br>२०१७ | जन्माङ्गचक्रे<br>विदेशगमनयोगानां<br>सर्वेक्षणात्मकमध्ययनम् | नियमितः | प्रो. मदनमोहनपाठकः |

## प्राक्शास्त्रीप्रथमवर्षस्य छात्राः- सत्रम्- 2021-22

१. सुमित कुमार पाण्डेय
२. अनुराग दीप द्विवेदी
३. सूरज कुमार
४. आकाश रावत
५. प्रणतपाल दास
६. अविनाश कुमार झा

### प्राक्शास्त्रीद्वितीयवर्षस्य छात्राः- सत्रम्- 2021-22

१. कमलेश कुमार तिवारी
२. उत्सव कुमार
३. सिद्धान्तदेव शुक्ल
४. रिषु कुमार
५. आकाश पाण्डेय
६. हुकुमचन्द्र पाण्डेय

### शास्त्रीप्रथमवर्षफलित/सिद्धान्तज्यौतिषच्छात्राः- सत्रम्- 2021-22

१. सत्यम द्विवेदी
२. तरुण दीक्षित
३. सक्षम तिवारी
४. दीपक शर्मा
५. आशुतोष शुक्ला
६. अखिल पाण्डेय
७. प्रिंस कुमार
८. अभिषेक अवस्थी

### शास्त्रीद्वितीयवर्षफलित/सिद्धान्तज्यौतिषच्छात्राः- सत्रम्- 2021-22

१. सत्यम अवस्थी
२. आशीष कुमार
३. प्रभाकर मिश्रा

१. सतीश कुमार चतुर्वेदी
२. रामकृष्ण
३. नारायण मिश्रा

### शास्त्रीतृतीयवर्षफलित/सिद्धान्तज्यौतिषच्छात्राः- सत्रम्- 2020-21

१. दिव्यांशु मिश्रा
२. सचिन तिवारी
३. अंश तिवारी
४. कुशाग्र मिश्रा
५. सिद्धान्त तिवारी
६. विनय पाण्डेय

१. हिमांशु झा
२. प्रखर कुमार अवस्थी

## आचार्यप्रथमवर्षफलित/सिद्धान्तज्यौतिषच्छात्राः- सत्रम्- 2020-21

१. अभिनव आनन्द पाण्डेय
२. दिनकर अवस्थी
३. शिवम
४. पवन कुमार शुक्ला
५. मयंक वशिष्ठ
६. राहुल मिश्रा
७. विशेष कुमार
८. सुयश शुक्ल
९. शरद कुमार मिश्र
१०. विकास तिवारी
११. शंखधर द्विवेदी
१२. अवधविहारी

१. अमरदीप मिश्रा
२. वेद प्रकाश पाठक
३. विभा मिश्रा

## आचार्यद्वितीयवर्षफलित/सिद्धान्तज्यौतिषच्छात्राः- सत्रम्- 2020-21

१. शशांक शेखर दुबे
२. अनिल कुमार शुक्ल
३. वैभव कुमार मिश्र
४. ऋषिराज पाण्डेय
५. अश्विनी कुमार पाण्डेय
६. जनार्दन त्रिवेदी
७. नितिन त्रिवेदी
८. सिद्धार्थ मिश्रा
९. सर्वेश कुमार दुबे
१०. माधव कुमार झा
११. शुभम त्रिवेदी

**भास्कराचार्यपरिषद्-**

छात्राणां सर्वमुखीविकासाय विभागेऽस्मिन् प्राध्यापकानां छात्राणाञ्च मनोयोगेन भास्कराचार्यपरिषदः परिकल्पना कृता विद्यते। यस्यां परिषदि मासे पूर्वसूचनानुसारं वारद्वयं छात्राः अध्यापकानां निर्देशने एकत्र सम्भूय भाषणादिना स्वाधीतस्य विषयस्य परिमार्जनं कुर्वन्ति। अस्यां परिषदि विभागीयाध्यापकानामपि क्रमशः व्याख्यानं भवति । अनेनापि छात्राः लाभान्विताः भवन्ति।

**ज्योतिषपरिचयपाठ्यक्रमस्य वृत्तम्-**

सर्वसामान्याः जनाः अपि ज्योतिषशास्त्रं जानीयुस्तदर्थं त्रैमासिकज्योतिषपरिचयपाठ्य-क्रमस्य आयोजनं प्रतिसत्रं प्रचलति। सत्रेऽस्मिन् करोना-महामारी-कारणात् ज्योतिष-परिचय-पाठ्यक्रमस्य आयोजनम् अवरुद्धं जातम्।

कार्यक्रमेऽस्मिन् अध्येतृवर्गेषु सामान्याः नागरिकाः, बैंककर्मिणः, सुरक्षाकर्मिणः, चिकित्सकाः, अभियन्तारः, विभिन्न-विभागीयाधिकारिणः, विविधव्यवसायिनः, नेतृगणाः, पौरोहित्यकर्मरताः, मिडिया-बान्धवाः अन्ये सामाजिकाश्च अध्येतृरूपेण समुपस्थिताः भवन्ति। अस्य **पञ्चदशचक्रस्य** आयोजनं २०२१-२२ सत्रे भवितव्यम् आसीत्। परन्तु विभिन्नव्यस्तताकारणात् सत्रेऽस्मिन्नपि अस्य कक्षा नैव प्रचलिता। अस्तु, अयं त्रैमासिकज्योतिषपरिचयपाठ्यः पूर्वनिर्धारितकालानुसारेणैव प्रतिसप्ताहं दिनत्रयं दिनचतुष्टयं वा सायं 5 वादनात् 6 वादनं यावत् प्रचलति। अनेन कार्यक्रमेण बहवः छात्राः अध्येतारश्च लाभान्विताः भवन्ति।

# कलिमाहात्म्यम्

सन्तः क्वापि न सन्ति सन्ति यदि वा दुःखेन जीवन्ति ते
विद्वांसोऽपि न सन्ति सन्ति यदि वा मात्सर्ययुक्ताश्च ते ।
राजानोऽपि न सन्ति सन्ति यदि वा लोभाद्धनग्राहिणो
दातारोऽपि न सन्ति सन्ति यदि वा सेवानुकूलाः कलौ ।।
धर्मः प्रव्रजितस्तपः प्रचलितं सत्यञ्च दूरे गतं
पृथ्वीमन्दफला नराः कपटिनः चित्तञ्च शाठ्योर्जितम्।।
राजानोऽर्थपराः न रक्षणपराः पुत्राः पितुर्द्वेषिणः
साधुः सीदति दुर्जनः प्रभवति प्राप्ते कलौ दुर्युगे ।।



राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
ज्योतिषविभागः-वास्तुविभागश्च
Lecture Series -I.K.S. 74 तमं व्याख्यानम्
दिनाङ्कः 24-01-2022, समयः –सायं 8-00 वादने, दिवसः- सोमवासरः
विषयः - "प्रत्यक्षं ज्योतिषं शास्त्रम्"
President
Prof. Radha Kant Thakur
Vice Chancellor (I/C)
National Sanskrit University, Tirupati
Chief Guest
Prof. Madan Mohan Pathak
Head Dept of Jyotish
Central Sanskrit university, Lucknow campus
Keynote Speaker
Prof. Prasad Gokhale
Dept of Vedang Jyotish
K. K. S .U.
Ramtek, Nagpur
Google Meet
Meeting Link - https://meet.google.com/vvq-soxy-fsz




केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरणवीरपरिसरः, कोटभलवालः, जम्मूः
द्विदिवसीय-अन्तर्जालीय-राष्ट्रिय-ज्योतिष-शोध-सङ्गोष्ठी
( 10–11 फरवरी 2021 )
उद्घाटन-समारोहः
दिनाङ्कः -10 फरवरी 2021, समयः- 11:30 तः 01.00 पर्यन्तम्
मुख्यातिथिः – प्रो.रामचन्द्रपाण्डेयः
राष्ट्रपतिसम्मानितः, पूर्वसंकायप्रमुखः
धर्मविज्ञानसंकायः, काशीहिन्दूविश्वविद्यालयः, वाराणसी
मुख्यवक्ता – प्रो. मदनमोहनपाठकः
अध्यक्षः– ज्योतिषविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊपरिसरः
अध्यक्षः – प्रो. मदनमोहनझाः
निदेशकः
केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरणवीरपरिसरः
उपाध्यक्षः – प्रो. प्रभातकुमारमहापात्रः
अध्यक्षः–ज्योतिषविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरणवीरपरिसरः
तत्र भवतां भवतीनां च समुपस्थितिं सादरं प्रार्थयामहे।
निवेदकः– निदेशकः
परिसरपरिवारश्च
केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरणवीरपरिसरः, जम्मूः

## संस्कृत - गीतिका

**प्रो.रामकुमारशर्मा**
आचार्योऽध्यक्षश्च, साहित्यविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुर-परिसरः

त्यज संसारं गतसमसारम्
स्मारं स्मारं भवतरणम्
स्वान्त ! कलय राधारमणम् ।।१।।
यस्य बोधलवकणिकासुरया निन्दसि सर्वान्मत्तः ।
यस्य सेवने जीवनकालः सकलो भवता दत्तः ।।
प्राप्ते मरणे कृतसमहरणे
त्राता नहि तद् व्याकरणम्
स्वान्त ! कलय राधारमणम् ।।२।।
कालिदासकवितानिःष्यन्दा भवता रसा निपीताः ।
मम्मटपण्डितराजविचारा आजीवनञ्च गीताः ।।
काले क्रुद्धे कण्ठे रुद्धे
साहित्यं नहि हितकरणम्
स्वान्त ! कलय राधारमणम् ।।३।।
ग्रहगणनालीनेन न भवता कदापि कालो गणितः ।
सोऽद्य शिरसि जरया स्वभगिन्या नृत्यति कामं कुपितः ।।
क्षीणा शक्तिर्लीना भक्तिः
ज्योतिषविद्या नहि शरणम्
स्वान्त ! कलय राधारमणम् ।।४।।
धर्मशास्त्रमधिकृत्य सर्वदा विहितः स्वप्नविचारः ।
किन्तु न विदितः कदापि भवता स्वप्नोऽयं संसारः ।।
नहि चित्तं शुद्धं नहि तद् बुद्धम्
धर्मशास्त्रमपि नोद्धरणम्
स्वान्त ! कलय राधारमणम् ।।५।।
विधिमीमांसामांसलमतिना नात्मा भवता ज्ञातः ।
मधुपुष्पितवाणीकुविचारे यातः सायं प्रातः ।।
विगतसहायः स्थूलः कायः
मीमांसा नहि गतिकारणम्
स्वान्त! कलय राधारमणम् ।।६।।

**संस्कृतसंरक्षणसम्वर्धनसम्बन्धिविभिन्नकार्यक्रमेषु सम्पादकस्यावदानम्** - (शैक्षिकसत्रम्-२०२१-२२)

| दिनाङ्कः | स्थानम् | कार्यक्रमः |
|---|---|---|
| १९ नवम्बर २०२१<br>शुक्रवासरः | **केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीरणवीरपरिसरः, कोट, भलवाल, जम्मू,** | व्यवहारिक-प्रायोगिक-ज्योतिष-कार्यशालायां व्याख्यानविषयः- **जातकशास्त्रस्य व्यवहारिकः पक्षः** |
| ०८ जनवरी २०२२<br>शनिवासरे<br>०९:०० - १० वादनं यावत्<br>जुममाध्यमेन | कामेश्वरसिंह-दरभंगा-संस्कृत-विश्वविद्यालयस्य स्ना. ज्यो. विभागे | प्राग्विद्यावारिधि षाण्मासिकपाठ्यक्रमकार्यक्रमस्य आन्तर्जालीया चतुश्चत्वारिंशीकक्षायां अभिभाषणम्<br>**विषयः- पञ्चाङ्गपरिचयः** |
| २४ जनवरी २०२२ दिनाङ्के<br>सायं ८ तः ९ वादनं यावत् | राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः,ज्योतिषवास्तुविभागः, | Lecture Series 74 तमे व्याख्याने मुख्यातिथिरूपेण व्याख्यानम्<br>**विषयः-**<br>**प्रत्यक्षं ज्यौतिषं शास्त्रम्** |
| २८ जनवरी २०२२<br>शुक्रवासरे<br>०९:०० - १० वादनं यावत्<br>जुममाध्यमेन | कामेश्वरसिंह-दरभंगा-संस्कृत-विश्वविद्यालयस्य स्ना. ज्यो. विभागे | प्राग्विद्यावारिधि षाण्मासिकपाठ्यक्रमकार्यक्रमस्य आन्तर्जालीया चतुष्चत्वारिंशीकक्षायां अभिभाषणम्<br>**विषयः- मेलापकविचारः** |
| २९ मार्च २०२२ दिनाङ्के<br>सायं ४ तः ५ वादनं यावत् | राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः,ज्योतिषवास्तुविभागः, | सप्तदिवसत्मकान्ताराष्ट्रिय-वास्तुशास्त्रीयकार्यशालायां<br>**विषयः-**<br>**गृहप्रवेशविचारः गृहप्रवेशमुहूर्तश्च** |
| १२ मार्च २०२२ दिनाङ्के<br>दिवा १२ तः ०१ वादनं यावत् | लखनऊ-विश्वविद्यालयस्य संस्कृतविभागस्य संस्कृत-समुत्कर्ष-केन्द्रद्वारा संचालितं व्याख्यानम् | **संस्कृतवाङ्मय में उद्योग एवं कौशल विकास**,<br>(आत्मनिर्भरभारत के विशिष्टसन्दर्भ में) |

## भास्करोदयपत्रिकायाः सप्तम-अङ्कस्य लोकार्पणम् :-



सप्तम -अङ्कस्य गरली -परिसरे लोकार्पणं कुर्वन्तः नवदेहलीस्थितस्य राष्ट्रियसंस्कृतसंस्थानस्य निदेशकचराः श्रीमन्तः डॉ.कमलाकान्तमिश्रमहोदयाः पार्श्वे सन्ति गरलीपरिसरस्य प्राचार्याः प्रो.सुरेन्द्रझामहोदयाः एवञ्च आचार्याः रामदेवझामहोदयाः, आचार्याः रामनारायणदासमहोदयाः, पत्रिकासम्पादकः डॉ.मदनमोहनपाठकश्च

दिनाङ्कः- २२ फरवरी २००९ स्थानम्- रा.सं.संस्थानम्, गरली-परिसरः

---

## भास्करोदयपत्रिकायाः त्रयोदश-अङ्कस्य लोकार्पणम् :-



भास्करोदयपत्रिकायाः त्रयोदशअङ्कस्य लोकार्पणं कुर्वन्तः भारतसर्वकारस्य माननीयगृहमन्त्रिणः श्रीमन्तःराजनाथसिंहमहोदयाः, पार्श्वे विलसन्ति प्रो. शिशिरकुमारपाण्डेयः, डॉ. उमेशचन्द्रपाण्डेयः, प्रो. रामसागरमिश्रमहोदयाश्च

दिनाङ्कः - २२ नवम्बर २०१५ शनिवासरः, लखनऊ

---

## भास्करोदयपत्रिकायाः चतुर्दश-अङ्कस्य लोकार्पणम् :-



भास्करोदयपत्रिकायाः चतुर्दश-अंकस्य लोकार्पणं कुर्वन्तः विलसन्ति दक्षिणतः ICPR इति संस्थायाः निदेशिकाः डॉ. पूजाव्यासमहोदयाः, का.सिं.द.सं. विश्वविद्यालयस्य कुलपतयः प्रो. सर्वनारायणझामहोदयाः, प्रधानाचार्याः प्रो. विजयकुमारजैनमहोदयाः, उ.प्र.शासनस्य विधिमन्त्रिणः मा. बृजेशपाठकमहोदयाः, परिसरस्य वरिष्ठाचार्याः प्रो.शिशिरकुमारपाण्डेयमहोदयाः पत्रिकासम्पादकाः प्रो. मदनमोहनपाठकमहोदयाश्च।

दिनाङ्कः - ०८ अप्रैल २०१७ शनिवासरः, लखनऊ

Scanned with OKEN Scanner

गोवंशस्य परिरक्षणं कुरु। राष्ट्रस्य परिवर्धनं कुरु।।



भास्करोदयनामिकाया: ज्योतिष-शोधपत्रिकाया: विगताङ्का:-




ISSN No.:2278-0815

Scanned with OKEN Scanner